Digitized by Arya Samaj Foundation Chennai and eGangotri

080536

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080536

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg No. C. 1073

080536

संस्कृतसाहित्यपरिषत्

Vol. XX, No. 9] [January, 1938

१८५९ शकीये पौषे २०श-वर्षस्य ९म-संख्या

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

विशेष-प्रबन्धः—
सुरभारतीदशाविमर्शः

Main article—
Surabhāratīdaśāvimarśaḥ

सम्पादकः—

महामहोपाध्याय-श्रीअनन्तकृष्ण-शास्त्री

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

মাসিক-সভা

সংস্কৃত-সাহিত্য-পরিষদ আগামিনী মাসিক-সভা ১৩৪৪ বঙ্গাব্দীয়-সৌরফাল্গুনস্য ২০শ (বিংশ)-দিবসে শুক্রবাসরে সায়ং ষড়্বাদনতো ভবিষ্যতীতি সর্বেষাং সংস্কৃত-ভাষাধ্যায়িনা-মধ্যাপকানাঞ্চ তত্র সমুপস্থিতিঃ প্রার্থনীয়া।

মাসিক সভা

সংস্কৃত-সাহিত্য-পরিষদের আগামী **মাসিক সভা—২০শে ফাল্গুন, ১৩৪৪, শুক্রবার, সন্ধ্যা ৬টার** সময়ে হইবে। সর্বসাধারণের উপস্থিতি একান্ত প্রার্থনীয়।

পণ্ডিতগণের জীবনী-সংগ্রহ

সংস্কৃত ভাষাভিজ্ঞ ব্যক্তিমাত্রই অবশ্য স্বীকার করিবেন যে ভারতবর্ষের গৌরব ভূতপূর্ব্ব এবং বর্ত্তমান **অধ্যাপকগণের জীবনী** একত্র সংগ্রহ করিয়া প্রকাশ করার যথেষ্ট উপযোগিতা আছে। এ বিষয়ে পরিষদের পক্ষ হইতে তথ্যানুসন্ধান করা হইতেছে। বঙ্গদেশে এখনও প্রায় ১০০০ সুপ্রতিষ্ঠিত অধ্যাপক আছেন, তাঁহাদের এবং তাঁহাদের অধ্যাপক পণ্ডিতগণের জীবনী সংগ্রহ করিতে পারিলেও একটা উল্লেখযোগ্য কার্য্য সম্পন্ন করা যাইতে পারে। তদুদ্দেশ্যে প্রত্যেক অধ্যাপকের নিকট বিনীত অনুরোধ এই যে, তাঁহারা অনুগ্রহপূর্ব্বক নিজের এবং স্বপরিচিত পরলোকগত বা বর্ত্তমান অধ্যাপকগণের মধ্যে অন্ততঃ দুই জনের সম্বন্ধে নিম্নলিখিত সংবাদগুলি **সংস্কৃত-সাহিত্য-পরিষৎ সম্পাদকের** নামে লিখিতভাবে জানাইলে দেশের ও দশের মহৎ উপকার সাধিত হইবে :—

নাম, পিতার নাম, উপাধি, কর্ম্মস্থল, জন্মস্থান (গ্রাম, পোঃ, জেলা), জন্মদিবস (বাংলা তারিখ, অন্ততঃ আনুমানিক সাল), বর্ত্তমান বয়স (পরলোকগত-স্থলে মৃত্যুদিবস—বাংলা তারিখ), তাঁহার অধ্যাপকের নাম, স্বরচিত কোন গ্রন্থাদি থাকিলে তাহার নাম (মুদ্রিত বা অমুদ্রিত জানা দরকার), নিজে টোলে মোট কত ছাত্র পড়াইয়াছেন তাহার আনুমানিক সংখ্যা, টোলের নাম ও ঠিকানা। সংবাদদাতার নাম ও ঠিকানা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

January, 1938	१८५९-शकीये पौषे २०श-वर्षस्य ९म-संख्या	Vol. XX, No. 9

प्रशान्तरत्नाकरम्

नाटकम्

श्रीकालीपदतर्काचार्यप्रणीतम्

(नान्दी)

नीलनलिनमञ्जुलतनुरतनुचापधारी
कर्बुरकुलधूमकेतुरनुगतहितकारी ।
हित्वा नृपपदमतिघनभीषणवनचारी
जयति जयति सीतापतिरखिलदुरितहारी ।

अपि च

यस्यासीमगुणैरधारि सुतरां शाखामृगैर्वश्यता
यं ध्यायन्ति मरामरासुरवराः सर्वार्थकल्पद्रुमम् ।
यो लोकत्रयभव्यसाधनकृते नानास्वरूपोऽभवत
सोऽयं राघवकुञ्जरो विजयते ज्योतिः परं श्यामलम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नान्द्यन्ते

सूत्रधारः—अलमतिप्रसङ्गेन। आदिष्टोऽस्मि नवरूपकप्रयोगदर्शन-कुतूहलिन्या परिषदा, यथा नवीनकविनिबद्धेन केनापि रम्यरूपकेण सम्भाव्यतामेष समाज इति। तत् केन वा तथाविधेन रूपकरत्नेन भवितव्यम्? (स्मृतिमभिनीय) आं दृष्टम्, अस्ति नातिचिरमेव केनापि कविना समुपहृतमस्मासु 'प्रशान्तरत्नाकरं' नाम रूपकरत्नम्, तेनैव तथाभूतेन शक्योऽयं समाजो रञ्जयितुम्। यत्र खलु—

सुगमः शब्दसम्भारः प्रयोगानुगुणक्रमः।
नानाभावसमुल्लासः प्रीतिहेतुः पदे पदे॥

तदिदानीं पारिपार्श्विको द्रष्टव्यः। तत् कथं नु खलु तं पश्यामि?

नेपथ्ये पारिपार्श्विकः—(संवृतस्य कवाटस्य शृङ्खलां संघट्टयन्) भाव, भाव, आः! कथमद्यापि संवृतः कवाटः?

सूत्र—अये, एष पारिपार्श्विकः स्वयमेव यथाकालं प्राप्तः! तदस्य द्वारमुद्घाटयामि। (तथा करोति)

पारिपार्श्विकः (प्रविश्य)—भाव, एषोऽहमभिवादये। कथमद्यापि संवृतः कवाटः?

सूत्र—मारिष, प्रातःप्रभृति भिक्षुभिः समुद्वेजितस्य दुर्भिक्षविक्षुभिते जनपदे कवाटसंवरणमन्तरेण नास्त्यन्यो निस्तारोपायः!

पारि—साम्प्रतं दिवसस्य चतुर्थे यामे पश्चिमाचलसन्निहिते सूरे कुतो वा भयं भिक्षुभ्यः, येनैवमनुष्ठीयते?

सूत्र—मारिष, न जानासि गतिं भिक्षूणाम्।

यदा जनपदे भिक्षा प्रतिद्वारं सुदुर्लभा।
तदा यामस्य नियमं पालयन्ति न भिक्षवः॥

पारि—आं ज्ञातम्!

(नेपथ्ये)—'भो अयमहं भिक्षार्थी, देहि भो भिक्षाम्'।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्र—मारिष, शृणोषि ? अथ साम्प्रतं पश्यसि कथमस्यामपि वेलायां संवृतकवाटस्तिष्ठामीति ?

पारि—अथकिम्, ज्ञायते। तत् को नु खल्वेष दिनावसाने भिक्षते ?

सूत्र—भवतु, पश्यामि, (दृष्ट्वा) आम् एष रत्नाकरो नाम ब्राह्मणः

बलवत्पीनकायोऽपि मानं निर्वास्य दूरतः।
प्रतिद्वारमटन् भिक्षामभ्यापतति मामितः॥

तदहमपि तथैव दैन्यं गतः किं नु खलु करिष्ये ? (स्मृत्वा) आं दृष्टम्, मारिष, एहि पश्चद्वारकेण संगीतशालामभिगम्य रत्नाकरादात्मानं रक्षावः। एष हि—

भिक्षाकर्पटसंशोभिस्कन्धसन्धिः सुदुःखितः।
क्षणादूर्द्ध्वमिहागन्ता विलम्बेन कृतं ततः॥

पारि—तथा। (निष्क्रान्तौ)

[इति प्रस्तावना]

(ततः प्रविशति भिक्षाकर्पटशोभितस्कन्धो रत्नाकरः)

रत्ना—भो अयमहं भिक्षार्थी, देहि भो भिक्षाम्! (नेपथ्यमुखमालोक्य) अहह! कथमेतावपि पुरुषौ मां भिक्षार्थिनमुपलभ्य निर्दयमेव पलायितौ ? अहो लोकवृत्तम्! अहो मे दुर्गतस्य भाग्यमहिमा!

गेहेषु गत्वा धनिनां समेषां सम्प्रार्थितास्ते लवमात्रभैक्ष्यम्।
केनापि हा हा न कृताऽनुकम्पा वृथैव सर्वं दिवसं श्रमो मे॥

धनिकाः खलु दीनानक्षिपातमात्रेणापि नानुकम्पन्ते, तदीयपरिवारास्ततोऽपि मदोद्धताः परुषया वाचा दीननिवहान् व्यथयन्तस्तृप्यन्ति। तत् क एष लोकसंव्यवहारो नाम ?

येनैव भूतेन समृद्धिभाजां विनिर्मितं सृष्टिकृता शरीरम्।
तेनैव किं दीनगणस्य कायो न निर्मितस्तेन महामहिम्ना ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च

अन्तःकरणतत्त्वस्य शक्तिर्वैश्वर्यशालिनाम् ।
दीनानां मानसीं शक्तिं पराभूय न वर्द्धते ।

तथापि धनिकाः सर्वतो हीनान् दीनान् मन्येरन्नित्यत्र किं वा बीजं विधिनिसृष्टादर्थवैभवादन्यत् ? स्मरामि हन्त स्मरामि प्रतिदिवसं पथि क्रीडतो धनिकतनुजैरलङ्कृतैर्दीन इति धिक्कृतस्य वत्सस्यात्रेयस्य मे सास्रं दुःखान्धकारमलिनं वदनम् ! तथा स्मरामि धनिकपत्नीगणैः सुमहत्या सम्पदा परिपूजितेन देवायतनगुरुणा तदादरव्याप्तेन दैन्यादेव प्रतिरुद्ध-प्रवेशायाः प्रियाया माधव्या जनन्याश्च मे गभीरदुःखनिवेदनवैशसम् !

दरिद्रस्य खलु,—

मैत्रीं छिनत्ति सुचिरन्तनबान्धवोऽपि
याच्ञाभयेन परिधावति दूरमार्गे ।
मूढोऽपि वित्तसहितो विदुषां वरेण्यो
दीनो विचित्रमतिरप्यवमानपात्रम् ॥

अपि च

आढ्यानां येन दोषेण समाजो नैति विक्रियाम् ।
तेनैव वत दीनानां समाजपरिवर्जनम् ॥

तदत्र वैषम्ये दीनानां दैन्यविधाता विधिरेव सुतरामधिक्षेपमर्हति ! हा हत-विधे, निष्करुण,

यदि दुःखाय जीवानां जन्म सृष्टाः कथं नु ते ।
एवं वैषम्यनैर्घृण्ये न युज्येते पितुस्तव ॥

अथवा क एष कर्मप्रभावसन्निधाने विधिर्नाम ?

जीवाः स्वकर्मविहितं फलमाश्रयन्ते
तस्माद् बहिर्विधिरलं न फलं प्रदातुम् ।
तेनैव चित्ररचना जगतो निरूढा
हेतुर्विचित्र इति कार्यगणो विचित्रः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा तस्यापि कर्मणो नियन्ता विधिरेवेति को वा विधेरन्यो धिक्कारमर्हति ? भवतु अलमनपेक्षितवस्तुपरिचिन्तया, परिश्रान्तोऽस्मि प्रातः प्रभृति भिक्षमाणो दीर्घाध्वपरिक्रमणेन, नेदानीमुत्सहे पदात् पदमपि गन्तुम्, पश्चिमान्तमवलम्बते चायं भगवान् सहस्रदीधितिः, तदस्य सन्निहितस्य न्यग्रोधपादपस्याधस्तात् क्षणं विश्रान्तो भवामि । (परिक्रम्य तथा कृत्वा) अयि भो न्यग्रोध,

त्वं स्थावरोऽपि परिकीर्णभुजप्रतानः
शान्तिं तनोषि सुतरां तलमाश्रितानाम् ।
किन्तूद्धता धनमदेन शरीरवन्तो
दीनोपकारविमुखाः किमु चित्तवन्तः ?

अहह ! परिणतप्रायो दिवसः ! इतस्तु गेहे वृद्धौ मे पितरौ, पतिव्रता दयिता, वत्सलः पुत्रश्च ममैव दुरन्तभाग्यस्य प्रस्थानपथं समीक्षमाणाः प्रतिमुहूर्त्तं सोपकरणमेव मां समुपनतमुत्प्रेक्षन्ते ; अहं पुनः पथिश्रमणपरिश्रान्तः शान्तये न्यग्रोधतलमाश्रित्य प्रशान्तः समुपविष्टोऽस्मि ! मूढ रत्नाकर, क एष ते विश्रामप्रयासः ?

त्वं तातं जननीं तथा पतिरतां पत्नीं सुतं वत्सलं
हित्वा क्षुत्परिपीडितानपि गृहे विश्राममाकाङ्क्षसि ?
धिग्धिक् त्वां निजशान्तिमात्रनिरतं जातं वृथा भूतले
प्रोत्तिष्ठ प्रतिकर्त्तुमात्मकरणैः स्वेषां विषादक्रमम् ॥

तदिदानीं—स्वजीवनव्ययेनापि विधेयं बन्धुरक्षणम् ।
अलमात्मसुखाकाङ्क्षाचापलेन तवामुना ॥

तदद्यापि शेषभूतं वणिजो लक्षपतेर्द्वारमुपसृत्य भैक्ष्यं भिक्षमाणः सफलकामो भवामि । अथ यदि तत्रापि नाभिमतलाभः, तदा ? तदा किं करिष्यामि ? किं करिष्यामि ? अहो ! घूर्णते शिरः, ! तमसा समाच्छन्नं जगत् ! शून्यतां गता वसुधा ! एष क्षुधा परिखिद्यमानस्तातो भूमौ विचेष्टते ! माता कातरं क्रोशन्ती पञ्चत्वमाप्नोति ! साध्वी वनिता चरमं श्वासं मुञ्चति, वत्सलः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रो—हा हा ! नातः परं शक्यं चिन्तयितुम ! यद् भवतु तद् भवतु, लक्षपतिगृहमेव गच्छामि, अथ यदि तत्रापि नाभिमतलाभस्तदा ! तदा !! अथवा अलमद्यापि मर्यादाभङ्गभयेन, स्वजनानां जीवनार्थं—

बलेनैव ग्रहीष्यामि तस्य लक्षपतेर्धनम् ।
स्वजनानां विपन्नानां रक्षा कार्या यथा तथा ॥

तदेष तत्रैव गच्छामि । (गन्तुमुद्यतः)

(ततः प्रविशति भिक्षुवेशेन गायन्ती सुमतिः)

गीतम्

जीव गुणाकर सुचरितमनुसर खलतां परिहर वह बहुमानम्,
भौतिककाये दुरितसहाये मा कुरु मा कुरु गौरवदानम् ।
विधिविपरीतं विधिमनु भीतं मानसमधिकुरु लसदवधानम्,
वरमिह मरणं सुचरितशरणं तदपि वरं नहि पापविधानम् ॥

(निष्क्रान्ता)

रत्ना—(विस्मयमभिनीय) अये, का नु खल्वेषा !

प्रसादयति चित्तं मे देवतेव शरीरिणी !
यस्याः सङ्गीतझङ्कारैः प्लावितं गगनान्तरम् ?

अहो साधु उपदिशति, तत् धिङ् मां वृत्तभङ्गव्यवसायिनम् !

यन्नेन तावद् यदरक्षमादौ वृत्तं महत् कष्टमपि प्रपन्नः ।
तदेव हा हा क्षणमात्रकेण त्यक्तुं प्रवृत्तोऽस्मि विमूढचेताः !

तत् किमिदानीमनुतिष्ठामि ? न शक्यते जीवता क्षुधया परिपीड्यमानानां स्वजनानां प्रत्यक्षमेव मरणमीक्षितुम् । तत् किमिदानीमनुतिष्ठेयम् ? किमनुतिष्ठेयम् ? (स्मृतिमभिनीय) आं दृष्टम् ! गायन्त्या प्रतिषिद्धं भौतिके काये गौरवं हास्यामि, तदिदानीम्,—

वरं विशुद्धवृत्तस्य मरणं मे क्षणान्तरे ।
न जातु वृत्तभङ्गेन जीवनं पापसङ्कुलम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हा तात, हा मातः, हा प्रिये माधवि, हा वत्स आत्रेय, युष्मान परित्यज्य क्वापि लोकान्तरे गमिष्यामि, वृथैवायं कायो यः क्षुधाविशीर्णानां चरमं श्वासं मुञ्चतामपि बान्धवानां न प्रतिकर्तुमलं दुःखस्य ! तत्

अकालहीनं वपुरेतदद्य त्यक्त्वा परं लोकमुपाश्रयेयम् ।
यतः सुहृत्पालनशक्त्यभावप्रसूतलज्जां विनिवर्त्तयेयम् ॥

तत् केनोपायेन समीहितं साधयामि ? (विचिन्त्य) आं दृष्टम् ! इहैव न्यग्रोधे आत्मानमुद्वध्य दुःसहां दुःखज्वालां निर्वापयिष्यामि ! क्व नु खलु पाशं लप्स्ये ? (विचिन्त्य) आम्, एष भिक्षाकर्षट एव पाशो भविष्यति । तदलं विलम्बेन यावदिदानीमेव वृक्षमारुह्य कण्ठे पाशं योजयित्वा स्वं समीहितं सम्पादयामि । (यथोक्तं सम्पादयितुमुपक्रमते)

(नेपथ्ये)

कः कोऽत्र, परित्रायतां परित्रायतां मामनाथां साहसिकेन तस्करेणाभिभूयमानाम् ।

रत्ना—(श्रुतिमभिनीय) अये, अदूरे योषित इवार्तप्रलापः श्रूयते ? तत् किन्नु खल्विदम् ?

(नेपथ्ये)

हा हा एष दुष्टतस्करः पादपान्तरितां मामचिरेणाक्रमिष्यति, हा हा ! अशरणास्मि ! कः कोऽत्र, परित्रायतां ! परित्रायताम् !!

रत्ना—(वृक्षात् सहसा अवतीर्य) अये, एषा कापि योषिद् दुष्टेन तस्करेण पराभूयते ! धिक् साहसम् ! रत्नाकर, किमद्यापि विलम्बसे ?

एषा कुलाङ्गना काचित्तस्करेणाभिभूयते ।
पञ्चेन्द्रियसमायुक्तस्त्वं माध्यस्थ्येन वर्तसे ?

तदलमतः परमपि प्रतीक्षणेन—

अचिरादस्य मूढस्य कण्ठं निष्पीड्य बाहुना ।
बलवानबलां रक्ष शौर्य्यं सार्थकमस्तु ते ॥

(गच्छन् पुनः प्रतिनिवृत्तः) अथवा अदण्डेन न प्रस्थातव्यम् ! तत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क नु खलु दण्डः ? (इतस्ततो दृष्ट्वा) आम्, एषा पादपशाखा दण्डो भविष्यति । (पादपशाखां गृहीत्वा) एष साम्प्रतं गच्छामि ।

(निष्क्रान्तः)

(ततः प्रविशति पादपान्तरितविग्रहां योषितमाक्रमितुमुपक्रान्तः पुरुषः)

पुरुषः—सुन्दरि, अलमद्यापि त्वानेन स्वपरित्राणप्रयत्नेन, व्यर्थं परिश्राम्यसि ! एषोऽहमिच्छामात्रेणैव त्वां ग्रहीतुं शक्नोमि, तथापि सान्त्वेनानुनीयसे, सत्वरमात्मानमर्षय, नातः परमपि मां परिश्रमं लम्भयेथाः ।

स्त्री—भद्र, प्रसीद, एषा तव पादयोः पतामि, प्रसीद, अनुमन्यस्व मां निर्विघ्नगमनाय ।

पुरुषः—निष्फलः प्रलापः, न मुच्यसे ।

स्त्री—यद्येवम्, कथय, किमस्माज्जनात् काम्यते ?

पुरुषः—अलङ्काराः ।

स्त्री—कुतो मे दीनाया अलङ्काराः ?

पुरुषः—अस्त्येवैतत् रौप्यमयं वलययुग्मम्, रौप्यमयी मेखला, सुवर्णमयश्च कुण्डलयुगलम् ।

स्त्री—एतेषां परिहारे निराभरणा पत्युरशिवसूचिका भवेयम् ।

पुरुषः—आः ! दुर्विनीते, लोहवलयमात्रकेण साभरणा भूत्वा पत्युः शिवमुद्घोषय, तत् सत्वरं प्रतिपादय, यदि श्रेयः कामयसे ?

स्त्री—हा हा ! अशरणास्मि, तत् का गतिः ? गृहाण (अलङ्कारान् शरीरादुन्मोच्य दूरतः क्षिपति)

पुरुषः—(क्षिप्तानलङ्कारान् चिनोति)

स्त्री—अपि नाम अस्मिन्नवसरे पलायिष्ये ? अथवा शूरतमादस्मादेतावता न शक्यं पलायितुम्, तदशरणाया मे नास्ति दैवाद्ऋते शरणमन्यत् । भगवति कात्यायनि, प्रसीद ।

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्ममीमांसायां प्रतिवादः

(पूर्वानुवृत्तः)

[निबन्धकः—श्रीज्ञानेन्द्रमोहनशर्मा]

अथ वैद्यवृत्तिनिरूपणाय श्रीमता—"अम्बष्ठानां चिकित्सित"मिति मनुवचनमुद्धृतम्। परन्तु मनुरम्बष्ठपदेन मातृदोषदूषिताकन्यातः अर्थात् कुमारीतो जातानामपसदाम्बष्ठानां (१०।६।८) तथा 'चिकित्सित'पदेनाश्वगवादीनामेव चिकित्सायाः परिग्रहणं कृतवानिति मीमांसाकारस्य बुद्धेर्विषयतां न गतमिति शोच्यम्। मनोरेतस्यैव वचनस्य अव्यवहितपूर्ववचनम्—"ये द्विजानामपसदास्ते निन्दितैर्वर्त्तयेयु"रित्यादिवचनं "अम्बष्ठानां चिकित्सित"मित्यस्य तथाविधेनैव अर्थेन सङ्गच्छते, अन्यथा सङ्गतेरभावः। अत्र तु वैद्यस्य पुण्यतमा चिकित्सा न प्रतीयते।

द्विविधः खल्वम्बष्ठः सदसद्भेदेन। तत्र विधिविहितजातः पूर्वस्तथाऽविधिविहितोऽवरः। यदुक्तं मीमांसाकर्त्रा—"वैश्यायां विधिना विप्राज्जातो ह्यम्बष्ठ उच्यते"—इति—सोऽपि किमपसदतां याति ? यदि अत्रापि अपसदत्वं तर्हि किं नाम सार्थक्यं वैधविवाहस्य ? यत्र हि अवैधविवाहस्तत्रैवापसदस्यावसरः। एतदपि वेदयितव्यं भवतीति भाग्यम्। अथवा स्वेच्छया सदसतोरम्बष्ठयोर्भेदमपलाप्य प्रवृत्तिवशाद् निबन्धकारेण सदेवासच्छब्देन निर्दिष्टं न वेति स एव जानाति। नहि युक्तिशतेनापि घटं पटयितुं शक्नोति कश्चित। वैद्या जात्या ब्राह्मणाः, ब्राह्मणेतरा वा इति वङ्गेषु विवादो बहोः कालादेव प्रचरति, परन्त्वधुनात्र वैद्याः सत्यपि ब्राह्मणत्वप्रातिकूल्ये स्वमर्यादामधिकृत्य स्वे महिम्नि विराजन्ते न वेति किमविदितमस्ति निबन्धकस्य ? वैद्यानां गोत्रप्रवर्तका ये ऋषयः, येषां नाम्ना वैद्याः स्वपरिचयं प्रदाय गौरव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुभवन्ति, तेषां नामान्यपिनाम धर्ममीमांसाकर्तुः कदाचित् श्रुतिपथमागतानि ? यदुक्तं महामहोपाध्याय-श्रीमता भरतेन "चन्द्रप्रभायां" वैद्यकुलपञ्जिकायां—"यस्य यस्य मुनेर्यो यः सन्तानः स स विश्रुतः। तत्तद्गोत्रादिना वैद्यः श्रेष्ठाद्यो हि स्वकर्मणा" इति,—तत एव वैद्याः स्वस्वब्राह्मणत्वं प्रतिपादयन्तो गोत्रप्रवर्तकर्षेर्नामोल्लेखपूर्वं संकल्प्य धर्म्याणि पैत्र्याणि च कर्माणि कुर्वन्ति कार्यन्ते च सद्ब्राह्मणैः। ये हि वैद्यानां वैश्यत्वं प्रतिपादयितुं यतन्ते, ते किं न जानन्ति वैश्यानां नास्त्यधिकारो वेदाध्यापने ? वैद्या यदि ब्राह्मणेतराः स्युस्तर्हि कथं वैद्यानाम् आयुर्वेदस्य अध्यापनेऽप्यधिकारः ? अप्यस्ति कश्चिदायुर्वेदस्य वेदत्वे सन्देहः ?

अथात्र प्रसङ्गतः संक्षेपेण वैद्याम्बष्ठयोः परिचयः प्रदीयते। न हि अम्बष्ठशब्देन तथा वैद्यशब्देन चिकित्सकानां तथा जात्या वैद्यानामवबोधः कार्यः। आसीदार्यावर्त्ते अम्बष्ठो नाम कश्चिद् देशविशेषः। तत्र ये केचिन्निवसन्तिस्म, त एव अम्बष्ठाः। परन्तु तद्देशवासिनो ब्राह्मणा एव अम्बष्ठशब्देन विशेषिता आसन। अपि च अम्बष्ठ इति शब्दः चिकित्सकेष्वपि। यथा मेदिन्यां तथा विश्वे,—"अम्बष्ठो देशभेदेऽपि विप्राद्वैश्यासुतेऽपि च।" भानुजीदीक्षितस्त्वाह "अम्बे तिष्ठतीति अम्बष्ठः। सुपिस्थ इति कः। अम्बाम्ब इति षत्वम्।" यो हि आतुरे पितृवत्तिष्ठति रोगान् निराकर्तुं स एव अम्बष्ठस्तस्मात् चिकित्सकस्यापि अम्बष्ठ इति संज्ञा। नैतावता विज्ञायते अम्बष्ठशब्देनैवावबुध्यते वैद्यः। एको हि शब्दो बहूनेवार्थान् प्रतिपादयितुं शक्नोतीति सर्वजनपरिज्ञातमेव। ये चाधुना वङ्गेषु वैद्यशब्देनाभिधीयन्ते, ते पूर्वम् अम्बष्ठदेशवासिनो ब्राह्मणा एव आसन्। अथ ते तद्देशं परित्यज्य सरस्वतीनदीतीरे वासं कुर्वन्तिस्म। एवञ्च ये पूर्वमम्बष्ठास्त एव सारस्वता जाताः। न हि सर्व एव अम्बष्ठा ब्राह्मणाः सरस्वतीतीरे वासञ्चक्रुः तेषु केचन सिन्धुतीरमासाद्य वासं कुर्वाणाः सैन्धवा इत्यभिहिताः। अथ त एव सारस्वताः सैन्धवाश्च अम्बष्ठा ब्राह्मणा बौद्धराजेन समानीता मगधे तथा गौडाधिपतिना समानीता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौडे निवसन्तः सम्पूजिताः स्ववृत्या वर्तन्ते स्म। अत एवाह महामहोपाध्यायो दुर्जयः,—

"ब्रह्मावर्तनिवासिनां वंश्या ये ह्यग्रजन्मनाम्।
सरस्वतीसरित्तीरे स्थिताः सारस्वता हि ते॥
सिन्धुतीरं तथाश्रित्य सैन्धवाः परिकीर्तिताः।
सारस्वतप्रसूतत्वात्तेऽपि सारस्वता द्विजाः॥
तेषां वैद्यकुले जाताः सर्वविद्याविशारदाः।
आयुर्वेदे कृताभ्यासाः प्रकृष्टाः कुलकर्मसु॥
आर्यावर्तात् समानीय गौडे च मगधे तथा।
वैद्याः सारस्वता विप्रा बौद्धराजेन स्थापिताः॥" इत्यादिः।

तथाच सारस्वतकुलप्रदीपे—

"वैद्यवंशसमुत्पन्ना ब्राह्मणा वेदपारगाः।
चिकित्साकुशलाश्चापि सुदक्षा याजने तथा॥
श्रेण्या सारस्वतास्ते च सर्वे विष्णुपरायणाः।
आर्यावर्तात् समागम्य जह्नुकन्याकूलेऽवसन्॥
विप्राः सारस्वता वैद्या विष्णुगुप्तमहामतेः।
उपदेशेन नीतास्ते पुत्रदारगणैः सह॥"

पुनश्च—

"अम्बष्ठदेशतश्चैते गौडमण्डलमागताः।
अम्बष्ठदेशवासित्वादम्बष्ठाश्चापि ते स्मृताः॥"

यथाच वाजसनेय-काण्वशाखीय-ब्राह्मणकुलप्रदीपे—

"गौडदेशस्थिताश्चैते वैद्यनाम्ना सुविश्रुताः।
शाखीया द्विविधाः प्रोक्ताः सारस्वताश्च सैन्धवाः॥
श्रेण्या सारस्वताः सर्वे विज्ञेया ब्राह्मणाश्च ते।
जात्या वैद्या न विज्ञेया नाम्बष्ठजातयोऽपि च॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिजातिरिति वैद्यानां विप्रेषु ज्ञातिगौरवात् ।
प्राणिभिः पूजनीयत्वाद्वृत्तेः पूज्यतमा तथा ॥
चिकित्सा-कुलवृत्तित्वाद्वृत्त्या जातिप्रवर्तनात् ।
वैद्यजातीति नाम्ना ते बौद्धराजेन स्थापिताः ॥
यावदेवं कृता पूजा विम्बिसारनृपेण च ।
तावत्ते वैद्यजातीति लोकैरिह प्रकीर्तिताः ॥
ज्ञेया वृत्तिस्तु वैद्यानां चिकित्साध्यापनादिका ।
नृपधर्माश्रयश्चापि इति चौशनसी स्मृतिः ॥
क्षत्रधर्माश्रयो वैद्यो ब्राह्मणः क्षत्रिय इव ।
अतः स ब्रह्मक्षत्रियो लोकैरिति निगद्यते ॥
मूर्द्धनि स चाभिषिक्तत्वात् क्षत्रियोऽपि प्रकीर्तितः ।
मूर्द्धाभिषिक्तराजन्यौ शब्दौ ह्येकार्थवाचकौ ॥"

अलमतिविस्तरेण ॥

एवमेव वैद्यशब्देनापि नहि चिकित्सापराणां वङ्गीयवैद्यानामवबोधः कार्यः । अत्र च उशना—

"सर्ववेदेषु निष्णातः सर्वशास्त्रविशारदः ।
चिकित्साकुशलश्चापि स वैद्यस्त्वभिधीयते ॥"

तथाच महर्षिरात्रेयः—

"विद्यासमाप्तौ भिषजस्तृतीया जातिरुच्यते ।
अश्नुते वैद्यशब्दं हि न वैद्यः पूर्वजन्मना ॥"

अपि च विष्णुसहस्रनामसु तथा वटुकभैरवस्तोत्रे भगवन्तौ हरिहरौ वैद्यशब्देनाभिहितौ दृष्ट्वापि कथं मीमांसकस्य वैद्ये विमतिः स्यादिति विचित्रम् । अपि तेन चक्षुषाऽपि वेदा न दृष्टाः ? नाप्यधीतानि पुराणादिकानि ? इति सुधीभिर्विचार्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



जगदीशचन्द्रवसुवियोगाष्टकम्

[निबन्धकः—पुरीसंस्कृतमहाविद्यालयाध्यापक-श्रीआनन्दमहापात्रः]

जगदीशस्तथा चन्द्रो वसु नाम धरातले ।
त्रयमेतत् त्रयीवाऽऽदौ कस्य नावश्यकं भवेत् ॥१॥
रक्षको जगदीशो हि यदि न स्यात् कुतो वसु ।
वस्वभावेन चन्द्रोऽपि नैवाऽऽह्लादकरो भवेत् ॥२॥
अत एतत्त्रययुतं यस्य नाम स्थितं क्षितौ ।
तस्य विच्छित्तिरद्यत्वे नाप्यवद्या निगद्यते ॥३॥
नाहं तस्य जगत्प्रियस्य सुचिरं ज्ञानानुरक्तस्य च
विश्वे नश्वरतां स्मरामि किमहो ! श्रीविश्वनाथः स्वयम् ।
नो मृत्युञ्जयतां प्रयाति न हि चेत्तत् किं वदामोऽधुना
दायादो विशदान्वयोऽपि सहजं दायं मृतावृच्छति ॥४॥
कुमुदस्य मुदं दधाति नो सकलस्यैव कलाकरो विधुः ?
कमलं भरतावनौ स्थितः समलं स्यादिति को वदेद्बुधः ॥५॥
शब्दब्रह्मपरायणो गुणवतामोजस्विनां श्रेयसा-
माधारो धरणीधरः प्रतिभया भास्वानिवात्युज्ज्वलः ।
यो देशस्य च केशवो निगदितो विज्ञानमानादिभि-
स्तेन श्रीजगदीशचन्द्रवसुना जेजीय्यतामव्ययम् ॥६॥
नगानां वीक्ष्य जडतां दया यस्यालया गिरा ।
उत्तिष्ठेति च भद्रं भो इत्यवादीत् सुधाकिरा ॥७॥
यः पाश्चात्त्यदिशं सुधाकरसमोल्लासेन बोधोदयो-
च्छ्वासेनोच्छलितां चकार महता माहात्म्यमत्युन्नतम् ।
तस्यैवोत्तमदेवसङ्गमजुषः को वर्णयेद् वर्णकै-
रल्पं कल्पलता फलं दिशति किं तेनाद्य धन्या धरा ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मीतिवृत्तम्

[निबन्धकः —श्रीप्रफुल्लकुमार-वेदान्ततीर्थः]

का हि ब्राह्मी ? किं मूलम् अस्याः ? कुतश्च प्रभवति ? तद् अहं विवक्षुरस्मि अस्मिन् प्रबन्धे। पुरा किल आर्या ब्रह्मावर्तम् अधितष्ठुः, वेदा वै तेषां धर्मे अर्थे कामे मोक्षे च निदर्शनम् आसन्। वेदाः द्विधा एव स्युः। मन्त्रस्तथा ब्राह्मणं च। मन्त्राणां या व्याख्या तद् ब्राह्मणम् इति। तत्र ब्राह्मणेषु या भाषा श्रूयते सा तदानीं ब्राह्मीति गीयतेस्म। तस्माद् वेदो हि मूलम् अस्याः। ये वै आर्याः, सरस्वती तथा दृषद्वतीति नदी-द्वयस्य तीरभूमिषु अभिजातास्तेषां वेदविद्यासु सम्यक् परिदृष्ट्या क्रिया-कलापेषु च कुशलतया तत्तत्स्थानेषु इयं ब्राह्मी विदिताऽसीत्। अथ यदा कुरुक्षेत्रादिविभिन्नदेशेषु ते किल प्रसृतिं लेभिरे तदा एषा भारतीति नाम्ना ख्यातिमाप।

अधुना या संस्कृतभाषा आख्यायते, ब्राह्मी हि मूलं तस्या अपि। इयं ब्राह्मी किल भारतेषु गृहमेधिनां तथा तपोवनेषु ऋषीणां च व्यवहार-कारणं बभूव। अहो! महर्षिकुले सञ्जाता अपि वयम् अधुना नितरां दरिद्रतया न जानीमः किं स्विद् अस्माकं ध्येयं किमुत वा हेयमिति। ततो हि दिवसाद् दिवसम् अधिगच्छामो निम्नतरां स्थितिं परिवर्तमानस्य जगतः। अस्य किं प्रतिषेधकं तच्चिन्त्यं मनीषिभिः। यद्धि युगे युगे विवर्तनं परिदृश्यते कालचक्रस्य तत्र केचिदूर्द्धं केचिच्चाधो विलोड्यन्ते। का बाधा विधिशेषाणाम्? तद् य इह रमणीयचरणा रम्यां योनिमापद्येरन्, ये ह वै तद् आत्मानम् अभिजानन्ति पूर्वजन्मनां सुकृतिबशात् ते हि पराभवकारणम् आपादयन्ति तदितरेषाम्।

एषा हि नियतिः, कालप्रवाहो वा विश्वनियन्तुः। अहो! धिग् नो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दरिद्रतां यत सर्वरत्नाकरस्य हिरण्यगर्भस्य पटच्छायाम् अधितिष्ठन्तोऽपि वयम् न विद्मस्ततत्कारणं ततोऽस्माकं स्वपदच्यवनं परिलक्ष्यते ।

भोः, भोः, ब्राह्मणमानिन् ! सम्भूय समुत्तिष्ठ । स्वात्मानं प्रबोधय । एतां ब्राह्मीं विद्धि । एनाम् एव सततम् उपास्स्व ।

इयं हि नो ब्रह्मगुहां प्रविश्य सञ्चितमलं च विधूय पुनरग्निस्फुलिङ्ग इव निर्गच्छति सह मनसा वाक्सरणीं समारुह्य ।

यो हि एनां वेत्ति अग्निर्वै स भवति । अग्निर्यथा दारु प्रविश्य तन्मयस्तथा हि स एषु लोकेषु । अविदित्वा वै एनां स याति अधोऽधोलोकान् ।

स वाव ब्रह्मविदां वरिष्ठः यो ब्राह्मीं वाचं किल लभते । एतस्यां नु वाचि खलु सर्वा वै विद्याः प्रहिताः स्युः पूर्वसूरिभिः । एनां तु लब्ध्वा नहि कश्चित् शोचति किं नु मयाऽसाधु कृतम् ? किं वा न साधु ?

एषा हि विधृतिर्लोकानां या तु ब्रह्मविद्भिरभिष्टूयते । इति शं प्रार्थये भवतु नः ॥ इति ।

एधि भवन् ब्राह्मीं वाचं शृणु । को वै जानाति तत्कारणं येन हि इदं विश्वं विततम् अग्निरिव दाहेन ।

अथ यदि तत्र विविदिषा जायते, वाचः खलु संयच्छ, स्वात्मानं सन्धत्स्व कोऽयम् अस्मि इति । तथा हि वाक्यं भवति । अहं खलु सत्यं वदेयम्, मिथ्या खलु न वदेयम् । विषयस्तु विषवद् वर्ज्यो यावद् विद्या न जायते तावत् स एव निपातयेद् विद्यार्थिनं महाव्रताद् ।

यो यस्य वै तद् आत्मानम् अभिजानाति स किल ब्रह्मस्वरूपतां विन्दते ।

लोका वै तम् अनुधावन्ति कोऽसौ ? कोऽसौ ? कस्य कुले ह जातस्तत्रभवान् । एधि भगवन् मा गाः, अस्मान् त्रायस्व त्रायस्व इति ब्रुवाणाः । ये ह वै न जानन्ति ते शश्वत् शोशुच्यन्ते हा हताः हा हताः स्मः । आहुश्च किं स्विद् वयं कर्त्तारः, किं स्वित् श्रोतारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। अथ यस्य हि जन्मान्तरीयं ततकृतपुण्यम् फलाभिमुखं भवति स इमां ब्राह्मीम् अभिजिज्ञासितुं तद्वेत्तारं याचते। यथा ज्वलच्छरीरः सहसा जलाशयमन्तरा प्रविविक्षुः सर्वं महामूल्यं रत्नभूषणं परित्यज्य जलम् एवानुसन्धत्ते केवलम् एवं हि स, तद्गुरुं श्रुतिसम्पन्नम् अभिजिज्ञासते। स्मरति च इयं हि ब्राह्मी यत्र निहिता ह वै आत्मविद्या विदुषां प्रतिपत्तये। मनीषिभिर्हितः पन्था नान्यः कश्चन विद्यते।

य एष उ तद् आत्मानं साधु कर्मणि योजयति सुकृतं तस्य फलं भुङ्क्ते। अथ दुष्कृतं वा स एव असाधुकर्मणा। एवं यदि स ब्राह्मीशुश्रूषया गुरुकुले सतीर्थैः सह द्वादशसंवत्सरान अभिनिर्वर्तते, तर्हि आप्तकामः स ब्रूते—सोऽहमस्मि, सोऽहमस्मि इति। अपि च अहम् वै अग्निरस्मि अस्य लोकस्य सन्दीपयिता, कृतं ह वै मया सर्वं यत्तु कर्त्तव्यम्, ज्ञातं वै मयाऽस्ति यत्तु ज्ञातव्यम्, प्राप्तं हि मया यल्लोकेषु प्राप्तव्यमस्ति। इति शं भवतु नो विद्यार्थिनाम्।

एधि भवन्मा त्यक्षीः पन्थानम् येनास्माकं पितरो ह याताः स हि पन्थाः श्रेयान्। न जातु पितृगौरवमपास्यति कश्चन बुद्धिमान्। भोः सौम्य, महतः पुत्रो महीयान् भवान् अपि विद्यया स्वपदवीमालभेत। न जातु गन्तुम् अर्हति भवान् अनार्यजुष्टमार्गेण। भोः, संशृणुध्वम् भूदेवाः। यदि वयम् हिताहितकर्मसु विचारदक्षा न भवेम केन खलु वयम् अहितम् अत्ययाम ?

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरभारतीदशाविमर्शः

[निबन्धकः—श्रीवटुकनाथभट्टाचार्यः एम् ए. वि एल.]

जानन्त्येव भवन्तोऽधुना वङ्गेषु परिशोच्यां संस्कृतविद्याया दशाम्। प्रमाणञ्चेत्तत्रापेक्ष्येत, वामनस्य प्रांशुलभ्यफललिप्सोरुद्बाहुत्वमिव, माद्दशस्यैष प्रयास एव तत् सुष्ठु प्रकटयेत्। भारतीयजनानां चेद्विद्यते किमपि वस्तु गौरवास्पदं, चतुःषष्टिकलाकलापालङ्कृतं चतुर्दशविद्योपबृंहितं संस्कृतवाङ्मयमेव तदिति निःशङ्कं ख्यापयितुं शक्यते। परन्तु कालप्रभावात्, ख्यात्या गुणैर्विभवैश्चाढ्यानां तथानादरात्, भीतभीतेव गृहकोणमात्रशरणेव, ह्रीवशादवगुण्ठितसर्वावयवा कुलयोषिदिव सैषाधुना संस्कृतभारती कथं कथमपि प्राणान् धारयति। वेदेषूद्भवो यस्याः, वाल्मीकि-कृष्णद्वैपायनकृतपुराणेषु क्रीडामयं यस्याः शैशवम्, भास-कालिदास-भवभूति-श्रीहर्ष-माघकवीनां महाकाव्यरूपकनिबन्धेषु सावलीलं यस्या नृत्यं हरति प्रसभं चेतांसि सहृदयानाम्, राजर्षिजनकादिसभासु विचारयन्त्यद्वैतत्वम्, धर्माधिकरणेषु निर्णयन्ती व्यवहारपदानि, नैमिषाद्यरण्येषु वसिष्ठाद्याश्रमेषु च ध्यायन्ती परमं तत् पदम्, देवायतनेषु स्तुवन्ती हरिहरहेरम्बादिदेवगणम्, या पुरा विरेजे गौरवमयी—विलोकयतस्तस्या अवस्थामिदानीन्तनीं न दूयते कस्य वा चेतः सचेतसः। सत्यामपि निखिलेऽधुना भारतवर्षे संस्कृतभारत्या एवमवस्थायाम्—अन्तिमकोटिमधिरूढा वराक्या दशाऽस्मद्देशेषु, स्पष्टमेवैतत् परिदृश्यते।

अङ्ग-वङ्ग-कलिङ्गेषु सौराष्ट्र-मगधेषु च।
तीर्थयात्रां विना गच्छन् प्रायश्चित्तेन शुध्यति॥

इति यत् स्मर्यते, बहोः कालादार्यनिवासविस्तारात् तदस्मद्देशेष्वासीदलब्धावसरमेव। परन्तु कालेऽस्मिन् प्रवर्तमाने पुनरपि सर्वथा तदक्षरशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोगमर्हतीति क्लिश्यन्त्येव मानसानि संस्कृतविद्यानुरागिणाम् आर्यगौरवानुध्यानपराणाम्। चिरादेवाक्षिप्यते स्म संस्कृतभाषया नालापक्षमा विद्वांसोऽपि वङ्गीयाः। प्रचलति च परिहासवचः—"अस्माकूनां नैयायिकेषामर्थनि तात्पर्यं शब्दनि कश्चिन्ता"। अधुना पुनस्तदस्माकमपाटवम् उत्तरोत्तरं वर्द्धत एव। गतासुरेव सुरभारतीति भणन्ति केचन शाब्दिकाः। परन्तु वाग्मिप्रवराणां गोवर्द्धनमठाधीशानां श्रीमद्भारतीकृष्णतीर्थमहोदयानाम् अन्येषामपि शङ्कराचार्यपदभाजां पीठाधिष्ठितानां स्वामिपादानां तथा वङ्गेतरप्रदेशीयानां विदुषां निपीयते कर्णरसायनं यदा वचोवैभवं तदाऽयं मृतापवादो जनन्या वितथ एवेत्यनुभूयते। अद्यापि जम्बूद्वीपनिवासिनां पञ्चत्रिंशकोटिमितानाम् अन्तः संख्यया, सम्पदा, विद्याचारित्रादिगुणमहिम्ना च वर्तते प्राधान्यं वर्णाश्रमधर्माभिमानिनामेव। एतेषामाजन्ममरणान्तं संस्कारकर्मसु, दैवपैत्र्यानुष्ठानेषु, दीक्षा-प्रायश्चित्तादिषु च प्रतिपाल्यन्ते शास्त्रोपदिष्टा इतिकर्तव्यताः, मन्त्राश्चोच्चार्यन्ते श्रुतितन्त्रपुराणाहृता देवभाषामयाः। ये पुनस्तावद् भावाः प्रतिनियतं जनमानसेषु स्फुरन्तो दुःखेषु तान् सान्त्वयन्ति, सुखेषु संस्कृतेरनित्यतां स्मारयन्ति, परितापं शमयन्ति, शमनभयं वारयन्ति—रामायण-महाभारत-भागवतादिपुराणेभ्यो गोतोपनिषद्भ्यः, संस्कृतकाव्यनाटकादिग्रन्थेभ्यो महापुरुषरचितस्तवेभ्यः, श्रीमच्छङ्कराचार्य-भर्तृहरिप्रभृतिप्रणीतवैराग्यश्लोकनिवहेभ्य एव समुद्भूतास्ते संस्मर्यन्ते। एतद्देशीयजनगणमनोबद्धमूलस्य कृति-क्षमादिदशलक्षणस्य धर्मस्य, प्रेमभक्तिप्रपत्तिरूपोदात्तवृत्तिनिचयस्य तथास्तिक्यस्य बीजानि संस्कृतवाङ्मये निहितान्येवेति न केनापि विसंवदितुं शक्यते।

न वयमधुना सम्यगुपलभामहे कोदृश आसीत् संस्कृतविद्याया विभवः समृद्धिश्च व्यतीतेऽनतिदूरेऽपि काले। कीरैरिवास्माभिरुच्चार्यते प्रायशोऽशेषसम्पत् खलु सुरभारतीति। परन्तु विहाय कतिचन संस्तुतान् विषयान्, न प्रसरति दृष्टिरस्माकं विषयान्तरेषु, न वा लगतेऽस्माकं मानसं तेषु। न सम्यगस्माभिः पार्यते धारयितुं यत् सत्यमेव कृतघ्नो हि लोको

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्धिमतां धियो विषयः। श्रूयते तावदासन् पण्डितप्रकाण्डाः अचिर-प्रस्थिते समये ये खलु न केवलं व्याकरण-साहित्य-स्मृति-मीमांसा-न्याय-दर्शनेषु परन्तु सर्वेष्वेव विषयेषु लौकिकालौकिकप्रयोजनसाधनेषु प्रकटया-मासुः परमं नैपुण्यम्। अत्रोदाहरणमधिगतं पितृचरणेभ्यः किञ्चनो-पाहरामि। आसीद्वाराणस्यामविच्छिन्नविद्वत्सम्प्रदायसमुद्भासितायां सकल-विद्याविलासस्थल्यां साक्षात् परापरतत्त्वाकरहरपुर्यां कश्चिद्विपश्चिद्धुरीणो-ऽहोबलनामा। अथैकस्मिन अहनि स ददर्श पथि समासीनं पादुका-रचनानिरतं कञ्चन चर्मकारं बहुनायासेनापि चर्मशकलद्वयं योजयितुम् अशक्नुवन्तम्। लक्ष्यीकृत्य वितथमस्यासकृत प्रयत्नं समुपसृत्यैनम् ऊचे कुशाग्रधियाऽहोबलेन—एवं प्रकारेण प्रयोज्या सूची, दद्भ्यां धारणीयञ्च चर्म-शकलयुगलम्। यथोपदेशम् आरब्धं सीवनमनेन चर्मकारेण लब्धञ्च श्रम-साफल्यमनायासेनैव। अथापरेद्युः उपागमदयं काशीनरेश-प्रासादं मध्याह्न-समये। कृष्णकायः शीर्णतनुरपि विपश्चिदयं परं सम्मानभागासीद् राजकुले। उपस्थितमात्रो राजसकाशं त्वरितं नेतव्यः—प्रागेवैवं प्रददेऽनुज्ञा काशीनरेशेन गुणपक्षपातिना। तामनुसृत्य भृत्या एनम् अन्तःपुरे भोजन-व्याप्रतस्य राज्ञः सकाशं निन्युः, आसनञ्च परिग्राहयामासुः। तत्रो-पविष्टोऽहोबलशर्मा निपुणं लक्षयामास केन क्रमेण नरेन्द्रेण उपयोगोऽकारि अन्न-व्यञ्जन-पिष्टक-लड्डुक-पायसादीनां चर्व्यचोष्यलेह्यपेयानाम्। परि-समाप्ते चाह भूपतेर्भोजनव्यापारे "नायं समीचीनो भवद्भिरनुसृतः क्रमः—न वा पाकशास्त्रानुमतः। "कथं वा भवितुमर्हति" इति सकौतुकं पप्रच्छ नरपतिः। अहोबलेन प्रत्युक्तम्—यदि तावदनुमन्येत महाराजेन स्वयमेवा-गत्यैकस्मिन्नहनि निष्पाद्य पाकप्रक्रियां निर्देक्ष्यामि कथं वा विभिन्नपदानां युज्यते ग्रहणम्। ओमित्याह स्मितवदनो राजा। अथावधारिते वासरेऽहोबलेन यथोक्तं चक्रे। तन्निर्देशानुसारतः सम्पाद्याहारव्यापारं लब्ध्वा च परमं परितोषभरम् अगमत् परां कोटिं विस्मयस्य काशीनरेशः, विभवहीनस्य शास्त्रव्यसनिनो विद्वद्वरस्य शाकान्नभोजिनो बहुध,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशशंस च राज्ञोपयोगिनानापदसंयुतपाकक्रियानैपुण्यम्। साम्प्रतमपि प्रतीच्यरीत्याऽधिगतविद्या जिज्ञासवो जना अत्रत्या अनत्रत्याश्च सङ्गीत-स्थापत्य-चित्र-किमिति-विद्या-सूल्यायुर्वेदप्रभृतीनधिकृत्यानेकान् विषयान्, ईहन्ते भारतीयप्रज्ञाफलान्याहर्तुम्—भवन्ति कृतकृत्याश्चाविष्कृत्य बहूनि तत्त्वान्यनर्घ्याणि। सार्द्धशताब्द्याः पूर्वम् आधुनिकविचित्रयन्त्रादीनाम् आविष्कारात् प्राक् सर्वेष्वेव पृथ्व्यामवस्थितेषु देशेषु प्राच्येषु प्रतीच्येषु च व्यवर्तत समैवावस्था। नासन् वाष्पीययानानि, नोत्पेतुर्नभसि विमानानि, न तडिच्छक्त्या सन्देशप्रेषणं स्थानात् स्थानान्तरगमनं वा सम्बभूव। राष्ट्रेषु चासीद् राज्ञामनियन्त्रिता प्रभुता सर्वतोमुखा। तदानीं शिल्प-कलाज्ञानविज्ञानदर्शनधर्मादिषु व्यराजत सर्वोपरि भारतवर्षमेव। प्रदीपः सर्वविद्यानां भेत्ता च सर्वतमसां संस्कृतभाषानिबद्धः शास्त्रसमूह एवासीत्। आनर्ह च विश्वकोषपदवीं यथार्थतो वाङ्मयम् एतदेव। सर्वथा प्रमाणीक्रियते स्म च मनुवचनम्—एतद्देशप्रसूतस्य सकाशादग्र-जन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ इति।

येयं संस्कृतविद्याया उपवर्णिताऽवस्था मया, सा कथमापतिता, प्रति-कार्या वा सा नवा—तदधुना सुधीभिरवधेयम्। उच्यते हि—राजा कालस्य कारणम्। वर्तत चेद्राजपुरुषाणामाग्रहो देवभाषाप्रोत्साहने—तदैवमवस्था नैवापतिष्यदिति स्फुटम्। परन्तु अस्माकमनुपचीयमान-मौदास्यम् अघटयदेनां दशामित्यपि स्वीकार्यम्। न विद्यते संस्कृतविद्यायां पाश्चात्त्यानां समादरलेश इति न। वेदादिनानाग्रन्थमुद्रापणे, तन्मर्म-प्रकाशने च को वा न जानाति प्रतीच्यानां प्रयासप्राचुर्यम् अर्थव्यये चाकार्पण्यम्। त एव प्रवर्तमाने काले वर्त्मकर्षकाः, वयं पुनरधन्या गतानु-गतिकाः। परन्तु प्राचीननिबन्धेभ्यो नानानर्घ्यरत्नाहरणे यादृगेतेषाम् अभिनिवेशो न तावद् अधुना लोकेषु संस्कृतशिक्षायाः प्रसारे विस्तारे वा। अथवा न तत् सम्भवति, न च सङ्गच्छते मानवप्रकृत्या। अपि च स्वजातीयैः कर्तव्ये कर्मणि विजातीयानां साहायकं लाघवमेव व्यनक्ति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिथिलयति च पुरुषकारम्। परन्तु परिहाय राष्ट्रप्रदत्तं साहायकमवगणय्य वा तल्लोकशिक्षा प्रसरितुं क्षमते—नैतत् कुत्रापि कदापि वा दृष्टचरम्। संस्कृतेतरविद्याविस्तारे, तत्प्रोत्साहने च भारतीयानां राजपुरुषाणां विशेषतो वङ्गदेशीयानां यादृगानुकूल्यं न तादृक् संस्कृतविद्यापरोक्षणे इति—वार्ताबहपत्रपाठकानां सुविदितमेव। प्रवर्तिताऽस्मद्देशेषु नवीना शासनव्यवस्था—समर्पिता प्रकृतीनां करेषु राष्ट्रपरिचालनोपयोगिनी प्रभुता सर्वतोमुखा, उपाहृतं राजपुरुषैः श्वेतद्वीपनिवासिभिर्भारतीयेभ्यः स्वाराज्यमेवम् उद्घोष्यते दिशि दिशि वार्ता तावदुल्लासकरी। प्रदेशान्तरेषु प्रजातन्त्रोपनाम परिवर्तनमिदं राष्ट्राधिकृतं कथमनुभूयते जनैः, प्रजानां दुःखाय सुखाय वा तत् परिणंस्यते—नेति ज्ञायते। परन्तु गौडमण्डलेऽस्मिन् स्वराज्यप्रवर्तनात् संस्कृतविद्यायाः परिपोषो भवितेति आशासितुं न शक्यते अनिमीलितनेत्रेण, अस्तब्धबुद्धिना वा केनापि। माध्यन्दिनदिनकरमरीचिजालमिव प्रोज्ज्वलं पुरतो भाति कारणम्। वङ्गीयव्यवस्थापकपरिषदि न हिन्दूनां परन्तु तदितरेषामेव बाहुल्यं सदस्यानाम् प्राधान्यञ्च। ग्रामेऽस्मिन् मुषलोदूखलसंघाते संवृत्ते, न सम्भवति ग्रामान्तरीयाणां शिरोवेदनम्। संस्कृतशिक्षाप्रसारो वर्णाश्रमिणामेव कल्याणाय कल्पितुमर्हति। तेषामेव युज्यते संरक्षणे विस्तारे चैतस्याः स्वाभाविकोऽभिनिवेशः न तु भिन्नधर्मावलम्बिनां भाषान्तरेण निर्वाहितसंलापादिकर्मकलापानां विजातीयानाम्। अथ यदुच्यते गण्डस्योपरि विस्फोटकस्तस्यैव दृष्टान्ततां भजते वङ्गभूमिः। मण्डलान्तरापेक्षया विरलतर एवासौ प्रदेशेऽस्मिन् संस्कृतविद्यायाः प्रसारः। अधुना पुनरुपचीयमानो राजपुरुषाणामनुग्रहाभाव एव सम्भाव्यते। किं करोतु, विपदनुवर्तिविपज्जालैः परिगता मन्दभाग्या सेदानीम्—एतदेव तद्रसिकानां कथयति मर्माणि। को नामोपायोऽवलम्बनीयस्तस्याः सञ्जीवनाय, संरक्षणाय चेति भवद्भिरन्यैश्च निपुणमवधार्यतां विद्वद्भिः। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्ममीमांसा

(पूर्वानुवृत्ता)

[निबन्धकः—श्रीगोपालकृष्णवेदान्ताचार्यः, एम. ए]

यानानां ये च वोढारस्तेषाञ्च परिचारकाः।
शूद्रवृत्त्या तु जीवन्ति न क्षात्रं धर्ममाचरेत् ॥ इति।

'द्विजत्वं प्रतिषिध्यत' इति सूतानां पुराणेष्वधिकाराद् उपनयनाभावेऽपि द्विज इत्यभिधानं भवति, रथकाराणान्तु मातुश्चौर्यदोषात् पुराणेऽप्यधिकाराभावः द्विज इत्यभिधानप्रतिषेधश्च इत्यर्थो विज्ञापितः। श्रवणे तु दोषो नास्त्येव। अयन्तु रथकारो याज्ञवल्क्योक्तान्माहिष्यात् करण्यामुत्पादिताद्रथकाराद् भिन्न एव। उपनयनसंस्कारेण तस्य द्विजत्वप्रतिपादनात्, अस्य तु द्विजत्वप्रतिषेधादनयोरुत्पत्तिप्रकारभेदाच्च। यानानां वोढारस्त्वत्र सूता एवाभिधीयन्ते सूतानामश्वसारथ्यमित्यनेन मनुना तेषां वृत्तिकथनात्। तेन सूतानां परिचर्यैवैषां वृत्तिरिति। मागधजात्युत्पत्तिं वृत्तिप्रकारञ्चाहोशना यथा—

ब्राह्मण्यां वैश्यसंसर्गाज्जातो मागध उच्यते।
वन्दित्वं ब्राह्मणानाञ्च क्षत्रियाणां विशेषतः।
प्रशंसावृत्तिको जीवेद् वैश्यप्रेषकरस्तथा ॥

चाण्डालजातेर्वृत्तिमाह स एव यथा—

ब्राह्मण्यां शूद्रसंसर्गाज्जातश्चाण्डाल उच्यते।
सीसमाभरणं तेषां काष्णायसमथापि वा ॥
वध्रीं कण्ठे समावध्य भल्लरीं वापि कक्षतः।
मलापकर्षणं ग्रामे पूर्वार्द्धे परिशुद्धिकम् ॥
नापराह्णे प्रविष्टोऽपि बहिर्ग्रामाच्च नैर्ऋते।
पिण्डीभूता भवन्त्यत्र नो चेद् वध्या विशेषतः ॥ इति।

वैश्यात् क्षत्रियायामुत्पादितानामायोगवादीनां वृत्तिमाहोशना यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नृपायां वैश्यसंसर्गादायोगव इति स्मृतः ।
तन्तुवाया भवन्त्येते वसुकांस्योपजीविनः ।
नृपायां वैश्यतश्चौर्यात् पुलिन्दश्चेति कीर्तितः ।
पशुवृत्तिर्भवेत् तस्य हन्याद् वा दुष्टसत्त्वकान् ॥

इति । पुक्कसादिजातेर्वृत्तिमाह स एव यथा—

नृपायां शूद्रसंसर्गाज्जातः पुक्कस उच्यते ।
सुरावृत्तिं समारुह्य मधुविक्रयकर्मणा ।
कृतकानां सुराणाञ्च विक्रेता पाचको भवेत् ॥ इति ।

कृतकानां गुडशर्करादीनामित्यर्थः । एवञ्च नृपायां शूद्रतश्चौर्याजातो रजक उच्यते इति । वैदेहकादीनां वृत्तिमाहोशना यथा—

वैश्यायां शूद्रसंसर्गाज्जातो वैदेहकः स्मृतः ।
अजानां पालनं कुर्यान्महिषीणां गवामपि ॥
दधिक्षीराज्यतक्राणां विक्रयाज्जीवनं भवेत् ।
वैश्यायां शूद्रतश्चौर्याज्जातश्चक्रीच उच्यते ॥
तैलपिष्टकजीवी तु लवणं भावयेत् पुनरिति ।

तैलपिष्टकजीवीति तिलसर्षपादिपेषणेन जीवन्तीत्यर्थः । भावयेदुत्पादयेत् । वृत्तिसाम्येऽपि वैदेहकेभ्यो गोपा भिन्ना एव उत्पत्तिप्रकारवैषम्यात् । तथाच गोपानामुत्पत्तिप्रकारमाह पराशरो यथा—

क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः ।
स गोपाल इति ज्ञेयो भोज्यो विप्रैर्न संशयः ॥ इति ।

उग्र-गोपालजात्योरेकत्वेऽपि वृत्तिभेदात् संज्ञाभेद इति मन्तव्यम् । वर्णासु सङ्करजातिभ्य उत्पन्नानामपि वृत्तिमाहोशना यथा—

सूताद् विप्रप्रसूतायां सुतो वेणुक उच्यते ।
नृपायामेव तस्यैव जातो यश्चर्मकारकः ॥
चाण्डालाद् वैश्यकन्यायां जातः श्वपच उच्यते ।
श्वमांसभक्षणं तेषां श्वान एव तु तद्धनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयोगवस्य विप्रायां जातास्तान्नोपजीविनः ।
तस्यैव नृपकन्यायां जातः सूनिक उच्यते ॥
सूनिकस्य नृपायान्तु जात उद्बन्धकः स्मृतः ।
निर्णेजयेयुर्वस्त्राणि अस्पृश्याश्च भवन्त्युत । इत्यादि ।

मनुः सामान्येनैषां वृत्तिमाह यथा—

सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम् ।
वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ॥
मत्स्यघातो निषादानां त्वष्ट्रिस्त्वायोगवस्य च ।
मेदान्ध्रचुञ्चुमद्गूनाम् आरण्यपशुहिंसनम् ॥
क्षत्तृव्रपुक्कसानान्तु विलौकोवधबन्धनम् ।
धिग्वनानां चर्मकार्यं वेणानां भाण्डवादनम् ॥
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च ।
वसेयुरेते विज्ञाना वर्तयन्तः स्वकर्मभिः ॥
चण्डालश्वपचानान्तु बहिर्गामात् प्रतिश्रयः ।
अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभम् ॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ।
काष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥ इत्यादि ।

त्वष्टिः काष्ठतक्षणम् । चुञ्चुर्मद्गुश्च वैदेहकवन्दिस्त्रियोः ब्राह्मणेनोत्पादितौ बौधायनोक्तौ । वन्दिस्त्री च क्षत्रियेण शूद्रायामुपादिता बौधायनोक्ता ज्ञेया । विलौकवधबन्धनमिति विलनिवासिगोधादिवधबन्धनमित्यर्थः । विज्ञानाः विज्ञातिचिह्नं धारयन्त इत्यर्थः । भिन्नभाण्डेषु भग्नपात्रेषु अपपात्रेषु वा । परिव्रज्या भ्रमणशीलत्वम् । एकस्मिन स्थाने बहुदिनानवस्थानमित्यर्थः । विस्तरस्तु उशनआदिस्मृतिषु द्रष्टव्यः । इति ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀नाट्यविलासः

[निबन्धकः—वि. ए.-व्याकरणतीर्थोपाधिक-श्रीदेवीप्रसादगुप्तः]

त्रिलोकपालिकां वन्दे पुरारिहृदयप्रियाम् ।
राकाचन्द्रप्रभासारां त्रिपुरां देवतां गिराम् ॥१॥

अयि सकलकलासु प्रौढलीलाविलोला
विविधबुधकुलेन्द्राः ! काव्यलक्ष्मीप्रियाश्च ।
मधुररसविलासे साम्प्रतं रूपकाणां
सततसदयचित्ताः कर्णमत्रैव दत्त ॥२॥

ऋचः साम्नः सारं सरसमपि चाथर्वणं याजुषञ्च
समाकर्ष कर्षं नवविरचितः प्रीतये देवतानाम् ।
रसैः सान्द्रः सोऽयं भरतमुनिना पावनो नाट्यवेदो
हरन् नित्यं पूतं सहृदयमनो मङ्गलं नो विदध्यात् ॥३॥

वाणीं प्रणम्य त्रिपुराभिधानां सतां मुदे नाट्यविलासमेतम् ।
देवीप्रसादाद् विदुषां विधेयो देवीप्रसादो विदधाति गुप्तः ॥४॥

नाट्यं केऽपि यमीयमादिविषयात् संवादसूक्तात् परे
यज्ञाङ्गाच्च महाव्रतादिविधितः प्राहुः पुराऽजायत ।
यद्रामायणभारतादिषु तथा पातञ्जले दृश्यते
केचित् पुत्तलिकाप्रदर्शनमिदं सन्दर्शयन्त्युक्तिभिः ॥५॥

इदं तदिह रूपकं दशभिरेव रूपैर्युतं
चिराद्धरति मानसं रसविदां सतां सन्ततम् ।

---

* कलिकाताविश्वविद्यालयसंस्कृतसमितेः द्वितीयाधिवेशने पठितोऽयं प्रबन्धः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रथितकीर्तयः कविवृषास्तु पृथ्वीगताः
क्रमेण समयादिभिः प्रकलिताः सुसंक्षेपतः ॥६॥

भरतः

सुरसरस्वति ! कः कुसुमाञ्जलिः प्रथमरूपकपुष्पचयैः कृतः ।
त्रिपुरदाहडिमो न विराजते मुनिवरो भरतस्तु चकार यम् ॥७॥
ततस्तु ते ते कृतिसेवकाः कति प्रपूजयामासुरिदं पदाम्बुजम् ।
न तद्विजाने जननि ! प्रभुर्नवा चिरात् प्रभृत्यस्मृतनामकीर्तने ॥८॥

अश्वघोषः (A. D. 78)

अयमुदयति पूर्वं बुद्धभक्तोऽश्वघोषः
शकनरपतिवर्षाच् श्रीकनिष्कस्य मित्रम् ।
कावरतिरतिहीनः शिक्षयन बौद्धधर्मं
'क्षयमयति हि कार्यं कारणध्वंसमात्रम्[1]' ॥९॥
'तस्थौ नापि ययौ न' यः कविवरो नन्दो[2] यथा रीतिषु
नो वा दर्शितवांश्च 'बुद्धचरिते' प्रौढेः परां चातुरीम् ।
'सारीपुत्र'कथाङ्कितं 'प्रकरणं' तद्धेलया खण्डितम्
नोपेक्ष्या प्रतिभान्वितोऽस्य कविता 'वज्रस्य[3] सूची' यथा ॥१०॥

भासः (about A. D. 300)

ललितमधुरहासो भाति भासो भवत्या
धवलितधरणीकां धारयञ्छुभ्रकीर्तिम् ।
जयति जगति वह्निक्षेपणादप्यदग्धा
द्विगुणितशुभकान्तिर्नाटिका स्वप्न[4]पूर्वा ॥११॥

---

1. सौन्दरानन्द XVI, 25 2. सौन्दरानन्द III, 42
3. वज्रसूची । (यथा वज्रसुचीं नापलपितुं शक्या तद्वदश्वघोषस्यापि रससान्द्रा कविता ।)
4. भासनाटकचक्रेऽपि च्छेकैः क्षिप्ते परीक्षितुम् ।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥ [राजशेखरः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भानोः करोऽप्युदयनं चलितस्य कान्तां
पद्मावतीं सपदि न स्फुटयाञ्चकार[1] ।
यत् साम्प्रतं स खलु वासवहस्तदत्तै-
राच्छादितो घनघनैर्विरहार्तिभिर्वा ॥१२॥
त्रयोदशानां तव नाटकानां स्थितिर्विरुद्धा न हि साऽभविष्यत् ।
अपाहरिष्यद् यदि तं न विघ्नं पतिर्गणानां स्वयमेत्य भूमौ ॥१३॥

शूद्रकः (B. C. 500 ? probably 3rd. Cent. A. D.)

तव तनयवरोऽयं शूद्रको रुद्ररूपो
विविधरसविचित्रं ताण्डवं लास्ययुक्तम् ।
कृतशकटिक[2]लीलो बालगोपालवद्वा
सकलशठचरित्रं स्पष्टमाविश्चकार ॥१४॥
चूताङ्कुरे राजति चारुदत्तः करः शरेऽयं मकरध्वजस्य ।
वाताः प्रवान्त्येव वसन्तसेना धूताः प्रवालैः सह कामिसार्थाः ॥१५॥

कालिदासः (380-455 A. D.)

कविकुलपतिरेष प्राभवत् कालिदास-
स्तरुणसुरगिरोऽयं मान्मथो वा विलासः ।
शकनृपतिशताब्दे गुप्त[1]गुप्ते चतुर्थे
समदमदनलीलां पप्रथे कान्तवृत्तः ॥१६॥
काव्यादर्शे स हि दिनपतेरन्वयो नाशहीनः[2]
स्कन्दः प्रीत्या कुसुमरचनैर्मन्दमन्दं प्रवृष्टः ।
लब्धा कान्ता ललितकविता ब्रह्म साक्षात्[3] कृतश्च
कस्तत्तुल्यो विरहिसुहृदां सर्वगो मेघदूतः ॥१७॥

(क्रमशः)

---

1. स्वप्नवासवदत्तम् IV 4
2. मृच्छकटिकम्
3. चन्द्रगुप्त II
4. रघुवंशः ।

1. मेघदूतः I 47 तत्र स्कन्दं etc. अत्र चन्द्रगुप्तपुत्रः स्कन्दगुप्तो ध्वन्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धव्यवहारः

सुचिरं प्रोष्य प्रत्यागतस्तरुणः कश्चन ब्राह्मणकुमारः कुलवृद्धम् अभिवादयितुं प्राप्तः। अविरतज्वरेण कृशतनोरस्य द्विजसूनोर्वदनमण्डलमलङ्कुर्वद् वर्तमानं विशालं गुम्फगुच्छयुगलं वृद्धस्य दृष्टिं नात्यक्रामत्। प्राचीनभावानुबद्धहृदयो वृद्धस्तमागतं कृतप्रणाममाशिषा संवर्ध्य प्रावोचत्—आयुष्मन, अपि कुशलं ते, दिष्ट्या बहोः कालात् परं दृष्टः श्रीमान् आशिषमाशासानैरस्माभिः, कच्चित् क्षेमेणातिवर्तितस्ते प्रवासकालः ?

युवा सविनयमवादीत्—आर्य, कुशलं मे प्रायः सर्वत्र युष्मत्प्रसादात्, परं कियन्ति वर्षाणि यावदविरतप्रवर्तिना ज्वरेणातितप्तस्य मे सम्पद्यमानमपि सुखान्तरं न क्षमते मनसस्तोषमुत्पादयितुम्।

वृद्धः—(अङ्गुल्या गुम्फं निर्दिश्य) अपि नाम कोऽप्युपशमः समसादितः सन्तापस्य श्रीमता वदनमण्डलमण्डनायमानेनामुना वस्तुविशेषेण ? *

---

* पञ्चाशद्वर्षेभ्यः पूर्वमपि विगीत आसीच्च श्मश्रु विनाकृतो गुम्फो वङ्गीयब्राह्मणसमाजेषु, विशेषतो ग्रामेषु। परतश्च नगरप्रवासादिना नामशेषोऽपि स नियमो ग्रामेष्विदानीमपि पदं करोति। अत एव नगरप्रत्यागतो युवा वर्षीयसा ग्रामवृद्धेनैवं कुलतस्तिरस्कृतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थनिकषः

कारकचक्रम् श्रीमद्भवानन्दसिद्धान्तवागीशप्रणीतम्, श्रीमन्माधवतर्कालङ्कारविरचित "माधवी" ति प्रसिद्धटीकया सहितम्। कलिकातास्थराजकीयसंस्कृतमहाविद्यालयन्यायशास्त्राध्यापक-श्रीयुततारानाथन्यायतर्कतीर्थकृतटीप्पनीवङ्गानुवादाभ्यां समुपेतम्। वाग्वाजार-निवेदितालेनस्थित २०।१ संख्यकच्छात्रपुस्तकालयात् प्रकाशितम्,। मूल्यं सपादरूप्यकम्।

नैयायिकमूर्द्धन्या भवानन्दसिद्धान्तवागीशभट्टाचार्याः सुविख्यातन्यायनिबन्धकर्तृणां जगदीशतर्कालङ्कारपादानामध्यापका आसन्। जगदीशतर्कालङ्काराः खलु गदाधरभट्टाचार्यचरणानामभ्युदयारम्भसमये प्रवीणे वयसि वर्तमाना नवद्वीपं भूषयामासुरिति नैयायिकसम्प्रदायपारम्पर्यविदां प्राचीनन्यायाध्यापकप्रवराणां चरणसरोजसेवावसरे तेषां वदनकमलेभ्यः समाकर्णितम्। एवं च शब्दशक्तिप्रकाशिकाव्युत्पत्तिवादादिग्रन्थेभ्यः पुरातनोऽयं ग्रन्थः सरलसरलया भाषया निबद्धः शाब्दन्याये व्युत्पित्सूनां परमोपकारक इति सर्वेषां पण्डितजनानां सुविदितोऽयं विषयः। श्रीमन्माधवतर्कालङ्कारपादाश्च यद्यपि गदाधरभट्टाचार्यप्रभृतिभ्योऽर्वाचीनास्तथापि नातिनवीनाः सुव्युत्पन्नाश्च नवद्वीपमधिकृत्य विराजमाना आसन्। अस्ति च तेषां शक्तिवादेऽपि "माधवी" ति प्रसिद्धा भावगम्भीरा नातिविपुलायतना टीका, या वङ्गविषयाद्बहिरपि विद्वद्वर्यैरादृियमाणा दृश्यते। तैरेव प्रणीतेयं "माधवी" "कारकचक्रा" श्रिता मूलग्रन्थाभिप्रायोद्घाटने मूलग्रन्थयोजनायामपेक्षितार्थप्रतिपादने च सरलया भङ्ग्या व्याप्रियमाणा सहृदयानां प्रमोदभरं सम्पादयन्ती व्युत्पितसुजनानामतीव हृदयङ्गमा वरीवर्ति। श्रीयुतपण्डितवर्य-तारानाथन्यायतर्कतीर्थमहोदयाः सम्प्रदायशुद्धां न्यायविद्यामुपासीनाष्टिप्पनीयोजनेन विषमस्थलेषु परिष्कुर्वाणा मूलटीकयोरभिप्रायविशेषान् न केवलं छात्राणामुपकाराय श्राम्यन्ति स्म; भविष्यति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदीयव्यापारेणान्येषामपि केषांचन परमसाहायकमिति सम्भाव्यते। मूलं टीका चेति द्वयं देवनागरलिप्या मुद्रितम्। सर्वथा ग्रन्थोऽयं सर्वेषां सज्जनानामादरणीयतामर्हतीति सप्रमोदमुद्घोष यामः।

परीक्षकः—श्रीहाराणचन्द्रशास्त्री

स्तवसमुद्रः—सम्पादकः—वि० ए, कविभूषण-काव्यरत्नोद्भट-सागरोपनामकः श्रीपूर्णचन्द्र दे। प्राप्तिस्थानम्—गुरुदासचट्टोपाध्यायः एण्ड सन्स २०३।१।१ कर्णओयालिश् ष्ट्रीट, कलिकाता। मूल्यम्—रूप्यकद्वयम्।

सुविदितमिदं विद्यावतां सर्वेषामेव यद् बाहुल्येन संस्कृतभाषामयः स्तवनिवहो वरीवर्ति साधकसम्प्रदायानां स्वस्वकीयाराध्यदेवतासु भक्तेः परां काष्ठां प्रकाशयन भारतवर्षेषु। यत्साहायकेन साधकधुरन्धरा निखिल-सुखैकनिदानं निरायासमेव प्रत्यक्षीकृतवन्तः स्वाभीष्टदेवविशेषस्य चरण-कमलम्। किमिहास्ति जगति दुर्लभं तेन कल्पवृक्षमहिम्ना स्तोत्रनिवहेनेति प्रायेणाद्यत्वेऽपि हिन्दुधममात्रावस्थितस्य जनगणस्य गेहेषु संदृश्यते स्तोत्र-रत्नानामधिकः समादरः।

स्वाभीष्टसाधकेष्वपि दुरूहेष्वेषु संस्कृतभाषामयेषु स्तवादिषु असंस्कृतज्ञ-तया कदाचिज्जना वीतश्रद्धा भवेयुरिति अपेक्षितैवासीदेषां वङ्गभाषामयी काचन मधुरमधुरा प्रतिकृतिः। निःशेषिता सेयमपेक्षा साहित्यरसिकैस्तत्र-भवद्भिः स्तवसमुद्रं नाम ग्रन्थरत्नं प्रवाहरूपेण सम्पादयद्भिः कविभूषण-महोदयैरिति समधिकं प्रमोदविशेषं प्रतीमः।

"स्तवसमुद्रे"ऽस्मिन सम्पादकेन वङ्गानुवादविषये तथा किमपि नैपुण्य-माविष्कृतं यथा आषामरसाधारणानाम् उपकारः सम्पद्येत। छन्दो-व्याकरणपाठान्तरादिष्वपि सुमहानेव यत्नः प्रदर्शितस्तत्रभवता।

मन्ये यदि उत्तरोत्तरमित्थं प्रवाहरूपेणायं स्तवसमुद्रः प्रकाशितः स्यात्, तदा समुद्र इव रसधारया समग्रं जगत प्लावयिष्यतीति शम्।

परीक्षकः—श्रीरामधन काव्यतीर्थः

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भजनम्

[निबन्धकः—स्वर्गत-पण्डितप्रवर-कालिदास-विद्याविनोदः]

कृष्णार्जुनं यमुपदेशमभाषथास्त्वं
तं धारयामि हृदये वत देहि शक्तिम् ।
दुःखं यथा मरणयातनया न मे स्यात्
तत्-त्वं विधेहि करुणाकर हृन्निवास ॥१॥
नाम्नैव ते सकलपापजदुःखमोहा
नश्यन्ति शास्त्रवचनं न मृषा कदाचित् ।
लोकद्वयस्थितिरहो हरिनामशक्त्या
तन्नाम विस्मृतिपथं न हि यातु जातु ॥२॥
त्वं दीननाथ करुणामय कृष्ण विष्णो
व्याप्तोऽसि चित्तगगने ननु देहभाजाम् ।
तत्त्वं वसन् हृदि कथं वत निर्दयोऽसि
नो चेद् ददासि मम वाञ्छितवृत्तिमद्य ॥३॥
वेदान्तशास्त्रपरिशीलनलब्धतत्त्वो
यो ब्रह्मभावमुररीकुरुते स्वदेहे ।
हा-हन्त भागवतशास्त्रविलोकनेन
दासीकृतस्तव हरे स हि कालिदासः ॥४॥
ब्रह्माण्डमानवगणा ननु यस्य दास
हा लेख्यपत्रविधिना व्रजराजपुत्र ।

---

* मृत्योः प्राक् पञ्चदशदिनाभ्यन्तर एवेदं तत्रभवता लिखितमिति तन्निरूपितया दिनसंख्यया प्रतीयते ॥सं॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्ण स्वयं त्रिभुवनेश्वरतामुपेत्य
दासीकृतो वद कथं बत राधिकायाः ॥५॥
प्रेमाकरो य इह गौरहरिः कलौ स
प्रेमावतार इति सर्वजनैः स्तुतोऽभूत् ।
श्यामश्च रूपमपहाय गृहीतगौरो
गौराङ्गनामभजनात् कलिमुक्तिदाता ॥६॥

पूर्ववङ्गसारस्वतसमाजाधीना परीक्षा

सेयं परीक्षा आगामिषु सौरफाल्गुनस्योनत्रिंश-त्रिंशदिवसयोः सौर-चैत्रस्य प्रथमदिने च तेषु तेषु परीक्षाकेन्द्रेषु परिगृहीता भविष्यति । एतदर्थ-मावेदनञ्च—आगामिसौरमाघस्योनत्रिंशदिवसमन्तरा "आर्माणीटोला, ढाका" इत्यनया सूचनया पूर्ववङ्गसारस्वतसमाजसम्पादकानां समीपे प्रेषणीयम् । तत्र शुल्कव्यवस्था चेत्थम्—प्रथमपरीक्षायां चतुष्पाठीस्थ-च्छात्राणाम् अष्टौ आणकाः । आङ्ग्लविद्यालयस्थानां रूप्यकम् । मध्य-परीक्षायामुपाधिपरीक्षायां च चतुष्पाठीस्थानां छात्राणां शुल्कमेव नास्ति । आङ्ग्लविद्यालयीयानां पुनर्मध्यपरीक्षायामेकं रूप्यकम्, उपाधिपरीक्षायां रूप्यकद्वयम् । आवेदनपत्रस्यादर्शं (१७ नं आर. जि. कर रोड् श्यामबाजार) संस्कृत-साहित्य-परिषद्यपि लभ्येत ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकाता ओरियेण्टाल सिरिज

१। **युक्तिकल्पतरुः**—महाराजश्रीभोजविरचितः। पण्डितश्रीईश्वरचन्द्रशास्त्रिसांख्य-वेदान्त-न्याय-दर्शनतीर्थेन संशोधितः। अत्र राजनीतिः, गृह-दुर्ग-नगरादिनिर्माणम्, छत्र-ध्वजचामरालङ्कारादिनिर्णयः, मणिरत्नास्वगजादिपरीक्षा, शस्त्र-नौका-यानादिलक्षणानि च सविशेषं निरूपितानीति तत्तद्विषयमनुसन्धित्सूनां महोपयोगोऽयं ग्रन्थः—२॥०

२। **चाणक्यराजनीतिशास्त्रम्**—विद्वद्वर-जोहान फ्रान् म्यानेन-कृताङ्गलभूमिकासमेतम्—॥।=०

३। **मुक्ताफलम्**—बोपदेवविरचितम् हेमाद्रिकृतटीकासहितम् वैद्यवानामत्युपादेयतया परिगृहीतं भागवततत्त्वरत्नमिदं डाः श्रीनरेन्द्रनाथ लाहा, पि-एच. डि.-लिखितबृहदाङ्गल-भूमिकया समलङ्कृतम् खण्डद्वयात्मकम्—६)

४। **चाणक्यकथा**—रविनर्त्तकविरचिता। विशाखदत्तकृत मुद्राराक्षससंवादिनीयं कथा सुललितपद्यमयी (द्वितीयाद्यनावृत्तिः)—१)

५। **वक्रोक्तिजीवितम्**—श्रीराजानककुन्तलविरचितं स्वोपज्ञवृत्तिसमेतमतिप्रमाणभूत-मलङ्कारशास्त्रम्, डाः श्रीसुशीलकुमार दे, डि. लिट्. महोदयेन संशोधितम्—३॥०

६। **पद्मपुराणम्**—स्वर्गखण्डस्य पञ्चाध्यायात्मकः शकुन्तलोपाख्यानम् पातालखण्डस्यैकादशाध्यायात्मक-रघुवंशवर्णनञ्चात्र बङ्गदेशोपलब्धहस्तलिखितमादर्शमाश्रित्य संशोधितमध्यापक-श्रीहरदत्तशर्म्मणा सुबृहद्बङ्गलभाषामयभूमिकायां प्रमाणीकृतञ्च कालिदासीयशकुन्तल-रघुवंशयोर्बीजभूतत्वं पद्मपुराणस्य—१)

७। **जयमङ्गला**—श्रीशङ्कराचार्य-विरचिता। ईश्वरकृष्णकृतसांख्यसप्ततिग्रन्थस्य टीकेयं श्रीहरदत्तशर्म्मणा संशोधिता—२)

८। **योगचिन्तामणिः**—श्रीशिवानन्दसरस्वतीकृतिरतिप्राचीनो ग्रन्थोऽयं योगशास्त्रा-नुधिरिति शक्यते वक्तुम्—३)

९। **ब्रह्मसूत्रम्**—श्रीमद्भागवतभाष्यसमेतम्। "अर्थोऽयं ब्रह्मसूत्राणां श्रीमद्भागवतादिभिः" इति गारुडवचनस्य यथार्थ्यं प्रदिदर्शयिषता पण्डित-श्रीहरिदास-विद्यावागीशेनात्र श्रीमद्भागवतग्रन्थादुद्धृता ग्रन्थांशब्रह्मसूत्रभाष्यतया निरूपिताः, ब्रह्मसूत्राणि च बङ्गभाषया विशेषेण व्याख्यातानि—२॥०

प्राप्तिस्थानम्—

कलिकाता ओरयेण्टाल बुक एजेन्सी

९ पञ्चानन घोष लेन, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Opinions on the 'Manodūtam'

(Sanskrit Sahitya Parishad Serie No. 21)

Prof. S.K. De, M. A., D. Lit. (Lond.), *Dacca University* :

Mr. Chakravarti is already known to Sanskritists by his careful edition of the more interesting and important Pavanadūta of Dhoyī as well as by his informative articles on the Dūtakāvyas in Sanskrit in IHQ. III, pp. 273-97.

Since then, interest in Dūta-kāvyas.....appears to have increased ; and the present edition of a less known, but in some respects interesting, Dūta-kāvya is evidently a continuation of the editor's studies in the subject, the intention being to put in print some of the more remarkable poems of the type.....The manuscript-material on which the edition is based is hardly ample or sufficient ; but the editor, with commendable carefulness and scholarship, has done his best to reconstruct a fairly good text.

(*Oriental Literary Digest*, Vol. I, No. 8, p. 15).

সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকায় বিজ্ঞাপনের হার

কভার ২য় বা ৩য় পৃষ্ঠা (সম্পূর্ণ) মাসিক	...	...	৮৲
,, (অর্দ্ধেক) ,,	...	...	৪৷৷০
,, (এক-চতুর্থাংশ) ,,	...	...	২৷৷০
কভার ৪র্থ পৃষ্ঠা (সম্পূর্ণ) ,,	...	...	১০৲

একসঙ্গে তিন মাসের বা তদধিক সময়ের জন্য বিজ্ঞাপন দিলে হার কমান হইয়া থাকে।

Printed by J. C. Sarkhel at the Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

29.8.38

संस्कृतसाहित्यपरिषत

Vol. XX, No. 10] [February, 1938.

१८५९ शकीये माघे २०श-वर्षस्य १०म-संख्या

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

विशेष-प्रबन्धः—
उपदेश-परम्परा

Main article—
Upadeśa-paramparā

सम्पादकः—

महामहोपाध्याय-श्रीअनन्तकृष्ण-शास्त्री

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

মাসিক-সভা

সংস্কৃত-সাহিত্য-পরিষদ আগামিনী মাসিক-সভা ১৩৪৪ বঙ্গাব্দীয়-সৌরচৈত্রস্য ২৩শ (সপ্তবিংশ)-দিবসে রবিবাসরে সায়ং সপ্তবাদনতো ভবিষ্যতীতি সর্ব্বেষাং সংস্কৃত-ভাষাধ্যায়িনা-মধ্যাপকানাঞ্চ তত্র সমুপস্থিতিঃ প্রার্থনীয়া।

শ্রীশ্রী৺সত্যনারায়ণ-পূজা

কলিকাতা করপোরেশন হইতে পরিষদের ভূমিলাভ উপলক্ষ্যে আগামী ২৭শে চৈত্র, রবিবার, ১৭নং আর. জি. কর রোডস্থ বর্ত্তমান ভবনে শ্রীশ্রী৺সত্যনারায়ণ দেবের পূজা অনুষ্ঠিত হইবে। পরিষদের সভ্যদের উক্ত অনুষ্ঠানে উপস্থিতি একান্ত প্রার্থনীয়।

পণ্ডিতগণের জীবনী-সংগ্রহ

সংস্কৃত ভাষাভিজ্ঞ ব্যক্তিমাত্রই অবশ্য স্বীকার করিবেন যে ভারতবর্ষের গৌরব ভূতপূর্ব্ব এবং বর্ত্তমান **অধ্যাপকগণের জীবনী** একত্র সংগ্রহ করিয়া প্রকাশ করার যথেষ্ট উপযোগিতা আছে। এ বিষয়ে পরিষদের পক্ষ হইতে তথ্যানুসন্ধান করা হইতেছে। বঙ্গদেশে এখনও প্রায় ১০০০ সুপ্রতিষ্ঠিত অধ্যাপক আছেন, তাঁহাদের এবং তাঁহা-দের অধ্যাপক পণ্ডিতগণের জীবনী সংগ্রহ করিতে পারিলেও একটা উল্লেখযোগ্য কার্য্য সম্পন্ন করা যাইতে পারে। তদুদ্দেশ্যে প্রত্যেক অধ্যাপকের নিকট বিনীত অনুরোধ এই যে, তাঁহারা অনুগ্রহপূর্ব্বক নিজের এবং স্বপরিচিত পরলোকগত বা বর্ত্তমান অধ্যাপকগণের মধ্যে অন্ততঃ দুই জনের সম্বন্ধে নিম্নলিখিত সংবাদগুলি **সংস্কৃত-সাহিত্য-পরিষৎ-সম্পাদকের** নামে লিখিতভাবে জানাইলে দেশের ও দশের মহৎ উপকার সাধিত হইবে :—

নাম, পিতার নাম, উপাধি, কর্ম্মস্থল, জন্মস্থান (গ্রাম, পোঃ, জেলা), জন্মদিবস (বাংলা তারিখ, অন্ততঃ আনুমানিক সাল), বর্ত্তমান বয়স (পরলোকগত-স্থলে মৃত্যুদিবস—বাংলা তারিখ), তাঁহার অধ্যাপকের নাম, স্বরচিত কোন গ্রন্থাদি থাকিলে তাহার নাম (মুদ্রিত বা অমুদ্রিত জানা দরকার), নিজে টোলে মোট যত ছাত্র পড়াইয়াছেন তাহার আনুমানিক সংখ্যা, টোলের নাম ও ঠিকানা। সংবাদদাতার নাম ও ঠিকানা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

February, 1938. | १८५९-शकीये माघे २०श-वर्षस्य १०म-संख्या | Vol. XX, No. 10

परिषदो भूमिलाभः

प्रेयांसः पाठकमहोदयाः, उपदीकृतं परिषदे किञ्चन चिरायापेक्षितं भूमिखण्डम् आवेदनपरम्परोदीरितदानशौण्ड्यया श्रीमत्यां नगररक्षा-समित्येति निवेदयतां कदम्बकोरकायन्ते नः शरीराणि, विकाशि-तामरसायन्ते मानसानि, दुर्दिनकुमुदायन्ते च नेत्रश्रियो हर्षेण । सम्भावयामः, सुप्रभात-मिवाद्य सुरभारत्याः, प्रसन्नतया लघिमानमिवाप्नुवन्ति मानसानि परिषत्-सदस्यानां भवताम्, वीतप्रायमिव मानसं सन्तापं तत्रभवतोः श्रीमद्-अमरेश्वरठाकुरवेदान्तशास्त्रिणः श्रीमद्-यतीन्द्रनाथबसुजस्य च सम्पादकयोः फलितञ्च मनोरथं सर्वेषां सुरसरस्वत्युन्नमनजातस्पृहाणां विदुषाम् ।

व्यतीते सौरमाघस्य सप्तदशदिवसे परिषत्सदस्यानामावेदनक्रमेण निर्धारितं कलिकातानगररक्षासमित्यधिकृतैः, यत् संस्कृत-साहित्य-परिषदो गृहनिर्माणार्थमेकं पञ्च'काठा'त्मकं भूमिखण्डं नवनवतिवत्सराणां कृते रौप्यकखण्डमितेन नाममात्रेण वार्षिक-करेण देयमिति । महत्या 'राजा-दीनेन्द्रनारायण-ष्ट्रीट्' इत्याख्यरथ्याया हृदयस्थानमिव साम्प्रतिक-कलिकातानगर्याः पूर्वोत्तरकोणतो वर्त्तमानं यामिनीभूषणाष्टाङ्गायुर्वेदमन्दिरस्य दक्षिणं भागमलङ्कुर्वत् तदिदं भूमिखण्डं स्पृहणीयतममेवेत्यत्र नास्ति नः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संशयलेशोऽपि। परिषदश्चिरस्वत्वास्पदीभूते सत्यपीतो बृहत्तरे भूस्यन्तरे अभिमतदेशवर्तितामात्रगुणगरिष्ठेनानेनैव भूमिखण्डेन परिषदं भूमिमतीं मन्यन्ते निपुणधियः।

एतदर्थञ्च के नाम धन्यवादानर्हन्तीति प्रतिपत्तिविमूढा एवानेके वर्त्तन्ते। किं तावद् वर्षिष्ठानामपि परिषत्कर्मणे यविष्ठवदुत्तिष्ठमानानां सभापतिपादानां श्रीमतां म-म-दुर्गाचरणसाङ्ख्यवेदान्ततीर्थानामदीनसत्त्वाः प्रतिपत्तयः? आहोस्विच्चिराद् अजस्रं परिश्राम्यताम् अन्यतरसम्पादकानां श्रीमताम् अमरेश्वरठाकुरवेदान्तशास्त्रिमहोदयानां कुशलाः कार्यक्रमाः? किं वायुष्मतां वयसा कनीयसामपि विद्यया चारित्र्येण चातिवृद्धानां स्वभावसुन्दराणां श्रीमदशोकनाथवेदान्ततीर्थानाम् अन्येषाञ्च श्रीमद्दीनबन्धुसाहित्यशास्त्रिश्रीमद्रामकृष्णचक्रवर्त्ति एम्. ए. प्रमुखाणां कार्यनिर्वाहकसमितिसदस्यानामुत्साहमहिमानः? उताहो मन्त्रिपदमधिरूढैः श्रीमद्भिः सनत्कुमाररायचतुर्धुरीणैः परिचालितानां नगरपालसभाधिकृतानामशिथिलाः सदिच्छापरम्परा इति। वयन्तु कारणकूटकृतान् एव कार्योत्पादान् अवधारयन्त आदावतिवृद्धायै ईश्वरेच्छायै, तदन्वर्वाचीनेभ्यः सर्वेभ्य एवैतेभ्यः सहस्रशो धन्यवादान् वितरामः, ब्रूमश्च—नैतावता भूमिलाभमात्रेण कृतार्थम्मन्यैर्भवद्भिरत्यन्तमुदासितव्यम्, अस्तीदानीमपि कृत्यशेषः, नहि भूम्यामेव परिषदासितुं क्षमते समपेक्षते च गृहम्, तत्रापि भवतामुत्साह एव निदानमिति। मान्याः परिषत्सदस्यमहोदयाः, अन्ये च सुरभारतीप्रणयिनो धनिकधुरीणाः, निःस्वैर्द्विज्जनैः परिपालितेयं परिषद् दैवादासितवती काञ्चन गृहनिर्माणोपयोगिनीं भूमिम्, परं तत्र गृहनिर्माणमत्यन्तव्ययापेक्षं विना भवतां कृपाकटाक्षपातमात्मलाभाय नैव क्षमिष्यते, तदत्र सनिर्बन्धं भवन्तोऽनुनीयन्ते क्रियतामत्र गृहनिर्माणविधौ यथापेक्षितं यत्नः, येन चिराय परगेहोषिता भवतां जननीकल्पा सुरभारती स्वगृहवाससुखमनुभवन्ती गुर्वीभिराशीर्भिर्भवतः समेधयेदिति शम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशान्तरत्नाकरम्

[श्रीकालीपदतर्काचार्यप्रणीतम्]

पुरुषः—सुन्दरि, एते गृहीताः।

स्त्री—अथेदानीं मुच्यतामबलाया मे पन्थाः, यावद् निराबाधा स्वगेहं गत्वा पत्या सह मिलिता भवामि।

पुरुषः—अयि निष्करुणे, कथमेतावन्मात्रकेणैव इमं जनं वञ्चयित्वा गन्तुमीहसे ? अहो काठिन्यं स्त्रीहृदयस्य !

स्त्री (स्वगतम्) अहह ! यदेवाशङ्कितं तदेव दुष्टेन प्रस्तुतम्। भवत्वेवं तावत्। (प्रकाशम्) भद्र, किमेवं वदसि, किं वा ममापरं सन्निहितं, यदतः परमपि कामयसे ?

पुरुषः—अयि अरसिके, कथं प्रबुद्धापि स्वप्नं नाटयसि, प्रसीद, एतत्त्वदीयं कुसुमसुकुमारं लावण्यं समीक्षमाणः सुतरां कामेन परवशः कृतोऽस्मि, तदस्य कृपया प्रतीकारं कर्तुमर्हसि।

स्त्री—मूढ, निर्मर्याद, दुष्टस्वभाव, साम्प्रतमेतावन्तमवधिं समारूढोऽसि, न ते रसना छिद्यते ?

पुरुषः—भद्रे, सान्त्वेनानुनीयसे, प्रसीद। (किञ्चिदुपसर्पति)

स्त्री—धिक् अपध्वस्तोऽसि, मूढ, दूरमपसर। (अपरपादपान्तरालं गच्छति)

पुरुषः—प्रगल्भे, अद्यापि क्षेमं ते उपदिशामि। मदीयं चित्तमविलम्बितमनुवर्तेथाः (उपसरति)।

स्त्री—भद्र, भद्र, रक्ष विनयम्, रक्ष मर्यादाम्, मा मामनाथाम् अशरणां निर्जने समासाद्य परिभवितुमर्हसि। हा हा ! तथापि न शाम्यति ! हा हा दूषितास्मि, परिभूतास्मि, अनेन दानवहतकेन। कः कोऽत्र ? परित्रायतां परित्रायतां मामनाथां वनोपकण्ठे !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषः—सुन्दरि, मुग्धासि, इह आक्रोशन्तीं त्वां न कोऽपि शृणोति। (उपसृत्य गृहीत्वा बलेनाकर्षति)

स्त्री—हा हतास्मि !

पुरुषः—हाः ! हाः !! हाः !!! न कोऽपि शृणोति !

(ततः प्रविशति सहसा रत्नाकरः)

रत्ना—मूढ ! दुर्मनुष्य, एष ते कृतान्तः शृणोति ! (कटिदेशे दण्ड-प्रहारं करोति)

पुरुषः—हा हतोऽस्मि (पतितः परावृत्य कथञ्चित् पश्यन् स्वगतम्) अये ! को नु खल्वेष निर्जने वनप्रान्ते कृतान्तसमः प्राप्तः ?

रत्ना—मूढ, सुष्ठु पतितोऽसि, तत् यावदहं जननीमिमां स्वं गेहं प्रति यथागतं प्रेषयामि, तावत् तथैव तिष्ठ, यदि पदात् पदान्तराय स्पन्दसे, तदा कृतान्तमेव क्षणमात्रकेण द्रक्ष्यसि।

पुरुषः—अहो शौर्यम् ! अहो साहसम् ! एकेनैव दण्डप्रहारेण भग्नेव मे कटिः प्रतिभाति ! (प्रकाशम्) आम् ! पराभूतोऽस्मि, तत् का गतिः ?

रत्ना—एवमिदानीं मार्गे पतितोऽसि। मातः साम्प्रतं निराबाधा स्वगेहं प्रति प्रतिनिवर्त्तस्व। अपगतं ते दुर्मनुष्यकृतं भयम्, एष दुरन्तवृत्तः परतो मया द्रक्ष्यते।

स्त्री—भद्र, कृतज्ञतया आवर्जिताया मे वाचो न प्रसरन्ति ! भद्र, देवतास्ते सर्वतः स्वस्ति करिष्यन्ति, यदहमेवम्भूता निःशरणा त्वया रक्षिता।

पुरुषः—(स्वगतम्) यावदेतौ कथाव्यासक्तौ, तावदलङ्काराननेन मूषिकोत्करेण अन्तरयामि (तथा करोति)।

रत्ना—आर्ये, मा मैवम्

मया विपन्ना भवती न रक्षिता
दैवेन रक्षा विहिता तवानघे।
मनुष्यशक्तिः कियदेव साधयेद्
दुःखं सुखं वा नियतेर्वशं गतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्री—तत्रापि भवानेव द्वारीकृतो दैवेनेति भवन्तमभिनन्दामि ! किं वा बहुना, यद्यस्ति लेशमात्रमपि सुकृतं मे, तदा ततफलं त्वय्येव संक्रान्तमिच्छामि । अपि च भद्र, यदि नान्यथा मन्यसे, तदा अनेन सबलात्कारं गृहीताः स्वल्पका अपि मे अलङ्कारास्तवैव सन्तु इत्यभ्यर्थये ।

रत्ना—अये, अनेन मूढेन आर्याया अलङ्कारोऽपि बलात्कारेण गृहीतः ? तद् न केवलमेष कामवृत्तः, परम् अर्थवृत्तोऽपि ? अहो भिन्नः किलानेन तस्करतया समं कामस्य विरोधः ! तथाहि—

ये तस्करास्ते नहि काममुग्धा ये काममुग्धा नहि तस्करास्ते ।
विभाति चौर्येण समं न कामः सता च कामेन न चौर्यसिद्धिः ॥

तदत्र विचित्रः किल द्वयोरेकत्र समावेशः !

अथवा

क्षणे क्षणे चित्तविवर्तनं नृणां न भावधारा सदृशी चिरस्थिरा ।
विचित्रसंसारगतिप्रभाविताः शरीरिणो यान्ति गतिं पृथग्विधाम् ॥

तन्नास्त्यत्र विस्मयावकाशः । (प्रकाशम्) मूढ, न केवलं काममभिसन्धत्से ? किन्तु अर्थमपि ? तत् दीयन्तामस्या आर्याया बलात्कारेण गृहीतपूर्वा अलङ्काराः ।

पुरुषः—अलङ्कारा इति ? कुतः खल्वलङ्काराः ? एषा लोहवलयमात्राभरणा मया आसादिता ।

स्त्री—नहि, नहि, एष मिथ्या प्रलपति, गृहीता एवानेन ममालङ्कारा ये विवाहकाले मात्रा विसृष्टाः ।

पुरुषः—भद्र, मिथ्यैषा ब्रवीति, मम निग्रहाथमेवास्या निपुणाया एष प्रबन्धः ।

स्त्री—धिक् ! व्रीडितास्मि !

रत्ना—मूढ, निर्मर्याद,

वित्तस्य क्षणभङ्गुरस्य लघुनो लाभाय यः साहसाल्
लोकप्राणहरोऽसि तस्य खलु ते सत्ये प्रतिष्ठा परा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या साध्वी कुलजा सतां पथि रता सत्याश्रया सन्ततं
तस्या हन्त वचः कथं नु वितथं जायेत मृत्यावपि ॥

तदलं छलेन, आर्यैषा ब्रवीति, दीयन्तां सान्त्वेन ।

पुरुषः—इह सान्त्वे परुषे वा न कश्चिद् विशेषः ।

रत्ना—(स्वगतं) कथमयं निश्चयेन तथा ब्रवीति, अये संशयं प्राप्तोऽस्मि । (विचिन्त्य) अथवा अलं संशयेन,

मातेव ललिताकारा देवतेव शरीरिणी ।
नैषा मिथ्यानुपङ्गस्य पात्रतां गन्तुमर्हति ॥

(प्रकाशं) आर्ये, कथय, के के भवत्या अलङ्काराः, ये मूढेनानेन बलाद् गृहीताः ।

स्त्री—रजतमयं वलययुगलम्, रजतमयी मेखला, सुवर्णमयं कुण्डलद्वयञ्च ।

रत्ना—एतावन्त एव ?

स्त्री—अथ किम् । भद्र, एतावन्त एव पर्याप्ता मे दीनायाः ! एतेऽपि विवाहकाले मात्रैव प्रतिपादिताः ! तदनेन प्रसङ्गेन पत्युरवस्थाविशेषं स्मृत्वा खिन्नास्मि ।

रत्ना—आर्ये, किमेवं दैन्यं वहसि ? पश्य,—

व्याददाति महाभीमं वक्त्रं दुर्भिक्षराक्षसः ।
तद्वक्त्रे विनिविष्टानां सर्वेषामद्य सा दशा ॥

स्त्री—भद्रस्य मातृबहुमानेन गौरवं गमिता किञ्चिदिव वक्तुमिच्छामि ।

रत्ना—आर्ये कथ्यताम् ।

स्त्री—यदत्र भद्रः 'सर्वेषामद्य सा दशा' इति सामान्यतो ब्रवीति, तदिदं न मे दृढं रोचते ।

रत्ना—आर्ये, कथमिव ?

स्त्री—कथमिति ? किं वात्र प्रष्टव्यम् ? नागरिका धनिकाः स्वच्छन्दमाहारं विहारञ्च कुर्वन्तः प्रतिपदं रमन्ते । धनिकानां कलत्राणि विचित्रा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लङ्कारसमलङ्कृतानि धनमदेन पन्थानं नमयन्तीव परिक्रामन्ति, तेषां वित्तमदमत्ताः सन्ततयो विचित्रपरिच्छदाभरणा दीनानां दीनाः सन्ततीः क्लेशयन्त्यो वाचा च कर्मणा च निरन्तरमेव परिभवन्ति। अपि नाम विलोपं गतानि तेषां गृहे तौर्यत्रिकविजृम्भितानि, ह्रासं गता वा लेशमात्रेणापि विलासव्यवहाराः ? तत् कथमेवं भवान् ब्रवीति ?

रत्ना—(स्वगतं) अहो एषापि परसम्पदा परितप्यते ? सत्यमेवैषा प्रस्तौति,

कपर्दकसमा कोटिर्व्यसने यस्य दृश्यते।
स जीवनार्थं भिक्षूणां न प्रदत्ते कपर्दकम् ॥

अहो, वित्तमत्तता धनवताम्, स्मरामि, हन्त स्मरामि, क्रीडां गतस्य मे वत्सस्यात्रेयस्य दारिद्र्यादेव धनमदमत्तैरमात्यकुमारैः कृतं कठोरं पराभवम् ! येन दुर्मनायमानः क्रीडाप्रियोऽपि वत्सो मे क्रीडानिवृत्तिमात्मना समाश्रितः। हा वत्स आत्रेय,

महता भाग्यदोषेण रत्नाकरगृहं श्रितः।
परेषां सम्पदा येन सततं परितप्यसे ॥

(अश्रु मुञ्चति)

स्त्री—कथमार्यो वाष्पं विसृजति ? तत् किन्नु खल्विदम् ?

रत्ना—न किञ्चिदेतत् !

स्त्री—आर्य, सुतरामपराद्धास्मि, येन निर्विचारमुपक्रान्तेन दुःखनिवेदनलाघवेन भवन्तं दुःखाकृतवती। तदलमनेनाप्रकृतेन।

रत्ना—अये, किं नाम सम्प्रति प्रकृतम् ? (विचिन्त्य) आं स्मृतम् ! अरे पुरुष ! कथय, क्व ते अलङ्काराः ?

पुरुषः—भद्र, किमेवं पिष्टपेषणेन ? न सन्त्येव मय्यलङ्काराः, तत् कथं दीयन्ताम्।

रत्ना—मूढ, रत्नाकरः खल्वहम्, तावता वृथैव मां वञ्चयितुमिच्छसि ? यदि कल्याणं कामयसे, प्रत्यर्पयालङ्कारान।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्री—अये, एष रत्नाकरः, यस्य दैन्यं गतस्यापि सौजन्यप्रभवां कीर्त्तिं समुद्घोषयन्ति पौरजानपदाः ! अथवा कुतः खलु सुधाकरादन्यतः पीयूषवृष्टिः ?

पुरुषः—नास्त्येव मय्यलङ्कारः, तथापि यद्यस्ति, गृह्यताम् !

रत्ना—भद्र, सान्त्वं न कामयसे, येनाद्यापि नालङ्कारं प्रत्यर्पयसि। अथ यद्येवं. स्वस्थानादुत्तिष्ठ, यावदहं स्वयं पश्यामि।

पुरुषः—भद्र, भवत एव दण्डप्रहारेण भग्नकटिं मां नैवमुपहसितुमर्हसि, कुतोऽद्यापि मे स्वस्थानाच्चलनसामर्थ्यम्, तदनुकम्पया दीयतां करालम्बः।

रत्ना—एष करालम्बं ददामि, उत्तिष्ठ। (करालम्बं दातुमुपगतः)

पुरुषः—(स्वगतं) अयमेव प्रतीकारावसरः ! मूढ, इदानीं क्व यास्यसि ? (वस्त्रान्तरात् छुरिकामाकृष्य तया रत्नाकरस्य वक्षसि प्रहर्त्तुमिच्छति)

रत्ना—(सहसा तं मणिबन्धे गृहीत्वा तस्य करात् छुरिकामाकृष्य प्रतिप्रहारं कर्त्तुमिच्छति) मूढ, प्रतिपदं दृश्यसे, एवं किल रत्नाकरं वञ्चयितुमिच्छसि ? अथेदानीम् ? मूढ, अथेदानीं स्मर स्वकीयं भागधेयम् (प्रहर्त्तुमुद्यतः)।

स्त्री—अहो अत्याहितम् ! भद्र, मा तावत्, मा तावत् मानुषवधं कार्षीः ! प्रसीद !

पुरुषः (स्वगतं) अहो धिक्, ईदृशी मया मूढेन पराभूता ? तत् कृतमतिमात्रमसदृशं कर्म। लज्जया वसुन्धरागर्भं प्रवेष्टुमाकाङ्क्षति मे अन्तरात्मा !

रत्ना—अथवा तिष्ठ तावत् यावदस्या आर्यायाः कल्याणोदर्कः प्रबन्धः क्रियते। साम्प्रतमनुपेक्षणीयोऽसि, तदेहि अस्मिन् सन्निहिते पादपस्कन्धे त्वां पादपलम्बितलतापाशेन दृढं बद्ध्वा विश्वस्तो भवामि।

पुरुषः—भद्र, एष नतोऽस्मि, अज्ञानकृतं मे क्षन्तुमर्हसि।

रत्ना—मूढ, किं न जानासि ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानतोऽज्ञानतो वापि समाक्रान्तो हुताशनः ।
तुल्यं दहति नास्त्यत्र ज्ञानाज्ञानविचारणा ॥

पुरुषः—हा हा निराशोऽस्मि ।

रत्ना—मूढ, अद्याप्याशां वहसि ? धिक् साहसम् !

कुलाङ्गनां स्वामिनिरूढमानसां नीरार्थमाराक्तटिनीमुपेयुषीम् ।
आक्रम्य कामादपहृत्य भूषणं रहः समाकाङ्क्षसि मुक्तिमग्रतः ॥

आदौ कथय, क्व ते अलङ्काराः ? दृश्यतामिदमुद्यतं शस्त्रम् !

पुरुषः—एष कथयामि । इह मूषकोत्करे सन्ति ।

रत्ना—उत्सार्यतां मूषिकोत्करः ।

पुरुषः—एष उत्सारयामि (मूषिकोत्करमुत्सार्य अलङ्कारान् आविष्करोति) ।

रत्ना—उपनीयन्तामिदानीमस्याः ।

पुरुषः—(स्वगतं) अहो क्षमासारायाः अस्याः मातुः परिभवेन सुतरां व्रीडितः कथमिदानीमेनामुपसर्पामि, अथवा क्षमासारायामस्यामलं व्रीडया, (प्रकाशं) एष उपनयामि । अयि मातः स्नेहशीले ! अज्ञानं सुतं मां क्षन्तुमर्हसि ।

मोहात्त्वयि कृतं येन दुष्कृतं पापकारिणा ।
दूरापेतः स मे कामः कामं निर्मलमन्तरम् ॥

तत् क्षमस्व, गृहाण मातुस्ते शरीराद् मया दुष्टेन गृहीतानलङ्कारान् ।

स्त्री—वत्स, उत्तिष्ठ, प्रसन्नास्मि । सम्प्रति कामराक्षसाद् विमुक्तः कल्याण एव मे प्रतिभासि । वत्स, अलङ्कारानिमानस्य महानुभावस्य उपनय ।

रत्ना—मा, मा तावदेवम् । जननि, नैवं वक्तुमर्हसि, नाहं जननीं निराभरणां समीक्षमाणो धनलाभेन परितृप्यामि, विशेषतश्च मात्रा स्नेहेन प्रतिपादितानि भूषणानि न ते शरीरवियोगमर्हन्ति । तदिदानीम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आमुच्यतां यथास्थानमयं भूषणसञ्चयः ।
मातरं भूषितां वीक्ष्य लघयामि शुचं हृदः ॥

स्त्री—वत्स, कृतवेदितया समावर्जितास्मि, यद्यनेन दैन्यं गतस्य भवतः कियानप्युपकारस्तदा कृतार्था भवेयम् ।

रत्ना—आम् अस्त्येतत्, तथापि दैवतशीले,

भवत्या मातृतुल्याया नापरं किञ्चिदर्थये ।
मनस्तापविनाशार्थमाशीरेव प्रदीयताम् ॥

स्त्री—एवमस्तु देवताप्रसादात् । का गतिः ? वत्सस्य सन्तोषार्थम् एषा गृह्णामि ।

रत्ना—आमुञ्च, यावत् पश्यामि ।

स्त्री—एते आमुक्ताः । अथेदानीम् अनुमन्यस्व मां गमनाय ।

रत्ना—एवम्, गच्छ, शिवास्ते सन्तु पन्थानः । अथवा नाद्याप्येकाकिनी गन्तुमर्हसि, तत किन्नु खलु कुर्याम् ? आं दृष्टम् ! अरे, एहि यावत्त्वां लतापाशेन पादपस्कन्धे दृढं बद्ध्वा मातरं यथाभिमतं देशं प्रापयामि ।

स्त्री—वत्स, कथमद्याप्यस्य बन्धनमिच्छसि ? शान्तः खलु वत्सो मे व्यतीतकामः प्रत्यर्पितन्यासश्च ।

रत्ना—अम्ब, न जानासि गतिं तस्कराणाम्, विचित्रचरित्राः खल्वेते, तदिदमेव श्रेयः पश्यामि ।

पुरुषः—भद्र, नैवमधिक्षेप्तुमर्हसि, तस्करा अपि मानुषा एव, तेऽपि हृदयवन्तो हर्षकाले नृत्यन्ति, दुःखकाले च वाष्पं परिमुञ्चन्तो विक्लवा विलपन्ति, येनोपकरणेन युष्माकमिदं शरीरं, तेनैवोपकरणेन निरमायि तेषामपि शरीरं धात्रा । तथापि त एव यदा स्वकीये गेहे क्षुधा तृषा च मृत्युवक्त्रगतानात्मजनानन्नदानेन परिपोषयितुमसमर्था दुर्भिक्षपीडिते जनपदे प्रयत्नवन्तो भिक्षामप्यलभमानाः परितः परितप्यन्ते, तदैव स्वीयां दैवतवृत्तिं दूरे निर्वास्य राक्षसीं वृत्तिमवलम्ब्य स्वजनपोषणाय प्रवर्तन्ते । भद्र, मन्ये दुर्भिक्षपीडिते जनपदे न प्राप्तोऽसि दारिद्र्यगोचरतां येनैवं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाट्यविलासः

(पूर्वानुवृत्तः)

[निबन्धकः—श्रीदेवीप्रसादगुप्तः, वि. ए.-व्याकरणतीर्थः]

इरावतीतीव्रतरङ्गताडिता तपो नु तेपे नव-मालवीलता ।
इमां यतो धारिणिधारणव्रतः समालिलिङ्गे तरलोऽग्निमित्रकः[1] ॥१८॥

तपोवने तपोऽवने गतेन सा गतैनसा ।
अलोकि काप्यलौकिका सकुन्तला शकुन्तला[2] ॥१९॥

स्मरसि न चलचित्ते कामिनोः प्रेम नेदं
स्मर ! परमनिवारः सङ्गलुब्धोऽक्षिरागः ।
तदतिमृदुनि काये योषितां वञ्चितानां
'न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्' ॥२०॥[3]

यदुर्वशी विक्रम एव रक्ता वीरैकभावाः खलु वीरबालाः ।
औशीनरी यत् स्वसुखं जहौ[4] तत् कुले शिवीनां व्रतमात्मदानम् ॥२१॥

चन्द्रं गतः सूर्यगुणान् न भुङ्क्ते सूर्यस्थितश्चान्द्रमसीमभिख्याम् ।
दिव्योर्वशीं प्राप्य कवेः प्रसादाच्चन्द्रोऽप्यथादित्य इहास राजा ॥२२॥[5]

महेन्द्रवर्मा (about 625 A. D.)

नूनं कवीन्द्रः स महेन्द्रवर्मा मत्तोक्तिभिर्निन्दितबुद्धधर्मः ।[6]
यः सप्तमे प्रादुरभूच् शताब्दे राजा प्रहासे परमप्रवीणः ॥२३॥

---

1. मालविकाग्निमित्रम् (अत्र अग्निमित्रको वायुः खिन्नां लतामालिलिङ्ग इति प्रथमोऽर्थः, धरणिरेव धारिणिः । व्यङ्ग्यार्थस्तु चपलो राजा इरावतीनिगृहीतां मालविकां धारिण्याऽनुमत उपयेमे)
2. अभिज्ञानशाकुन्तलम् 3. Cp. The flight of love—Shelley.
4. विक्रमोर्व्वशीयम् III 'मूढ ! अहं खु अत्तनो' सुहावसाणेण अज्ज उत्तस्य सुहं इच्छामि ।'
5. Cp. कुमारसम्भवम् I, 43. 6. मत्तविलासप्रहसनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीहर्षः ॥ (about 606-648 A. D.)

स्वयमयमवनीशो[1] रञ्जकः सज्जनानां
कृतसुगतसपर्योऽभूच्च षष्ठे शताब्दे ।
मृदुपदविनिवेशात् प्राप हर्षः प्रकर्षं
त्रितय इव दृशां तन्नाटिकानां[2] प्रजेशः ॥२४॥

कण्ठेऽस्य 'प्रियदर्शिका' विलसते कीर्त्तिश्च 'रत्नावली'
'नागानन्द'मयं तथाप्युदयनानन्देन्दुरूपो दधौ ।
ब्रह्मानन्दसहोदरः सहृदयैर्वेद्यैकमोदो यदि
जीवातुः कवितावयस्य वनितासार्थस्य धन्यः कविः ॥२५॥

भवभूतिः ॥ (about 700 A. D.)

वेदान्ते निपुणः प्रकाशयति तां नित्यां[3] कलामात्मनः
वीरं यश्चरितं तथोत्तरमपि श्रीरामभक्तो व्यधात् ।
आसीद् यश्च सभाकविर्नरपतेः श्रीमद्यशोवर्मणो
यं वेदर्तुऋतौ जघान ललितादित्यः शकाब्दे पुरा ॥२६॥

करुणतरुणचित्तो वीरवीभत्समिश्रः
कवयति भवभूतिर्वश्यवाग् ब्राह्मणोऽसौ ।
यदतिशयपवित्रं प्रेम दाम्पत्यमूलं
किमु मधुरतयेदं स्पर्द्धते चौर्यरत्या ॥२७॥

दलति झटिति चित्तं ग्रावृण इत्यस्तु[4] नाम
ध्वनितगुरुगुणान्तर्मार्दयेद् वा धनुस्तत्[5] ।
जटिलखरसमासैर्गाढपाशैः परं यः
कृतरुजदृढबन्धस्तं न पश्येत् किमन्धः ॥२८॥

---

1. हर्षवर्द्धन-A. D. 606.
2. प्रियदर्शिका-रत्नावली-नागानन्दरूपनाटकत्रितये राजायं नयनत्रये प्रजेशः शिव इव प्रसिद्धिं गत इति भावः ॥
3. उत्तरचरितम् I,2.
4. उत्तरचरितम् I,27.
5. उत्तरचरितम् VI,1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविरसि भवभूते ! मार्मिकस्तत्त्ववेत्ता
पुनरिह गुरुगर्वः शोभते किं त्वयीत्थम् ।[1]
अपलपति न सत्यं केतकि ! त्वत्सुगन्धं
मधुकरकरपत्रे कण्टको दुर्निवारः ॥२६॥
विकसति नवभिन्ना 'मालती माधवे' यत्
प्रसरति मकरन्दो मन्दमन्दं समीरे ।
सकलतरुणचित्तोन्मादकाः पञ्चबाणा
मदनमधुरसारं भावमुद्बोधयन्ति ॥३०॥

विशाखदत्तः (A. D. 900 or earlier)

अथाष्टमे भाति शके शताब्दे विशाखदत्तो वरनाट्यकारः ।
न मुद्रया [2]राक्षसमेव सोऽयं समग्रहीत् किन्तु सतां मनोऽपि ॥३१॥

भट्टनारायणः (7th or 8th Century)

योऽयं प्रौढबलेन गौडनरपेणाभ्यर्थ्य संस्थापितो
वङ्गे ब्राह्मणवंशपूर्वपुरुषः श्रीभट्टनारायणः ।
सोऽयं दीर्घसमासबन्धरचनादक्षः कविग्रामणीः
कृष्णायाः प्रतिसंजहार दयया वेणीं[3] सहैवाधिभिः ॥३२॥
ओजः प्रकाशितमलं सुकवित्वशक्त्या
वीरो रसो विरचितो ननु भीममूर्त्या ।
किन्त्वेक एव तव दारुण एष दोषो
नाट्योचितो न हि कृतो घटनानिवेशः ॥३३॥

अनङ्गहर्षः ॥ (A. D. 855-83)

अथाष्टमे नाम शके शताब्देऽभून्नाटकं तापसवत्सराजम् ।
अनङ्गहर्षः कविरस्य कर्त्ता रत्नावलीसारसमाश्रयेण ॥३४॥

---

1. मालतीमाधवे I, ये नाम केचिदिह etc. 2, मुद्राराक्षसम्
3. वेणीसंहारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुरारिः ॥ (Middle of the 8th Century)

श्रीवर्द्धमानतनयस्तदनु प्रजातः श्री'बालवाल्मिकि'कविः प्रथितो मुरारिः ।
भूत्वाऽप्यनर्घ इह यस्य तु राघवोऽयं प्रच्छादितो हि भवभूतिसितप्रलेपैः[1] ॥३५॥

राजशेखरः ॥ (800-900 A. D.)

कर्ता श्रोत्ररसायनस्य वचसः श्रीरामभक्तः कवि-
र्बालं [2]भारतमेष रामचरितं पीयूषरस्यं जगौ ।
चौहानान्वयपुण्यशेखरमणिः सोऽयं शताब्दे नवे
सञ्जातः किल राजशेखरकविः काव्यस्य मीमांसकः ॥३६॥
कर्पूरोद्भव[3]मञ्जरीं व्यरचयद् यः प्राकृताह्लादकः
सोऽयं क्रीडति शालभञ्जिभि[4]रितः कोऽयं नवो विस्मयः ।
यत् तस्य प्रथमप्रणामविषयेऽभून्मान्मथो[5]मन्मथो
देवस्तत्र वितर्क्यमस्ति सुतरां बालोऽपि रत्यां रतः ॥३७॥

क्षेमीश्वरः ॥ (A. D. 893-907)

चण्डः[6] कौषिक एष आगत इव ज्वालाकुलः पावको
भार्या कण्टकभिन्नचारुचरणा पुत्रः श्रमान्मूर्च्छति ।
इत्थं दैवकदर्थितं ननु हरिश्चन्द्रं तदेकाश्रयं
कारुण्याश्रुकणार्द्रकान्तवचसा क्षेमीश्वरोऽजीवयत् ॥३८॥

दामोदरः ॥ (1100 A. D.)

रामाश्रयं सुविपुलं जलधिं यथैतद्
दामोदरस्तु चरितं ललितं ववन्ध ।

---

1. श्रीभवभूतिकवे रामाश्रयनाटकस्य यशःप्रकर्षात् 'अनर्घराघवनाटकं' न केषामपि दृष्टिमाकर्षतीति भावः । तेन च भस्माच्छादित इति प्रौढोक्तिः ।
2. बालभारतम्, बालरामायणम्
3. कर्पूरमञ्जरी
4. विद्धशालभञ्जिका
5. विद्धशालभञ्जिका I, 1.
6. चण्डकौषिकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेनैव राघवपदाम्बुजभक्तकाव्यं
केचित् कृतं हनुमतेति समामनन्ति ॥३६॥
भवदहनविशुष्यत्क्लान्तभक्त्यार्द्रचित्ते
रघुपतिचरणाङ्के गाढमन्तः प्रविष्टः ।
भुवि जलधिगतोऽपि श्रूयते नाटकांशः[1]
शर इव कुसुमेषोरेष पुङ्खावशेषः[2] ॥४०॥

कृष्णमिश्रः (1042-98 A. D.)

प्रबोधचन्द्रोदयनिस्तमस्कं कृत्वा मनो राजति कृष्णमिश्रः ।
धन्यः स राजा खलु कीर्तिवर्मा सभाऽस्य यत् तं सुकविं दधार ॥४१॥

विल्हनः ॥ (1100. A. D.)

विल्हनोऽनिहिलवारभूपतेः, कर्णसुन्दरिकविः सभास्थितः ।
कर्णदेव[3]चरितं पुरा जगौ रुद्रसंख्यकशके शतावृते ॥४२॥

जयदेवः ॥ (1200 A. D.)

प्रसन्नो राघवो यस्मिन जयदेवः कविर्मतः ।
आसीत् पक्षधरश्चन्द्रः शकाब्दे द्वादशे[4]शते ॥४३॥

श्रीरूपगोस्वामी ॥ (1500 A. D.)

श्रीकृष्णचैतन्यमहाप्रभोर्यो लीलासहायो निजमेव रूपम् ।
तद्भक्तियोगेन भुवि प्रसिद्धोऽभून्माधवोऽयं ललितो विदग्धः[5] ॥४४॥

---

1. महानाटकं खलु सागरे निक्षिप्तं हनूमतेति कथा श्रूयते ।
2. महानाटकम् II, 41. 3. कर्णसुन्दरीनाटिका
4. प्रसन्नराघवरचयिता जयदेवो नैयायिककेसरिणः पक्षधरमिश्रादनन्य इति केचिद्वदन्ति ।
5 गौराङ्गशिष्योऽयं रूपगोस्वामी ललितमाधवं विदग्धमाधवञ्च रचयामास । गौराङ्गस्य स्वरूपमेव भक्तियोगेन माधवं भुवि ललितं विदग्धञ्च कृत्वा प्रकाशयामासेति प्रौढोक्तिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकालीपदतर्काचार्यः ॥ (१६३८ खृः)

पक्षत्वव्याप्त्यभावाद्यतिशयगहनं कर्कशं तर्कशास्त्रं
छात्रेभ्यः शर्करेव स्वदत इह सदा यत्कृपावेशलेशात् ।
नव्यः काव्यस्य कर्त्ता विविधबहुमतग्रन्थटीकाप्रणेता
श्रीमत्कालीपदार्यो मनसि स वसतात् सर्वकालं गुरुर्मे ॥४५॥

भूपाले यवने समस्तभुवने शीर्णे च काव्याम्बुधौ
सोऽयं संस्कृतपर्षदं कवितया संह्लावयत्यादरात् ।
गङ्गा वङ्गमिवाङ्ग शीतलजलैर्विद्याम्बुदानेन वा
चित्तं नित्यमयं पुनाति दयया विद्यार्थिसार्थस्य च ॥४६॥

धन्येन दृष्टं गुरुपादपद्मं किञ्चित् पटुत्वं वचसाञ्च लब्धम् ।
नित्यञ्च कालीपदपुण्यसङ्गाद् ईशानवृत्तिर्हि मयापि लब्धा[1] ॥४७॥

मानसे ललितपादमयन्ती राजते नलयुता दमयन्ती[2]
नाटकेऽपि मधुरा चतुरा सा यां पुरा प्रचकमे च तुरासाट् ॥४८॥

इति कृतिभिरसंख्यैर्भूषणैर्भूषितोऽयं
हरतु सरसचित्तं नाट्यवेदो बुधा ! वः
मयि तु मतिविहीने नित्यकारुण्यपूर्णा
गुणलवपरितोषाः साधवः शं वदन्तु ॥४९॥

भारती भारतीयेयं कविता कवितापदा ।
सर्वदा सर्वदा भूयाद् भवतां भवतारिणी ॥५०॥

---

1. कालीपदाब्जाश्रयणादीशानपदवी भवत्यदवीयसीति पुराणवार्त्ता । मयापि ईशानवृत्त्यभिधेयः पुरस्कारः श्रीकालीपदतर्काचार्य-प्रसादादेव लब्ध इति मन्यते ॥

2. नलदमयन्तीयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतरञ्जकुतूहलम्

[सम्पादकः—श्रीचिन्ताहरणशर्मचक्रवर्ति-काव्यतीर्थः एम्. ए.]

क्रीडायामासक्तिर्मानवानां स्वाभाविकीति निर्विवादं वचः। सा चास्मदीयानां पूर्वपुरुषाणां नानल्पासीदिति पुरातनग्रन्थनिचयाद् विशेषतः स्फुटीभवति। परं तत्रानेकक्रीडानामधुनाऽप्रचरद्रूपाणां सुतरां कौतुकमावहतां समुल्लेखसद्भावेऽपि तां तामधिकृत्य स्वल्पीयांस एव समुपलभ्यन्ते निबन्धा गीर्वाणवाणीबद्धाः प्राक्तनक्रीडापद्धतिवर्णनमुखराः। तेन चैतादृशानामुपलभ्यमानानां निबन्धानां यथाशक्ति संग्रहणं प्रकाशनञ्च सर्वथा विधेये इति कृत्वा 'बुद्धिबल'-'शतरञ्जे'त्यादिसंज्ञाभिरिदानीं परिचयमादधतः प्रथितप्रचारस्य चतुरङ्गस्य प्राथमिककृत्यमुपवर्णयत् शतरञ्जकुतूहलं नाम श्लोकदशकात्मकं नातिप्राचीनं निबन्धरत्नमत्र प्राकाश्यं नीयते यथालब्धटीकासमेतम्। क्रीडान्तरं कलाविशेषञ्चाधिकृत्य विरचिता अन्येऽपीदृशाः सरलसरला निबन्धाः समुपलभ्येरंश्चेत् तानप्येवमेव प्रकाशमुषपादयितुम् अशिथिलप्रयत्नैर्वर्तितव्यमस्माभिः। वाचकमहाभागैश्चात्र दत्तावधानैर्निबन्धसमाहरणे कृतोद्योगैर्भाव्यमिति नोऽभ्यर्थना। विषये चात्र ये नाम ग्रन्था ग्रन्थांशा वाऽस्माकं दृष्टिविषयं गताः श्रुतिपथमुपागता वा तेषां सामासिकः परिचयो नाप्रासङ्गिक इत्यधस्तान्निरूप्यते—

(१) गौडोद्भव-स्मार्तप्रवरशूलपाणिकृतत्वेनानुमिता चतुरङ्गदीपिका नाम कलिकाता-संस्कृत-सिरिजग्रन्थमालायां लब्धप्रचारा। ग्रन्थेऽत्र स्मार्त-रघुनन्दनकृततिथितत्त्वधृतवर्णनमाधिक्येनान्तर्भवतीति परिलक्ष्यते।

(२-३) त्रिवेङ्गडाचार्यकृते विलासमणिमञ्जरी बुद्धिबलसप्तकं च कोल्हापुरतो गणेशरङ्गकुलकर्णीहलदीकरेण प्राकाश्यमधिगमिते।

(४) गञ्जिकाखेलनरचयितुर्ज्योतिर्विच्छिवसूनुशङ्करसुतगिरिधरस्य कृतिश्चतुरङ्गविषया, यस्याः स्वल्पीयानेवांशो वङ्गीय-रयालएसियाटिक-सोसाइटी-ग्रन्थालये विराजते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५) चतुरङ्गपद्धतिर्यस्या लिपिर्नेपालराज्य उपलभ्यत इति चतुरङ्ग-दीपिकाभूमिकायां स्थितम्।

(६) दिव्यमालिकाख्यश्चतुरङ्गदीपिकाधृतग्रन्थः।

प्रकाश्यमाननिबन्धस्य पाठनिरूपणे कलिकातानगरीमलंकुर्वाणस्य रयालएसियाटिकसोसाइटीतिख्यातस्य परिषद्वर्यस्य ग्रन्थालयगतं A, B, C, D संकेतनिरूपितं हस्तलिखितपुस्तकचतुष्टयमेवावलम्बनं जातम्। तत्र संकेतपरिचयस्तावदेवम्—

A—८२२२ संख्यकं पुस्तकं श्लोकनवकात्मकं मूलमात्रम्।

B—९७३७ संख्यकं पुस्तकं श्लोकाष्टकात्मकं सटीकम्।

C—८२२३ संख्यकं पुस्तकं श्लोकनवकीयटीकात्मकम्

D—इण्डियनमिउजियम्-गृहादानीतेषु सोसाइटीगृहे रक्षितेषु पुस्तकेषु ३४७९ संख्यकं पुस्तकं श्लोकनवकात्मकमन्ते टीकामात्रं त्रुटितम्।

A, C चिह्नितपुस्तकयोः स्वामी अनेकपुस्तकाधिपतिर्वाराणसेयो रघुनाथमालवीयो नाम, यदीयनामाक्षराणि पुस्तकैकदेशयोरङ्कितान्या-साद्यन्ते।

गणेशं नमस्कृत्य विष्णवङ्घ्रियुग्मं
गुरून् सर्ववन्द्यान् विशालान् दयाब्धीन्।
बुधानां मनोज्ञं प्रशस्तं हि बुद्धे-
र्बलाख्यं वयं कुर्महे क्रीडनं सत्[1] ॥१॥

---

1 'A' which alone has the text of the verse has the following introductory line:

अथ शतरञ्जाख्यो वा बुद्धबलाख्यो ग्रन्थो लिख्यते। श्रीराधां प्रति कृष्णोवाच।

The last word in the third line occurs in the Ms as बुद्धि.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नत्वा महेशानमुमापतिं गुरोर्विधाय चित्ते चरणारविन्दम् ।
कुर्वे शुभां बुद्धिबलाभिधस्य टीकामहं क्रीडनकस्य सूक्तिम् ॥

अथ विघ्नविघाताय मङ्गलमाचरति गणेशमिति । गणानां प्रमथानामीशः स्वामी तं नमस्कृत्य नत्वेत्यर्थः । उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीयस्त्वान्नमःस्वस्तीत्यादिना चतुर्थी न किन्तु द्वितीयैव । विघ्नबाहुल्यात् पुनर्मङ्गलमाचरति विष्णवङ्घ्रि इति गुरूनिति च । दयाब्धीन दयासमुद्रान् । एकस्यां ल्यबन्तक्रियायां त्रयाणां सम्बन्धः । वयं बुधानां मनोज्ञं प्रशस्तं बुद्धिबलाख्यं यत् क्रीडनं हीति निश्चयेन कुर्महे ।

मतिमतामतिमत्यभिवृद्धये
विरचितं शतरञ्जकुतूहलम् ।
नरशतान्यनुरञ्जयति ध्रुवं
तदुदितं शतरञ्जमतोऽर्थतः[1] ॥२॥

श्रीमते रामानुजाय नमः । कचित् कदाचन कुञ्जस्थां राधां शतरञ्जकुतूहलाख्यक्रीडनस्य शब्दार्थं खेलनप्रकारं च पृच्छन्तीं कृष्णो दर्शयति । इत्यर्थं प्रकारं प्रदर्शयति ।

सदूर्णामये वस्त्रखण्डे विशाले
चतुःकोणयुक्ते समन्तात् समाने ।

1 Verse 2 with the portion of the commentary following it 'apparently not on the verse in question' is found only in B where the reading of the first line is मतिमतां मतीमत्यभिवृद्धये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुःषष्टिकोष्ठानि कौषेयसूत्रै-
र्विधायादिकोणादिकोष्ठादिभाद्याः ॥३॥

सदूर्णामय इति। हे राधे सदूर्णामये सति सुन्दरे ऊर्णाप्रचुरे विशाले महति चतुःकोणयुक्ते चत्वारश्च ते कोणाश्च तत्सहिते समन्तात् समाने सर्वतस्तुल्ये वस्त्रखण्डे हस्त्यादिस्थितिपात्रगृहे विषये कौषेयसूत्रैः पटतन्तुभिः चतुःषष्टि-कोष्ठानि हस्त्यादिगृहाणि विधाय कृत्वा आदिकोणादिकोष्ठात् आदिः पूर्वश्चासौ कोणश्च तस्य आदि प्राक् च तत् कोष्ठं च तस्मात् तथा इभाद्या हस्त्यश्वादयः सारिकाः स्थाप्याः।

इति स्थापनीया गजाश्वोष्ट्रसेना-
धिराट्सार्वभौमक्रमेलार्वनागाः।
ततः पत्तयो[1]ऽष्टौ गजाद्य[2]ष्टकाना-
मधस्तात्तिरःस्थाः क्रमेणार्पणीयाः ॥४॥

इतीति। हे राधे अनेन प्रकारेण गजाश्वोष्ट्रसेनाधिराट्सार्वभौम-क्रमेलार्वनागाः प्रथमकोष्ठे हस्ती द्वितीये हयः तृतीये उष्ट्रः चतुर्थ सेनाधिराट् पञ्चमे सार्वभौमः सर्वेश्वरः षष्ठे क्रमेलः उष्ट्रः सप्तमे अर्वा अश्वः अष्टमे नागः हस्ती एते अष्टौ गजादिगजान्ताः स्थानेष्व[ष्ट]सु तिरःस्थाः तिरोभागे क्रीडितुर्मम पुरः स्थापनीयाः। ततः गजाश्वोष्ट्रकाणां सारिकाणामधस्तात् अधोभागे अष्टसु कोष्ठेषु अष्टौ पत्तयः[3] पदातयः सारिकाः तिरःस्थाः तिरोभागस्थाः क्रमेणार्पणीयाः आरोप्या इत्यर्थः।

---

1 पतयो० A 2 गजाश्व A. 3. पतयः C

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमात्यालये सार्वभौमं निदध्या-
दमात्यं तथा सार्वभौमस्य कोष्ठे ।
इति व्यत्ययादन्यहस्त्यादयस्ते
प्रतिस्पर्धिनोऽप्येवमेवाधिरोप्याः ॥५॥

अमात्यालये इति । हे राधे क्रीडायां प्रतिस्पर्धिनः प्रतिस्पर्धिरूपस्य कलत्रस्य तवापि पुरः अमात्यालये सेनानीकोष्ठे सार्वभौमं सर्वेश्वरं निदध्यात् आरोपयेत् । तथा सार्वभौमस्य कोष्ठे अमात्यं सेनान्यं निदध्यात् आरोपयेत्, इति व्यत्ययात् एवं वैपरीत्यात् । अन्यहस्त्यादयः अपरगजादि-गजान्ताः यथा मम आरोपिताः तथा तवापि क्रीडास्थाने एवमेव आरोप्याः आरोपणीया इत्यर्थः ।

ततः क्रीडितव्यं मनीषाविदग्धै-
र्बलं चाबलं[1] स्वस्य दृष्ट्वा परस्य ।
गतिज्ञानमेषां विना क्रीडनं नो
भवेत् तत् पुर[2]स्ताद्विचार्यं विशेषात् ॥६॥

तत इति । हे राधे ततः स्थानद्वये हस्त्याद्यारोपणानन्तरं मनीषा-विदग्धैः सुबुद्धिमद्भिः स्वस्य निजस्य परस्य प्रतिस्पर्धिनः सारिकाणां बलं च पुनः अबलं निर्बलत्वं च दृष्ट्वा विलोक्य क्रीडितव्यं खेलनीयमित्यर्थः । एषां हस्त्यादीनां गतिज्ञानं विना ऋते क्रीडनं नो भवेत् न स्यात् । ततः हस्त्यादीनां गतिज्ञानं पुरस्तात् प्रथमतः विशेषात् आधिक्येन[3] विचार्यं विचारणीयमित्यर्थः ।

---

1 Omitted in B. 2. भवेत्तसु० B 3 अधिकेन C, D.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गजः सप्तकोष्ठान्तमेकाद्यवक्रो
यथापेक्षमूर्ध्वं तिरश्चैति पश्चात् ।
हयः सार्धकोष्ठद्वयं वासमन्तात्
क्वचिन्मध्यगाम्यष्टकोष्ठानि रक्षेत् ॥७॥

गज इति। एषां गजादीनां गतिप्रकार उच्यते। गजगतिज्ञानमाह। गजाः हस्ती अवक्रः सरलः[1] सप्तकोष्ठान्तं सप्तकोष्ठपर्यन्तं एकादि एकं स्वस्थानकोष्ठम् आदौ यस्मिन् कर्मणि ऊर्ध्वम् ऊर्ध्वभागे तिरः तिरोभागे पश्चात् पृष्ठभागे यथापेक्षं यादृशी चलनेच्छा भवेत तथा एति गच्छति। हयगतिज्ञानमाह। हयोऽश्वः सार्धकोष्ठद्वयम् अर्धेन सह वर्तमानं कोष्ठद्वयम् इति आ समन्तात् उपर्यधस्तिरःसर्वभागेषु एति गच्छति। क्वचिन्मध्यगामी स्यात्। तर्हि अष्टकोष्ठानि रक्षेत अष्टस्थानेषु तस्य बलं तिष्ठतीत्यर्थः[2]।

यथापेक्षमेकादिसप्तान्तकोष्ठं
व्रजेद् वक्रगामी समन्तान्महाङ्गः ।
अमात्यो विना वाजिनश्चैकगत्या
समग्रा गतीः सञ्चलेत् सर्वगामी ॥८॥

उष्ट्रगतिज्ञानमाह यथेति। महाङ्गः उष्ट्रः वक्रगामी वक्रं गच्छतीति तथा असरलगामी सन् यथापेक्षं क्रीडितुर्यथेच्छं एकादि एकमारभ्य सप्तकोष्ठान्तं सप्तकोष्ठपर्यन्तं समन्तात् सर्वतः व्रजेत्। सेनानीगतिज्ञानमाह। अमात्यः सेनानीः वाजिनोऽश्वस्यैकगत्या विना अश्वस्यैकगतिं त्यक्त्वा

1 Found only in B. 2. बलतीत्यर्थः A and B।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वगामी उपर्यधस्तिरोगामी सन् समस्ता हस्त्यादिकृता गतीः सञ्चलेत् गच्छतीत्यर्थः ।

पुरः पृष्ठतः पार्श्वयोः कोणकेषु
चतुर्ष्वेककोष्ठं चलेत् सार्वभौमः ।
तुरङ्गस्य गच्छेद् गतिं ह्येकवारं
न कस्यापि लग्ना स्मृतिर्यावदस्य[1] ॥९॥

सार्वभौमस्य गतिमाह पुर इति । हे राधे सार्वभौमः सर्वेश्वरः पुरः अग्रभागे पृष्ठभागे पार्श्वयोर्द्वयोः कुक्षि[2]कक्षप्रदेशयोः चतुर्षु कोणकेषु सर्वकोणेषु एककोष्ठं चलेत् गच्छेदित्यर्थः । यावत्कालपर्यन्तम् अस्य सार्वभौमस्य क्रीडायां कस्यापि द्वितीयक्रीडितुः प्रतिस्पर्धिनः सेनान्यादि-पदात्यवसानस्य स्मृतिः संसरणं न लग्ना भवेत तावदेकवारं सार्वभौमः तुरङ्गस्य अश्वस्य गतिं सार्धद्वयरूपां होति निश्चयेन गच्छेत् गमनं कुर्यादित्यर्थः[3] ।

पदातिश्चलेदग्रतः कोष्ठमेकम्
ऋजुर्मारयेद् वक्रगत्या[न्य][4]कोष्ठे ।

---

1 The following colophon follows the verse in B: शतरञ्जकुतूहलाख्यं समाप्तोऽयम् । 2 कक्षि C, D.

3. B has the following colophon after this:—इति शतरञ्जकुतूहलटीका ।

4 Omitted in Ms.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न पादं क्वचिद्धारयेत् पृष्ठभागे
व्रजेद् यस्य कोष्ठं भजेत्तत्स्वरूपम्[1] ॥१०॥

पदातिसारिकागतिमाह पदातिरिति। हे राधे पदातिनाम्नी सारिका अग्रतः अग्रभागे ऋजुः सरलः सन् एकं कोष्ठं चलेत् गच्छेदित्यर्थः। प्रतिस्पर्धिहस्त्यादिसारिकां वक्रगत्या वक्रतया अन्यकोष्ठे तिर्यक्कोष्ठे मारयेत् हन्तीत्यर्थः। पदातिः क्वचित् कदापि पृष्ठभागे पश्चाद्भागे पादं स्वचरणं न धारयेत् न स्थापयेदित्यर्थः। प्रतिस्पर्धिनः हस्त्यादिसारिकाणां मध्ये स्वपदातिर्यस्य कोष्ठं व्रजेत् गच्छेत् तत्स्वरूपं हस्त्यादिरूपतां भजेत् प्राप्नुयादित्यर्थः। सार्वभौमं विनेति शेषः। हे राधे अनया रीत्या शतरञ्जकुतूहले क्रीडितव्यमिति[2]।

---

1. The verse is found only in A which has the following colophon: इति श्रीराधां प्रति श्रीकृष्णोक्तशतरञ्जकी[डनम्]

2 C has the following colophon and Post-colophon statement after this: इति श्रीकृष्णोक्तं शतरञ्जकुतूहलाख्यं समाप्तम्।

संवत् १९१४ फाल्गुन कृष्ण १३ शनिवासरे लिखितमिदम् श्रीमदक्षर-पाठशालाविद्यार्थिनामुपकृतये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपदेशपरम्परा

वर्णधर्मः

[स्वनामधन्य-जगद्गुरु-श्रीशङ्कराचार्य-श्रीकाञ्ची-
कामकोटिपीठाधीशानाम्]

अस्माकं देशे ब्रह्म-क्षत्रिय-वैश्य-शूद्रा इति चत्वारो वर्णा व्यवस्थिताः। इमान् वर्णान् जातिरिति वदामः। तांश्चतुरो वर्णानधिकृत्य विषयाश्शास्त्रेषूल्लिख्यन्ते, एकैकवर्णस्यापि प्रत्येकं कर्माणि प्रविभक्तान्युच्यन्ते। एकस्य कर्मापरः कर्तुं नार्हति। एकैकस्य बहुविधानि नियन्त्रणानि वर्तन्ते। एकः कृषीवलः पञ्चकच्छं परिदधानो यज्ञोपवीतं पवित्रं च धारयन् यदि समागच्छेत्, अस्माकमाक्रोशो भवति। अत्यन्तमत्यतिष्ठदिति च वदामः। ब्राह्मणो धूमपानं पिबन्, पञ्चकच्छमपरिदधानो यज्ञोपवीतमधारयंश्च यद्यागच्छति, तमयोग्य इति वदामः। अन्त्यजः कृषीवलश्च सुरां पिबति चेत्, तावत् न कुप्यामः, ब्राह्मणः पिबति चेत्, जातितो भ्रंशयामः। एतावत्यो जातयोऽप्येकमेव मतमात्मनो मन्यन्ते चेदपि, यद्येकस्य कर्म समीचीनम् अथापि कोपः समापतति, यद्यसत् कर्म, तथापि कोप आयाति; यदि ब्राह्मणो लाङ्गलं गृहीत्वा कर्षति, न सदाचार इति परिहसामः। यद्यन्त्यजो वेदमधीते, कालो दुष्ट इति न्यूनतां वदामः। एवमेकस्मिन्नेव मते बहुविधा भेदा वर्तन्ते। परस्परं सहोपविश्य न भोक्तुमर्हामः, एकां जातिं न स्प्रष्टुमर्हामः; कश्चन निकषाऽपि न समागच्छेत्, एकस्मिन्नेव गृहे न सह वस्तुमर्हामः, संकरविवाहं न कर्तुमर्हामः, एकेन कृतमपरो न कर्तुमर्हति, इत्येवं यावन्तः कियन्तोऽपि भेदा वर्तन्ते। चत्वारो वर्णा इति तु नाममात्रेणैव, एकैकस्मिन्नपि सहस्रशो विभागा वर्तन्ते। इतोऽपि बहवो विभागा उद्यन्त एव वर्तन्ते। एवमिदं मतं विचित्रमस्ति। पूर्वं कदाचन सर्वत्र लोकेष्विदमेकमेव मतमासीदित्यवदम्। तादृशे महनीये मत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं परस्परं विरुद्धास्सन्दर्भा बहवो वर्तन्ते। अपरेष्वपि मतेषु विधयो निषेधाश्च वर्तन्ते, परं तु तेषु मतेषु विद्यमानानां सर्वेषामेकविधा एव विधय एकविधा एव प्रतिषेधाश्च वर्तन्ते। अस्मासु तु सत्यप्येकस्मिन्नेव मते विधयः प्रतिषेधाश्च बहुविधा वर्तन्ते। यद्येकं कर्म कश्चन करोति, धर्मो भवति। तदेवान्यश्चेत् करोति, अधर्म इति वदामः।

कश्चन महान् एकमाश्चर्यं वदति—वयं सर्वेऽपि म्रियामह इति न चित्रम्। अस्मात् शरीराद् विद्यमानेष्वपि नवसु द्वारेषु प्राणोऽनिर्गच्छन्नेवातिष्ठत इति खलु! तदेव महच्चित्रमिति। तद्यथा—

नवद्वारे शरीरेऽस्मिन्नायं स्रवति सन्ततम्।
जीवतीत्यद्भुतं तत्र गच्छतीति किमद्भुतम्?॥

तद्वद् बहुविधानां विशयानां वैलक्षण्यानां च पात्रमिदं मतं कियतोऽपि कालाद् जीवति खलु! इत्येतत् चिन्तयित्वा बहु चिन्तयितव्यम्।

चण्डालाश्चर्मकाराश्चान्योन्यं वैषम्यं परिपालयन्ति। सर्वत्र भेदः प्रतीयते। देवालयं गतेषु ब्राह्मणोऽर्धमण्टपं यावदेव गन्तुमर्हति। अन्ये बहिः स्थातुमर्हन्ति। केचन ध्वजस्तम्भान्त एव स्थातुमर्हन्तीति वदन्ति। एवमेवास्माकं गृहस्यान्तरपि वैषम्यं वर्तते। केचनान्नश्राद्धं कर्तुमर्हन्ति। केचनामश्राद्धमेव कर्तुमर्हन्ति। कानिचन कर्माणि केचन वेदोक्तविधिनैव कर्तुमर्हन्ति। तान्येव कार्याणि यदि केचन वेदोक्तविधिना कुर्वन्ति, हानिर्भवेत्। वेदस्य त्यागे केषांचन पापम्, वेदस्योच्चारणे केषांचन पापम्, एतावन्तो विभेदा वैषम्याणि च कुतो वर्तन्ते?

एतान् विषयान् सर्वान् वदामः, इत्येवावमान इति मन्यामहे; एते यदि समूलं नश्यन्ति, समीचीनमिति च मन्महे। एतानि वैषम्याणि बहव उत्कृष्टाश्चांशायन्त, तादृशस्यास्मदीयस्य मतस्यायं कलङ्क एवेति केचन वदन्ति। यदि सम्यक् समीक्ष्यते, सर्वत्रैवमेव वैषम्यं वर्तते। समीचीनोंऽश एकोऽपि नास्तीत्यपि कदाचन प्रतिभाति। इत्थं बहूनामेषु विषयेषु मनो धुरुधुरायते। केचन यत्किंचिद् विज्ञाय स्वयं समादधते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदाचन केषुचनैवं विभेदान् निदर्श्य क्रियासमभिव्याहारेण वदत्स्वस्माकं मनोऽतीव दुःख्यति। केचन तैरेव मिलन्ति। तथापि स्वाचरणं परित्यक्तुं न मनो धृष्णोति। चण्डालमारभ्य यदि स्वीयसमुदाचारः परित्यक्तव्यः, परिश्राम्यति। यद्येतादृशान् सर्वान् विषयानालोचयामः न किमपि प्रतिभाति।

अस्माकमेव देशे देशान्तरीया अस्मान् शासते। वयं सर्वेऽपि तत्परतन्त्रा व्यवहरामः। केषुचन देशेषु च तद्देशस्था एव शासते। अस्माकं परिस्थितिम् सर्वेऽपि राजनीतिविशारदा दास्यमिति वदन्ति। अस्य दास्यस्य निदानम्—वयमस्मासु काँश्चन नियन्त्र्यादासयाम, इति पापमेवेति वदन्ति। इदं सर्वेऽपि बहुषु स्थानेषु श्रुतवन्त एव स्युः।

अस्मद्देशीया अपरान् बहून् देशान् शुल्ककर्मणो वाणिज्यस्य च कृते गच्छन्ति। तेषु देशेष्वस्मदीयान् तद्देशीया नगरशासनस्थानेषु हूणावसथ-विभागेषु न वासायानुमन्यन्ते ; शकटेष्वपि नारोपयन्ति, आवसथादीन्यपि पृथगेव, तेषाम् संचारायापि पृथगेव स्थानम्, किमस्य निदानम् ? वय-मस्मासु काँश्चन यददूयकरवाम, तदेव कारणमिति वदन्ति।

तेषु देशेष्वारोहायोग्येषु शकटेषु यदि वयमारोहामः, तेऽस्मान् ताडयन्ति। तदेव तस्य प्रायश्चित्तम्। परं त्वस्माकं ग्रामेऽस्मास्वनुष्ठान-निष्ठाः स्वारोहयोग्ये शकटे यदि तदयोग्यः कश्चनारोहति, स्वयमुपोष्य स्नान्ति। पूर्वोक्तेषु तेषु देशेष्वपराधिनो दण्ड्यन्ते, अत्र तु एकस्मिन्न-पराध्यत्यपरः स्वयमेव शिक्षामङ्गीकरोति।

इदं वैषम्यं क्षुद्रं प्रतिभायात्, तत्त्वमालोचयामश्चेत्, इदमेव महद्वैषम्यम्।

सांप्रतं महत्स्वेवास्माकं धर्मः किञ्चिदनुवर्तते। वयं यदि पक्तुमर्हामः, चुल्यां शुष्कपत्राणि तृणानि च प्रक्षिप्याग्निमुद्बोधयामः। वृष्टिकालो वर्तते, अग्निः शाम्यन्निवावतिष्ठते, केचनैवाग्निकणा अवशिष्यन्ते, किं तैः करिष्यामः ? इति न तान् वयं परित्यजामः, वीजयित्वा परिश्रम्य च पुनरपि ज्वलयितुं यतामहे न वा ? तथैव वयं पूर्वजानामाचारं धर्मं च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वत्र प्रचारयितुं शक्नुमः, इति मम महती प्रत्याशा। तत एवाहमिदं ब्रवीमि।

अस्माकं मतं यावतः कियतोऽपि युगान् दीर्घं जीवन समन्वारभते। किमपि मूलमासीदित्येवेदं मतमेतावन्तं कालं प्राणिति। किमपि मतमेतावद्दीर्घायुरासीदिति न जानीमः। अस्माकं मतमहमस्माकं देवालयमिव मन्ये। अस्माकं देवालया अन्येषां देवालया इव न न स्वच्छा वर्तन्ते। अन्येषां देवालयास्तु सुधालिप्ताः स्वच्छा रक्ष्यन्ते। अस्माकं देवालये तूद्भिज्जानां कक्षवृक्षादीनां संख्यैव नास्ति। सर्वानपि संवहन्तोऽस्माकं देवालयास्तिष्ठन्ति। मतान्तरावलम्बिनां देवालयास्तु प्रतिद्वित्रवर्षं सकृत पुनरनुद्धृता एकं क्षणमपि नावतिष्ठन्ते। अस्माकं देवालयाः शिलाभिर्निरमीयन्त। बहुसहस्रवत्सरेभ्यः प्रागस्माकं पूर्वजाः प्रबलं मूलस्थानमस्थापयन्। तत एवास्मदीया देवालया दीर्घं श्वसन्ति। वयं यावतः कियतोऽपि प्रतिकूलान कुर्महे, बहूनि दुष्कर्माणि कुर्महे, अपचारान् कुर्मः, एतावतोऽपि सहमानोऽस्माकं देवालयस्तिष्ठति। लोकेषु पुराणानि देवमन्दिराणि भारतवर्ष एव वर्तन्त इति सर्वेऽपि ब्रुवते। आङ्लगदेशाद् अस्मदीयमन्दिराणां प्रतिकृतीर्ग्रहीतुं बहव आगच्छन्ति। प्रतिक्षणं समापतत्स्वपि समूलनाशकारणेषु तान्यविनष्टान्येव तिष्ठन्ति। तानि तोडयामो वा, तदपि दुःसाधमेव। निर्मातुं यावदश्नाम्याम, तावत् तोडयितुमपि परिश्रमितुमर्हामः।

अस्माकं मतमप्येवमेव वर्तते। अस्माभिरज्ञातमेव किमप्येकमिदं धारयत् तिष्ठति। सतस्वपि यावत्सु कियत्सु वैषम्येषु, इदमेव मतमविनष्टं तिष्ठति। त्रिंशद्वर्षान् यावत 'सर्वमेकीभावमर्हति, सर्वमेकीभावमर्हती'ति वार्त्तैव सर्वत्र वर्तते।

कश्चन राजाऽस्ति, तस्य बहवः प्रजाः। एकं ब्राह्मणकुटुम्बमस्ति। तत्र कुटुम्बे ज्येष्ठोऽनुज इति द्वौ पुरुषौ, ज्येष्ठो वैदिकः, शास्त्री वेदाध्येता। महाप्रभा भवतः कीर्तिस्सर्वतो वितायते, भवतो दातृत्वमपेक्ष्याहं समागमम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति स्तुवन् बहुभ्यः प्रभुभ्यो धनमाददानो जीवति। अनया वृत्त्या तस्य पूर्णं धनं लभ्यते। वैदिक इति नातिव्ययते। तस्य सोदर आङ्ग्लभाषामपठत्। उपाधिकरणिकं कर्म करोति। आङ्ग्लभाषापाठनेन व्ययप्रकारान सम्यगजानात्। अलंकर्तव्यम्, समीचीनं वस्त्रमपेक्षितम्, गृहं महत् स्यात्, इति व्ययते। चिकित्सकानां धनं दत्त्वौषधं सेवते। एवं व्ययेनास्य धनं न संचीयते। 'अस्मज्ज्येष्ठभ्रातॄणां परं कथं धनं संचीयते' इति सोऽचिन्तयत्। "अस्मज्ज्येष्ठभ्रातेव वयमपि राज्ञः प्रजा एव खलु! कुतो वयमपि स इव कर्तुं नार्हामः? ततोऽप्यस्माकं वाक्प्रभावोऽधिको वर्तते" इत्यालोच्यायमप्यादानवृत्तिं कर्तुमारभत। इदमुत्तमाधिकारिणां ज्ञातम्। द्रागित्येव स्वकर्मतो व्यरमयन्। अयमुपरितनाधिकारिषु निर्णयशोधनार्थं प्रार्थयत। 'वयमुभयेऽप्येकस्यैव राज्ञः प्रजाः खलु। ममैको विधिः, तस्यापरो विधिर्वेत्ययमपृच्छत्।

अस्य प्रश्नस्यास्मदीयशास्त्रराज्य एव समुचितमुत्तरमस्ति। अयन्त्वपृच्छत् ख्रैष्टानां राज्ये। ख्रैष्टास्तु सर्वेषामेको विधिरित्युक्तवन्तोऽपि नात्र विषये तथाऽऽचरितुं पारयन्ति, प्रकारान्तरेणैव कर्तुमर्हन्ति। तेषां मतेषु दशाऽऽज्ञास्सर्वेषामपि समाना एव खलु! लोकयात्रायां परं न समान एव प्रकारः, इति कथं निषेधन्ति?

तेषां मतं केषुचन नियन्त्रणेष्वन्तर्गच्छति। अस्माकं मतस्येयमेव मर्यादेति न शक्यते वक्तुम्। इदमेव शास्त्रमिति न ज्ञायते। तेषु शास्त्रेषु किमुक्तमस्तीत्यपि न ज्ञायते। आशौचेन समागच्छति चेत्, न स्प्रष्टुं योग्यमिति वदामः। अन्त्यज आगच्छति चेत्, दूरं गच्छेति वदामः। एतत्सदृक्षाण्येव वयं वक्तुं जानीमः।

लोकं व्याप्य सर्वाणि मतान्येवं विषमाणि यदि स्युः न हीदं दुष्टमिति न प्रतिभायात्। अपरेषु सर्वेषु मतेष्वेकया प्रणाल्या धर्ममाचारयत्स्वस्माकं मतमेवैवं वर्तते, इत्येव दुष्टमिति प्रतिभाति। तेषां मतानामेवं स्थितिरेवास्मान निर्दिश्य दोषमिव वहति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यादेतत्। मतं नाम किम्? आत्मन उत्तरणार्थं यो मार्गः, स एव धर्मः। स एव मतमिति कथ्यते।

शरीरस्यायं व्याधिरुदितेति तां परासितुमिदमेव भेषजमिति भिषगेव जानाति। विना व्याधिं शरीरं रक्षति वैद्यो नाम। शरीरं वर्तते, इत्येव व्याधिराविरस्ति। यद्यस्माकं शरीरमेव नाविर्भवेद् व्याधिरेव नोपेयात्। व्याधेरावसथः कारणं च शरीरमेव, तस्यानुदयेऽस्ति कश्चन मार्गः। तं मार्गमुपदिशन् वैद्यो मदीयं वचनं विश्वसिहीति ब्रूते। स एव धर्मशास्त्रकारः। तेषु कस्यचन मनुरिति नाम। धर्मशास्त्रकारं भिषगिति न केवलमहं ब्रवीमि यत् खलु मनुरवदत्, तदेवौषधमिति वेदोऽपि ब्रूते—

"यद्वै किञ्चन मनुरवदत् तद् भेषजमि"ति तैत्तिरीयसंहितायाम्। भेषजं नामौषधमित्यर्थः। शरीरस्याजन्मार्थमौषधं धर्मशास्त्रेषूच्यते।

वैद्यं दृष्ट्वा वयम्—"तस्यैकविधमौषधम्, ममापरविधमौषधमिति कुतः? तद्ग्रामीणो भिषगिव कथं न कर्तुमर्हसि।" इति चेत् पृच्छामः।

—"तूष्णीं भव किमपि त्वं न जानासि इति स प्रतिवदति। सर्वस्य जलमेवौषधमिति कश्चन वक्ति। तदेकं प्रस्थानम्। स्यान्नाम तत्। केरलदेशे नीवारसेक इति वदन्ति। तस्यातीव कठिनानि पथ्यान्यपेक्ष्यन्ते। वैद्यो यथा वदति, तथास्माकं पथ्येनावस्थानमावश्यकमेव। एकस्य वैद्यस्यैव यदि व्याधिरागच्छति, तदा सोऽपरस्य वैद्यस्य वचनानुसारमौषधं सेवते। यदि शरीरचिकित्सायामेवैवम्, आत्मचिकित्सायां कियान् विश्वासः, तद्वैद्ये कियती भक्तिश्चापेक्ष्यते?

अपरेषु मतेषु विद्यमाना विधयः सर्वसाधारणाः। अस्मास्वपि तथा साधारणा विधयः सन्ति। तान् साधारणधर्माः, सामान्यधर्मा इति च वदामः। सामान्यधर्मान् सर्व एव कर्तुमर्हन्ति, धर्मशास्त्रेषु सामान्यधर्मा उच्यन्ते। आत्मन उदितो व्याधिः शरीरम्। तस्य आत्मव्याधेश्चिकित्सास्थानेषु धर्मशास्त्रेषु सर्वेषां रोगिणां साधारणानि कानिचन पथ्यान्युच्यन्ते। तथा वदतस्वात्मचिकित्सकेषु मनुर्नाम महान् वैद्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहिंसा सत्यमस्तेयं शौचमात्मविनिग्रहः ।
एतान् धर्मान् समासेन चातुर्वर्ण्येऽब्रवीन्मनुः ॥

इति मनुस्मृतौ दशमाध्याये त्रिषष्टितम एकः श्लोकः । अत्र चत्वारो वर्णा इत्युक्तेऽपि व्याख्यातार एतस्य सर्वा जातय इति व्याचक्षते । केचन वेदे चतस्र एव जातयो वर्तन्त इति प्रत्याचक्षते । तत् न सत्यम् । धर्मशास्त्रेषु चोक्ता जातयः सर्वाः परमिदानीं न दृश्यन्ते । यजुर्वेदे तृतीयाष्टके तुरीयप्रश्ने नरमेधप्रकरणे नरमेधयज्ञमधिकृत्योच्यते । नरमेधो नाम मनुजं पशुं कृत्वा क्रियमाणं कर्म । स यागोऽस्मिन युगे न कर्तुं योग्य इति धर्मशास्त्रे निवर्त्यते । तस्य नरमेधयागस्य वर्णनप्रसङ्गेऽस्या अस्या देवताया भयमयं मनुष्यः पशुर्भवितुमर्हतीत्युच्यते । अत्र मनुष्यजातिषु बहवो जातय उल्लिख्यन्ते ।

प्रधानाश्चत्वारो वर्णाः । एतेषु केचन संकटविवाहाः शास्त्रैरेवानुमन्यन्ते । केचन वार्यन्ते । अनुमतिमनुसृत्य मेलनेनोत्पन्ना जातयोऽनुलोमा नाम । विधिमुलङ्घ्य तु जनिताः प्रतिलोमाः । प्रतिलोमानामेवाशौचं प्रतिपाद्यते । तथोत्पन्नानां बहूनामपि जातीनां पृथक् पृथग् वृत्तीरपि व्यवास्थापयन् । एतल्लोकोपयोगायैव ता वृत्तयो व्यभज्यन्त । आत्मक्षेमाय तेषामुचितान् मार्गान् धर्मशास्त्राणि वर्णयन्ति ।

सप्तस्वरा बहुधा प्रस्तरिताः यथा द्विसप्ततिवाद्यनिदानानि अपरा रागिण्यश्चाभवन, चत्वारो वर्णाः परस्परमिश्रणेन तथैव जातयो बहवोऽवर्धन्त । एतावन्तो विभागास्तदुचिताश्च धर्माः कर्मकाण्डेपूच्यन्ते ।

ज्ञानकाण्डे—यदि कांचनोन्नतामैक्यदशां नाम प्राप्नुमः, वेदोऽवेदो भवति, देवा अदेवा भवन्तीत्युच्यते, 'कूजा' पञ्चपात्री घटः कलसीत्यादिषु विद्यमानमुदकं तटाकं नीत्वा यदि संयुनज्मः, विना भेदमेकरूपी भवति । तदानीं पञ्चपात्रीप्रभृतिविभेदा न दृश्यन्ते । पञ्चपात्रीप्रभृतीनीव दृश्यमानानि शरीराणि । जलसदृक्षमन्तःस्थं विज्ञानम् । तटाकसदृशं परमं वस्तु या नामापरिच्छिन्ना संवित् । सति संविदैकीभावे भेदाः क्षीयन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानावस्थायां वेदोऽवेदो भवतीत्युपनिषद् वदति। तस्यामुन्नतायां दशायां ब्राह्मणोऽब्राह्मणो भवति, चण्डालोऽचण्डालो भवतीति स एव वेदो वदति।

पूर्वं मयोक्तायां मनुस्मृतौ साधारणधर्मा बहव उच्यन्ते।

सत्यं नाम कश्चन महान् स्वधर्मः, नानृतं वदेत्। मातरि भक्तिः, पितरि भक्तिः गुरौ भक्तिः, देवे भक्तिरित्यादिन्यावश्यकानि। परेषामस्मत्साध्यमुपकारं कर्तुमर्हामः। इन्द्रियक्षुण्णमार्गणागत्वा तानि निग्रहीतुमर्हामः। अस्माकं यावदपेक्षितं विनियुज्यावशिष्टं परेषां कृते विनियोक्तुमर्हामः। इमानि सत्यम्, ब्रह्मचर्यम्, अहिंसा, अस्तेयम्, अपरिग्रह इति नाम्ना व्यवहियन्ते। अस्माकं वस्त्रमपेक्षितं चेत्, रूप्यकद्वयेन क्रय्ये वस्त्रे विद्यमाने दशरूप्यैरेकं वस्त्रं न विक्रेतव्यम्, तद् रूप्यद्वयक्रय्यं वस्त्रमात्मने विक्रीय चतुर्भ्यो रूप्यकद्वयक्रय्यवस्त्राणि विक्रीय देयानि। वयमतिमूल्यान्नपानादीन्युपयुञ्मः इत्यधिको व्ययो भवति। तेनैव व्ययेन गोधूमयवागूं पक्त्वा वयमप्युपयुञ्ज्यान्येभ्योऽपि दातुमर्हामः। एवमाचरणमेव परिहार इति कथ्यते।

एतान्यतिरिच्य विशेषधर्मा इति केचन वर्तन्ते। ईश्वरोऽस्मान् यस्यां जातौ, यस्मिन् कुटुम्बे, यस्मिन् देशे यस्यामवस्थायामजनयत, तदर्थं केचन धर्मा वर्तन्ते। तानेव विशेषधर्मा इति वदन्ति। ब्राह्मणोऽजायत, इति तेन कर्तव्यानि कानिचन कर्माणि वर्तन्ते, चण्डालोऽजायत, इति तेन कर्तव्यानि कानिचन कर्माणि सन्ति। तानि वर्णधर्मा इति वर्ण्यन्ते। साधारणधर्मान् विहायैकैकस्याधिकानि कानिचन कर्माणि वर्तन्ते। तेषां धर्माणां कृते तेषां कानिचन सौकर्याण्युक्तानि सन्ति। सर्वेषां सर्वाणि साधारणानि, इति चेत्, क्लेश एवाधिकः स्यात्। मयि केनचिद् भाषमाणे सति काचन स्त्री दर्शनार्थमागच्छत्। द्वारपालकोऽन्तर्न गन्तुं शक्यमित्यवदत्। तेष्वन्तर्गतेषु कथमहं गन्तुं न पारयामि। जानपदसभास्तारः

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Sahitya Parishad Series.

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. As. 10, As. 8 (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (Almost out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by Pt. Kalipada Tarkacharya. (Almost out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya —Edited by Pt. Satishchandra Siddhantabhushan. Re. 1. As. 4, Re. 1. (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Re. 1-4, Re. 1 (for members).

7. **Durgotsava-vivekah** of Sulapani—Edited by Pt. Satishchandra Siddhantabhushan. As. 8, As. 6 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt, Janakinath Sahityashastri As. 2.

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D. As. 12, As. 10 (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya —Edited by Pt. Satishchandra Siddhantabhushan. As. 7, As. 5 (for members).

11. **Prabhakara-vijayam** of Nandisvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Re. 1 As. 4, Re. 1 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya— Edited by Pt. Bamacharan Kavyatirtha. As. 6, As. 5 (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Pt. Chintaharan Chakravarti, M.A. As. 12, As. 10 (for members).

14. **Nala-damayantiyam** (a new Drama) of Pt. Kalipada Tarkacharya. Re. 1 As. 4, Re 1 (for members).

15. **Prasastapada-bhashyam**—Edited by Pt. Kalipada Tarkacharya. Rs. 2, Re. 1 As. 8 (for members).

16. **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Re. 1, As. 12 (for members).

17. **Rik-pratisakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D. with the assistance of Pt. Chintaharan Chakravarti, M.A. Rs. 2 As. 8, Rs. 2. (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Pt. Akshayakumar Shastri. Re. 1 As. 4, Re. 1 (for members).

19. **Chhandogyamantrabhashyam**—Ed. by Pt. Durgamohan Bhattacharya, M.A. Rs. 3. As. 12, Rs. 3 (for members).

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by Pt. Kalipada Tarkacharya. Rs. 3. As. 8, Rs. 3 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Pt. Chintaharan Chakravarti, M.A. As. 10, As. 8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষদ্-গ্রন্থাবলী—নং ২১

বিষ্ণুদাস-কৃত—

মনোদূতম্

বেথুন কলেজের অধ্যাপক

শ্রীযুক্ত চিন্তাহরণ চক্রবর্ত্তী, এম. এ., কাব্যতীর্থ-সম্পাদিত

এই পুস্তকখানি মেঘদূতের অনুকরণে লিখিত, ইহাতে ১০১টী সুন্দর শ্লোক আছে। কোন বৈষ্ণব ভক্ত তাঁহার পরমারাধ্যকে লাভ করিবার আকাঙ্ক্ষায় মনকে দূতরূপে নিযুক্ত করিয়া শ্রীহরির নিকট তাঁহার মনোবাসনা জ্ঞাপন করিতে চাহিতেছেন—ইহাই এই গ্রন্থের মূল বক্তব্য বিষয়। পুস্তকখানি এই প্রথম মুদ্রাপিত হইল। সম্পাদক-কর্ত্তৃক ইহাতে নানা তথ্যপূর্ণ ইংরেজীতে লিখিত একটী ভূমিকা সন্নিবেশিত হইয়াছে। ডিমাই, ৮ পেজী—৩৪ পৃষ্ঠা।

মূল্য—পরিষৎ-সদস্যদের জন্য—॥০, অন্যের জন্য—॥৵০

Opinions on the 'Manodūtam'

(Sanskrit Sahitya Parishad Series No. 21)

Prof. S.K. De, M. A., D. Lit. (Lond.), *Dacca University*:

Mr. Chakravarti is already known to Sanskritists by his careful edition of the more interesting and important Pavanadūta of Dhoyī as well as by his informative articles on the Dūtakāvyas in Sanskrit in IHQ. III, pp. 273-97. Since then, interest in Dūta-kāvyas.....appears to have increased ; and the present edition of a less known, but in some respects interesting, Dūta-kāvya is evidently a continuation of the editor's studies in the subject, the intention being to put in print some of the more remarkable poems of the type.....The manuscript-material on which the edition is based is hardly ample or sufficient ; but the editor, with commendable carefulness and scholarship, has done his best to reconstruct a fairly good text.

(*Oriental Literary Digest*, Vol. I, No. 8, p. 15).

Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

24-4-38

Reg. No. C. 1073

Vol. XX, No. 11] [March, 1938.

१८५९ शकीये फाल्गुने २०श-वर्षस्य ११श-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

विशेष-प्रबन्धः— उपदेश-परम्परा

Main article— Upadeśa-parampara

सम्पादकः—

महामहोपाध्याय-श्रीअनन्तकृष्ण-शास्त्री

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

মাসিক-সভা

संस्कृत-साहित्य-परिषद आगामिनी मासिक-सभा १३४५ वङ्गाब्दीय-सौरवैशाखस्य २६श (षड्विंश)-दिवसे सोमवासरे सायं सप्तवादनतो भविष्यतीति सर्वेषां संस्कृत-भाषाध्यायिनामध्यापकानाञ्च तत्र समुपस्थितिः प्रार्थनीया।

মাসিক সভা

সংস্কৃত-সাহিত্য-পরিষদের আগামী **মাসিক সভা—২৬শে বৈশাখ, ১৩৪৫, সোমবার, সন্ধ্যা ৭টার** সময়ে হইবে। সর্বসাধারণের উপস্থিতি একান্ত প্রার্থনীয়।

পণ্ডিতগণের জীবনী-সংগ্রহ

সংস্কৃত ভাষাভিজ্ঞ ব্যক্তিমাত্রই অবশ্য স্বীকার করিবেন যে ভারতবর্ষের গৌরব ভূতপূর্ব্ব এবং বর্ত্তমান **অধ্যাপকগণের জীবনী** একত্র সংগ্রহ করিয়া প্রকাশ করার যথেষ্ট উপযোগিতা আছে। এ বিষয়ে পরিষদের পক্ষ হইতে তথ্যানুসন্ধান করা হইতেছে। বঙ্গদেশে এখনও প্রায় ১০০০ সুপ্রতিষ্ঠিত অধ্যাপক আছেন, তাঁহাদের এবং তাঁহাদের অধ্যাপক পণ্ডিতগণের জীবনী সংগ্রহ করিতে পারিলেও একটা উল্লেখযোগ্য কার্য্য সম্পন্ন করা যাইতে পারে। তদুদ্দেশ্যে প্রত্যেক অধ্যাপকের নিকট বিনীত অনুরোধ এই যে, তাঁহারা অনুগ্রহপূর্ব্বক নিজের এবং স্বপরিচিত পরলোকগত বা বর্ত্তমান অধ্যাপকগণের মধ্যে অন্ততঃ দুই জনের সম্বন্ধে নিম্নলিখিত সংবাদগুলি **সংস্কৃত-সাহিত্য-পরিষৎ-সম্পাদকের** নামে লিখিতভাবে জানাইলে দেশের ও দশের মহৎ উপকার সাধিত হইবে :—

নাম, পিতার নাম, উপাধি, কর্ম্মস্থল, জন্মস্থান (গ্রাম, পোঃ, জেলা), জন্মদিবস (বাংলা তারিখ, অন্ততঃ আনুমানিক সাল), বর্ত্তমান বয়স (পরলোকগত-স্থলে মৃত্যুদিবস—বাংলা তারিখ), তাঁহার অধ্যাপকের নাম, স্বরচিত কোন গ্রন্থাদি থাকিলে তাহার নাম (মুদ্রিত বা অমুদ্রিত জানা দরকার), নিজে টোলে মোট যত ছাত্র পড়াইয়াছেন তাহার আনুমানিক সংখ্যা, টোলের নাম ও ঠিকানা। সংবাদদাতার নাম ও ঠিকানা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

March, 1938. | १८५९-शकीये फाल्गुने २०श-वर्षस्य १०म-संख्या | Vol. XX, No. 11

प्रशान्तरत्नाकरम्

[श्रीकालीपदतर्काचार्यप्रणीतम्]

ब्रवीषि । भद्र, नूनं न जानासि, कीदृशं हृदयं दुःसहदुःखभारेण भूमौ विचेष्टमानान् स्वपरिजनानवलोकयतां दीनानाम्, नूनं न जानासि, कीदृशं हृदयं पदे पदे धनमदमत्तैः पुरुषैः सुतरामवज्ञया परिताप्यमानानां निर्धनानाम्, नूनं नावधारयसि, क्षणे क्षणे काम्यप्रतिघातकारिणा दारिद्र्येण निष्करुणं निष्पिष्यमाणानां हृदयवैक्लव्यं मादृशानाम् ! भद्र, सन्ति तस्कराणामपि स्वजनाः, ते क्षुधया तृष्णया च परिपीड्यमानाः स्वयं दुःखं प्रतिकर्तुमक्षमास्तानेव प्रतीकारं याचन्ते, तेषामेव स्मरन्ति, तेषामेव च पन्थानमाशाबद्धहृदयाः सोत्कण्ठाः समुदीक्षन्ते, तत् कथय, स्वजनपोषणस्य गत्यन्तरमनीक्षमाणानां तेषां का गतिः साहसवृत्तिसमाश्रयणादन्या । तदविचारतो नैवमेतानधिक्षेप्तुमर्हसि ।

रत्ना—(मुग्ध इव अश्रु मुञ्चन्) भद्र, अधिक्षेपेण अपराद्धोऽस्मि, तदविजानतो मे क्षन्तुमर्हसि । (स्वगतं) तत् किं ममापि स्वजनदुःखनिर्वापणाय सैव गतिः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषः—भद्र, यदि प्रत्येषि, किञ्चित् कथयितुमिच्छामि।

रत्ना—कथय,

पुरुष—एवं कथयामि, यदिदानीमेकाकिन्या अपि गच्छन्त्या मातुरभयमेव पश्यामि।

रत्ना—कथमिव ?

पुरुषः—अस्त्यत्र प्रान्ते तस्करवर्गः, स ममव वशे वर्तते। तद् यदि मातुरस्याः पथि गच्छन्त्याः कश्चित्तस्करः पन्थानमभिरुन्ध्यात् तदा 'वीरबलं स्मर' इति वक्तव्यम्, एवं किल दासजन इवासौ मातुरादेशमनुवर्तिष्यते। तदेवं मयि क्रियतां प्रत्ययः।

रत्ना—कथं वीरबलो ननु भवानेव ? यस्य नामश्रवणेन परितः परिकम्पन्ते जानपदाः ?

पुरुषः—अथकिम् !

स्त्री—आम् एष वीरबलस्तस्कराणां नायकः ?

रत्ना—अम्ब, एवं क्रियताम्, एष वीरबलो लब्धोपशमः कथयति, अलमत्र अन्यथा मत्वा। विपदि यथोपदेशं कुर्वीथाः।

स्त्री—अहो, निरावाधास्मि, तदिदानीं निःशङ्का गच्छामि।

(निष्क्रान्ता)

रत्ना—गता खलु जननी ! भद्र, वीरबल, आर्यायामस्यां सदृशतया मातृसमुदाचारेण सम्बन्धवानसि, तदिदानीं समासेन भवतो वृत्तं समाकर्णयितुमिच्छामि।

पुरुषः—भद्र, रत्नाकर, भवतः शौर्यं साहसं निपुणतां लोकोत्तरमौदार्यं विलक्षणश्च कलेवरसंस्थानमीक्षमाणः परतन्त्रीकृतोऽस्मि प्रेमविस्मयाभ्याम्। तदाकर्णय यावत् समासेन कथयामि। अनन्तरितं शात्रववृत्तं विस्मृत्य कृपया श्रोतुमर्हसि।

रत्ना—भद्र, वीरबल, त्वयि निष्ठुरमनुतिष्ठता मयापि सुमहद् वैरमनुष्ठितं तत् त्वमपि विस्मर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषः—मया तु तदेव विस्मृतं तत्, यदा स्वस्य दोषो विज्ञातः प्रणिपातश्च कृतो मातृपादयोः ।

रत्ना—तत् कथय ।

पुरुषः—श्रूयताम्—अस्ति तावदस्मिन्नेव प्रान्ते महेश्वरशैलसन्निहितं ब्रह्मपुरं नाम नगरम् ।

रत्ना—अस्ति, ज्ञायते, किं तत्र ?

पुरुषः—तत्रैव स्थितिमुपेयुषो विष्णुदासनामधेयस्य ब्राह्मणस्याहमेक एव तनयोऽस्मि ।

रत्ना—ततस्ततः ?

पुरुषः—ततश्च भद्र, शैशवं नातिक्रामत एव मे परमस्नेहनिलयस्तातो माञ्च मदीयां दीनां मातरञ्च शोकमहार्णवे निपात्य सहसा कदाचित् स्वर्गमगात् ।

रत्ना—हा कष्टम्, ततस्ततः ?

पुरुषः—ततश्च कियत्कालानन्तरं यौवनमुपगते मयि दारिद्र्ये स्थितापि मे जननी एकाकितया महत् कष्टमनुभवन्ती कुलवतीं कामपि बालामनपचितलावण्यां स्नुषात्वेन गृहीतवती, अहमनिच्छन्नपि मातृभक्त्या तस्या विरोधी नाभूवम् ।

रत्ना—हा धिक् निर्विचारमिदमनुष्ठितम् । ततस्ततः ?

पुरुषः—ततश्च क्रमेण राज्ये कठोरदुर्भिक्षेण पदमकारि, येन भिक्षाप्राप्तिरपि विघटिता बभूव । तदा कदाचिदनशनेन कदाचिदर्धाशनेन कदाचित् पञ्चषदिवसानन्तरमेकाहारेण वा प्रियाया मे, अहह ! प्रियाया मे शरीरे विषमो ज्वरः प्रादुर्बभूव । महताऽनुनयेन प्रवर्तिता अपि महान्तो वैद्या न तस्य विषमज्वरस्य सान्निपातिकस्य प्रशमं कर्तुमक्षमन्त । हा हा ! गता ! गता खलु सा ! अनाहारेण क्लिष्टा सती सा लता विशुष्का ! हा हा ! प्रिया मे मदिरा भस्मतां नीता हुताशनेन । अनशनेन ज्वरप्रकोपेण च कृशीकृता सा क्षणेनैव भस्मतां नीता ! मम्मैवाधन्यस्य समपेक्षितभोज्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपादनशक्तिशून्यतया अभिमानेनेव मामनपेक्ष्य हा हा मदिरा मे चिता-वह्निज्वालया आत्मानं भस्मतां नीतवती ! तत्स्मृतिरद्यापि कुक्कूलाग्निरिव प्रतिमुहूर्तमेव मे स्वान्तं निष्ठुरं दहति। हा हा मदिरा मे गता, क्वापि चिराय गता !

रत्ना—वयस्य, वीरवल, अतीते धैर्यमवलम्बस्व। कथं नाम तथा वैक्लव्येन वृत्तं विवृण्वन् ममापि लोकोत्तरं मानसोद्वेगं वर्द्धयसि ? तत् कियानस्ति वृत्तशेषः ?

पुरुषः—आम् अस्ति स्वल्पपरिणाहोऽपि गुर्वर्थो वाक्यशेषः ! श्रूयताम्।

रत्ना—कथय।

पुरुषः—वयस्य, किं वा अतः परं कथयामि, तदा तस्याः प्रियतमायाः स्नुषायाः स्मरन्ती तदर्थमनवरतं शोकं वहन्ती, तामेव नक्तन्दिवमभिलषन्ती अनाहारक्षीणकाया मातापि मे स्वल्पेनैव कालेन शय्यामाश्रितवती। तदा मम शून्यतामगात् समग्रं जगत्। इतो हृदयदयिताया अनाहारेण काल-कवलं प्रविष्टाया दारुणो दुःखमयो विप्रयोगः, अन्यतश्च मृत्युवक्त्र-मनुप्रविशन्त्याः सुखे वा दुःखे वा ममैकसमालम्बनभूताया अम्बायाः कथमपि जीवनरक्षणचिन्ता ! तथा अनशनेन शोकेन गभीरचिन्तया च स्वशरीरस्य प्राणहरं दौर्बल्यम्। किं करोमि, क्व गच्छामि, कुतो वा भैक्ष्यमासादयिष्ये, किं वा शरणं व्रजामि इत्येतानि विनिर्णेतुमशक्नुवन मूर्च्छित इव उन्मत्त इव भूताविष्ट इव च व्यचरम्। बान्धवा भिक्षिताः, धनिकाः प्रतिद्वारमुपेत्य मातृजीवनाय याचिताः, सर्व एव ते हा हा सावज्ञं प्रत्याख्यातवन्तः !

रत्ना—अहह ! मामपि तदा भिक्षमाणमेवमेव धनिकाः सन्निकृष्टा बान्धवाश्च सावज्ञं प्रत्याख्यातवन्तः ! तदेष व्यसनसब्रह्मचारी मया समासादितः। भद्र, वीरवल, ततस्ततः ?

पुरुषः—ततश्च मातृप्राणरक्षणाय गत्यन्तरमनीक्षमाणः—

विभिन्दन् मर्यादां कुलमगणयन्नुन्नततमं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वमातुः प्राणार्थं कतिचन दधद् बालसुहृदः ।
रहश्चौर्यं कृत्वा धनमुपगतो मातरमहं
व्यधां सुस्थां तस्मात् प्रभृति कलये साहसमिदम् ॥

रत्ना—अहो ! साम्प्रतं वीरवलस्य सुकृतदुष्कृतयोः सन्धौ वर्त्तमानतया अस्य कृत्यं प्रकृष्टमपकृष्टं वेति महति संशये पतितोऽस्मि ।

तथाहि—एकतो दुष्कृतं चौर्यमन्यतो मातृरक्षणम् ।
सन्धौ वीरवलो भाति लोकालोक इवाचलः ॥

अये, ममापि गेहे वृद्धौ पितरौ बालस्तनयः, साध्वी प्राणसमा वनिता इति सर्वं एवैते ममैव पन्थानमुदीक्षमाणाः कथमपि जीवनं धारयन्ति, अपि जीवनं धारयन्ति ? वयस्य, वीरवल, अपि जानासि मां निःशेषम् ! वयस्य वीरवल, ममापि दरिद्रब्राह्मणस्य गेहे वृद्धौ पितरौ क्षुधया परिपीड्यमानौ भूमिशय्यामाश्रितौ, ममापि गेहे बालस्तनयः क्षुधाक्लेशेन मूर्च्छितो भूमौ पतितस्तिष्ठति, ममापि गेहे साध्वी वनिता पुत्रमनशनेन मूर्च्छितमपि समुपेक्ष्य दुर्बलान्यङ्गानि वोढुमक्षमा शिथिलितसन्धिबन्धा मृत्युवक्त्रमीक्षते ! वयस्य, यदि जानासि, कथय, कस्तेषां जीवनोपायः ?

मा नाम सूर्येण समं दिनान्ते मद्बान्धवा मृत्युमुखं विशेयुः ।
हा हा कथं तानिह जीवयेयं वयस्य का वा गतिरुच्यतां मे ॥

पुरुषः—वयस्य, रत्नाकर, सम्यग् दृष्टोऽसि, तदलं वैक्लव्येन, अस्त्येव सञ्जीवनोपायः ।

रत्ना—वयस्य, कथय कथय, को नामासौ ?

तदर्थं किमु गन्तव्यं दुरारोहं गिरेः शिरः ।
सागरो वा प्रवेष्टव्यः क्षणो मम युगायते ॥

पुरुषः—वयस्य, रत्नाकर, नैव तदर्थं शैलाग्रं गन्तव्यं नापि सागरः प्रवेष्टव्यः । वयस्य, कण्ठस्थितमपि चामीकरं मोहान्न जानासि !

रत्ना—वयस्य, समुत्कण्ठितोऽस्मि, तदविलम्बितं ब्रूहि ।

पुरुषः—वयस्य, रत्नाकर, किं वा कथितेन,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मारुतस्येव ते शौर्यं कृतान्तस्येव साहसम् ।
सहायं यदि विन्देम तदा करगता गतिः ॥

रत्ना—वयस्य, किमभिप्रेतं भवतः ?

पुरुषः—अस्माकं साहसिकानां वर्गे भवन्तमीश्वरं कर्तुमिच्छामि ।

रत्ना—अहो धिक् ! पातकमिदमतिनिष्ठुरञ्च ।

(ततः प्रविशति शून्यमार्गे गायन्ती नियतिः)

(गीतम्)

स्वजनान् संस्मर दीनान

जनको मूर्च्छति जननी रोदिति लयमुपयाति विवस्वान् ।
मूर्च्छिततनयं सुविहितविनयं पश्यसि न कथं धीमन् ।
क्षुधया विकलान् परिहृतकुशलान् स्मरसि न कथमिह दारान् ?

(तिरोभूता)

रत्ना—देवि, देवि, कथय कथय, अपि नाम ते समुच्छ्वसन्ति ? अद्यापि समुच्छ्वसन्ति ? (अदर्शनमभिनीय) हा कथं लुप्तैव ? सखे वीरबल, भीतोऽस्मि, तदन्यं पन्थानं ब्रूहि ।

पुरुषः—वयस्य, कस्माद् भीतोऽसि ?

रत्ना—धर्मात्—

पुरुषः—किं कृतमेतावत्कालं ते रक्षितेन धर्मेण ?
अपि साहायकं दत्तं तेन बान्धवरक्षणे ?
मुधैव कल्पनासारं सुकृतं बहुमन्यसे ।

रत्ना—आम् एवमिदम् ! वयस्य वीरबल, तथापि भीतोऽस्मि !

पुरुषः—वयस्य, रत्नाकर, किं वा कथयामि, मिथ्यैव त्वं निपुण इत्यभिधीयसे । धिक् ते पातकभीतिं यया क्षुधाजनितेन क्लेशेन परिमूर्च्छितौ पितरौ मूर्च्छितां दयितां कृतान्तस्य कवले प्रविशन्तं प्राणाधिकं पुत्रकञ्च माध्यस्थेन समुपेक्ष्य केवलं वाङ्मात्रेण वात्सल्यमभिनयसि ! यद्यस्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रे वात्सल्यम्, यद्यस्ति पित्रोः श्रद्धा, यद्यस्ति च प्राणप्रियायां पत्न्यां प्रणयः, तदा उत्तिष्ठ, दूरे वर्जयित्वा कल्पनामात्रसारात् पातकाद् भीतिं पौरुषेण कृत्ये प्रवर्तस्व, एवमेव समुद्यमिनं त्वां लक्ष्मीरुपेत्य स्वयमभिनन्दिष्यति ! मा तावदद्यापि आलस्यदोषेण मध्यस्थः स्वजनविध्वंसं कार्षीः। तदलं विलम्बेन, अचिरमेव साहसिकानामस्माकमात्मना प्रभुदण्डं गृहीत्वा स्वमनोरथं निर्वर्त्तयेथाः।

रत्ना—वयस्य, वीरबल, परवशः कृतोऽस्मि, तत् क्षणं तिष्ठ, यावदवधारयामि।

पुरुषः—धिक्! अद्यापि क्षणमपेक्षसे? स्वजनानां वदने यदा मृत्युच्छाया पदं करोति, तदापि धर्मभीतः क्षणमपेक्षसे? अहो धिक् तव विवेकशून्यताम्।

रत्ना—अहह! सत्यं सत्यमेव पश्यामि, स्वजनानामाननेषु मृत्युच्छायां पश्यामि। मूढ रत्नाकर, अद्यापि पातकं चिन्तयसि? धिङ्मूर्ख, अपध्वस्तोऽसि।

प्रत्यक्षं पितरौ सुतः प्रियतमो भार्यानुकूला तथा
मृत्योर्वक्त्रगताः क्षितौ निपतिता दीर्घं श्वसन्तो यदा।
दृष्ट्वा हा समुपेक्ष्य मोहवशतोऽदृष्टे दधानो रतिं
स्वर्गं वाञ्छसि किं चिराय भवतः स्वर्गः स विध्वंसताम्॥

सखे, वीरबल, एष सज्जोऽस्मि, तदुपनय प्रभुदण्डम्।

पुरुषः—(स्वदण्डमुपनीय) एष प्रभुदण्डः, तद् गृह्यताम्।

रत्ना—(गृहीत्वा) एष गृह्णामि। नमः सर्वविप्लवकारिणे स्वजनस्नेहाय।

पुरुषः—अहो कृतार्थोऽस्मि।

रत्नाकरस्य भुजविक्रम-साहसाभ्या-
मभ्यागतामिव पुरः कलयामि लक्ष्मीम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेनाद्य चौरसमितेः समधिष्ठिताया
लोकोत्तरा धनिकनिग्रहशक्तिरास्ताम् ॥

रत्ना—वयस्य, वीरबल, स्वजनदशामनुस्मृत्य व्याकुलोऽस्मि ।

पुरुषः—सखे, रत्नाकर, शनैः शनैर्मन्त्रय ।

रत्ना—कथमिव ?

पुरुषः—(नेपथ्याभिमुखं दर्शयित्वा) किं न पश्यसि ? एष कश्चन शाकटिकः सूपतण्डुलाद्युपकरणोपेतं दण्डधारिणा आपणिकेन समधिष्ठितं शकटं वाहयन्नित एवाभिवर्तते, तदत्रैव ते प्राथमिकहस्तरेखापातः कर्तव्यः । एहि यावद् वृक्षान्तरालमाश्रित्य प्रतिपालयावः । इहैव निहिता ते स्वजनानामनशनेन मूर्च्छतां रक्षा । तदलं विलम्बेन, कृत्ये प्रवर्तस्व । शेषं कर्णे कथयिष्यामि ।

रत्ना—एवमस्तु । नमः सर्वविप्लवकारिणे स्वजनस्नेहाय ।

(निष्क्रान्तौ)

(ततः प्रविशति सपरिजनः क्षुधाविकलश्च्यवनः)

च्यवनः—अये, अवसितप्रायो दिवसः ! तथाहि—

दूराद् विहङ्गनिचयः समुपैति नीडं
क्षेत्रात् परापतति धेनुगणः समन्तात् ।
यात्येष संहृतकरो रविरस्तचूडां
शैलाग्रगैरिकरजोभिरिवानुलिप्तः ॥

अद्यापि वत्सो मे रत्नाकरो नागच्छति, न जाने कियति दूरे वत्सो मे कथं वर्तत इति । वत्सस्य कृते क्षुधापरिक्लिष्टानां मुहुर्मुहुः संज्ञाशून्यानामिव भूमौ पततां परिजनानाञ्च कृते सुतरां चिन्ताकुलोऽस्मि । तत् किन्नु खलु वत्सो मे—

गृहे गृहे दीनवचःप्रपञ्चैः सम्प्रार्थ्य हा व्यर्थबहुप्रयासः ।
नायाति लज्जाजडितः स्वगेहं भिक्षार्थमाहो स गतः सुदूरे ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपदेशपरम्परा

वर्णधर्मः

(पूर्वानुवृत्तः)

[स्वनामधन्यजगद्गुरु-श्रीशङ्कराचार्यश्रीकाञ्चीकामकोटिपीठाधीशानाम्]

यदाऽन्त्यजानपि देवालयं गन्तुमर्हन्तीति वदन्ति। एतादृशे काले एवं वर्णनमयोग्यम्, अहं गमिष्याम्येवेत्युक्त्वाऽन्तरागच्छति चेत्, किमहं कर्तुं शक्नुयाम्? मय्यनुतिष्ठति, स्वामिनः सर्वेषां साधारणाः खलु? वयं कुतः सांप्रतं न गन्तुमर्हाम इति सर्वेऽप्यन्तः प्रविशन्ति चेत्, कथमहमनुष्ठातुं शक्नुयाम्? शुल्कपत्रदानस्थाने सर्वे प्रविशन्ति चेत्, शुल्कपत्रदाता किं कर्तुं शक्नुयात्? एकैकस्य स्वस्वकृत्यानि कर्तुं कानिचन कानिचन सौकर्याणि भवितुमर्हन्ति। एकस्मिन साधारणे कुटुम्बे एकस्य व्याधिर्भवति चेत्, तस्य कानिचन सौकर्याणि कारयामः। अन्येषामपि तदपेक्षितमिति किमिदं न्याय्यम्? माता रजस्वला वर्तते। एकस्मिन् विविक्ते स्थाने सा वर्तते। तव केवलं कथं विविक्तं स्थानम्? अहमप्यागच्छामीति चेत्, किमिदं न्याय्यं भवति? सर्वेषां साधारणा धर्मा अप्यस्मन्मतेऽनेके वर्तन्ते। स्वकर्तव्यं कर्तुं कानिचन सौकर्याण्यपेक्ष्यन्ते, न वा? वस्तुतस्तानि न सौकर्याणि। तेषामनुबन्धिनं तं विशेषधर्मं तदुचितानि कानिचन सौकर्याणि च सर्वेऽप्यङ्गीकर्तुमर्हन्ति। कुत इति चेत्, ते कुर्वन्ति तानि न केवलं स्वार्थम्, किन्तुसर्वेषां सुखं भवत्वित्येव ते स्वान विशेषधर्माननुतिष्ठन्ति।

हृदये प्रेमैकरस्यं चापेक्षितम्। सह भुज्यत इत्येतावन्मात्रेण नैकरस्यं भवति। एकैकोऽपि स्वस्वकर्माणि कुर्वाणोऽपरेषां कर्माण्यपि यथा सुसंपद्येरन, तथा कुर्वाणश्च मनस्यैकरस्येन स्थातुमर्हति। सह न भुज्यते चेद् द्वेष इति चिन्तनं चिन्त्यमेव। श्वशुरेण स्नुषा न सह भाषते; बहुमन्तुं तथा करोति। कोऽपि द्वेषो वर्तते वा? कंचन यदि किमप्याशौचं बाधते, तेन सह न भुञ्जमहे, तं न स्पृशामः, ते किं द्वेषो भवति? एतादृशानपि द्वेषमूला इति वदामश्चेत्, वदत्स्वेव कश्चन दोषः स्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं मनःकालुष्येणास्माकं धर्मा दुष्टाः प्रतिभान्ति। यावद्यावद् नियमा अधिकं वर्तन्ते, तावत्तावत् सौकर्यमधिकम्। पथ्यं यदि कठिनं भवेत्, व्याधिः शीघ्रं चिकित्स्यते।

अस्माकं विशेषधर्मा विनापि राजानं देशः साधुः स्यादित्युपायुज्यन्त। ग्रामपञ्चायतनेषु जातिनियमा यावद्यावत् क्षीयन्ते, तावत्तावद् दुराचारा अधिकं भवन्ति, तेन कलहस्समुदेति। जातिनियन्त्रणे स्थिते दुराचाराद् भीतिरासीत्। जातितो भ्रंशयेयुरित्यतस्सा भीतिरुदियात्। तस्मिन् क्षीणे तु अपराधा अधिकं भवन्ति। जातीयनियन्त्रणेन अपराधा एव नावासरन्, राजा स्वदण्डमधिकर्तुं नापेक्ष्यत। तस्य कर्मोपर्युपरि श्रेयोवर्धनमेवासीत्। सांप्रतमियन्त आरक्षिकाः, सेनाः, कारागृहाणीत्यादीनि वर्तन्त इत्यस्य कारणं किम्? जातीयनियन्त्रणानां क्षयः, वर्णाश्रमधर्मेषु न्यूनता चैव।

अपरेषु मतेषु सर्वेषामेक एव धर्मो वर्तते! तत एव तान्यत्युन्नतां दशां प्राप्नुवन्निति वयं मन्येमहि, परं तु तानि कदाचन द्रागित्येवोद्गच्छेयुः, कदाचन स्वावसथज्ञानमपि विनाऽधोऽपि गच्छेयुश्चेत्, तदपि स्यात्।

एकः सालवृक्ष आसीत्। तदुपरि काचन क्षुद्रलता झट्झटित्युदगच्छत्। कैश्चन मासैः सालवृक्षमत्यगच्छत्। तदा सा क्षुद्रलता—"एतैः कतिभिर्मासैरयं सालवृक्ष एकमप्यङ्गुलं नावर्धत। नायमुपयुक्तः" इत्युक्त्वा ऽहसत्। सालवृक्षोऽवादीत्—"अहमुत्पद्य दशसहस्रं क्षुद्रलता अपश्यम्, त्वमेकोत्तरदशसहस्रतमा लता। एकैकेऽप्येवं पृच्छन्ति। अहं किमपि प्रतिवक्तुं न जानामि" इति; एवमेवास्माकं मतमपराणि च मतानि वर्तन्ते।

चरितं पश्यामश्चेत्, अपराणि मतान्यस्माकं देश एकैकस्मिन् समय एकैकं कारणमनुसृत्य प्राचरन्निति जानीमः। दुर्भिक्षावसरे प्रलोभनेन कानिचन मतानि प्रचरन्ति। ततश्च तेषां मूलाधारस्तत्त्वं विनैवाश्रयमसत्कल्पं भवति। युद्धकाल आक्रमणेन कानिचन मतानि समतन्वत। अतिप्रबलो यदि प्रत्यवतिष्ठेत, तदा तान्यपसरेयुरेव। एवं सर्वेषां समानो धर्म

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति मतानि पतन्ति चेत्, समूलमेव पतन्ति। पृथक् पृथग् विभक्ता धर्मा यदि स्युः, ते तेषु परस्परं रक्षन्त एव तिष्ठेयुः। आकाशविमानेषु बाष्प-पेटिकामेकामेव न्यवेशयन्। तत्र यद्येकं द्वारमपि भवेत्, सर्वापि पेटिका दुष्येत्। अतोऽनन्तरं बह्वीः पेटिका न्यवेशयन्। एका छिद्रिता चेदपि, अपराः समीचीनाः स्थास्यन्ति। सर्वास्ताः पेटिकाः पृथक् पृथग् वर्तन्ते चेदपि न प्रयोजनम्। सर्वास्समेत्यैकस्मिन्नेव स्थान एकमेवा-वधारयन्त्यः पृथक् पृथगवतिष्ठेरन्। तद्वत् अस्माकं धर्माः पृथक् पृथग् भवन्ति चेदपि, तेष्वेकं सामरस्यमवतिष्ठेतैव।

एवमेकैकस्य पृथक् पृथग् विभिन्नविभिन्नेषु मतेषु स्थितेष्वपि एतैर्धर्मानुष्ठानैः सर्वेषां समानमेव फलं भवति, समानं बलमपि च भवति। एकं समाजमेकेनैव धर्मेणावतिष्ठस्वेति कश्चन राज्याधिकारी नियमितुं न पारयति। तथा करणे तत् स्थिरं न स्यात्। एकमन्तर्माऽऽगच्छेति चिरं न वारयितुं पारयामः। कश्चन कस्मिंश्चन दिनेऽनाचरणेन स्वयमेव विविक्त एव वर्तते इति, अनेन धर्मेणेहपरलोकयोः कुशलं भवतीति चानादि-कालतोऽस्माकं धर्मः स्थिरो वर्तते। मतान्तरवत् सर्वेऽप्येकं धर्ममनुतिष्ठन्ति चेदपि, अज्ञानेनैव तत्तद्वर्णोचितधर्मान् सर्वेऽप्यनुतिष्ठन्ति चेदप्यस्मदीयं मतमेवं दीर्घं जीविष्यति।

एकस्मिन् गृहे चत्वारः सोदरा वर्तन्ते। ज्येष्ठो गृहेऽवतिष्ठमानः पूजयति। अनन्तरो धनस्यायव्ययौ परीक्षते। अपरो गार्ह्याणि वस्तूनि संभरति। अन्तिमः सोदरः क्षेत्रं गत्वा कृषिकार्यं पर्यालोचयति। एवं गृहकृत्यानां पृथक् पृथग् विभज्य निर्वहणं सर्वेषामेव सुखाय। गृहकृत्यान्यपि सम्यग् निरूह्यन्ते। विनैवेवं प्रकारं सर्वे सर्वाणि कार्याणि समीक्षन्ते चेत्, किं प्रयोजनम्? वितथं क्लेश एव स्यात्। कुटुम्बमेव यथावद् न प्रचलेत्। एकैकस्य कृत्यं सर्वेषां सुखं दद्यात्। चातुर्वर्ण्यमप्येवमेव वर्तते। ब्राह्मणः स्वानि कर्माणि करोति सर्वानेवोद्दिश्य। चण्डालस्यापत्यानां कुशलमपि तान्यभिप्रयन्ति। राजा राज्यं करोति सर्वेषामेव कुशलमभि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्य। वैश्यस्य वाणिज्यमपीदृशमेव। एतेन नियमेन लोकव्यवहारास्सुलभं प्रचलन्ति, कुशलं भवति। अस्य विपर्यये लोकक्षेमोऽपि विपरीयात्। पूजां कर्मानुष्ठानं च कर्तुमर्हा जातिरतीव नियन्त्र्यते। तेन नियमेन सर्वेऽपि फलमनुभवन्ति। अन्ये यद् दूरे तिष्ठन्ति, तत् स्वेषामपि श्रेयो जनयितुमेव। अस्माभिः क्रियमाणस्य श्राद्धस्य कृते कञ्चन निमन्त्रितो ब्राह्मणो यदि शुद्धः समागच्छति, कुतस्त्वं केवलं शुद्धो वर्तसे, अहं त्वां स्पृशेयम्, इति वदन सन यदि कञ्चन तं स्पृशति, कस्य वा हानिः ? उभयोरपि खलु ! नहि।

तस्माद् एक एव धर्मो बहुधा विभज्यत इति बहवो गुणा वर्तन्ते। अस्माकं धर्मः सर्वदाऽमृत एव वर्तते इत्यत्रापि प्रथममिदमेव निदानम्। धर्मेषु विभागोऽप्यपेक्ष्यते, ऐक्यमप्यपेक्ष्यते। सहसैव विभक्ता एव न भवितुमर्हन्ति, अत्यन्तं सहसैवाभेदेनापि स्थातुं न शक्नुवन्ति। केचन सहसैव भेदयितुं प्रयतन्ते, अपरे तु सहसैवाभेदयितुमायतन्ते। एवमुभयमपि मा भवत्विति धर्मशास्त्राणि वदन्ति। अहं तेषां प्रतिभूभूयाऽऽगच्छम्। अत एव भेदोऽपि माऽस्तु, अभेदोऽपि माऽस्तु, सहसैवोभयमपि न सांप्रतमिति वदामि।

अस्पर्शनावस्थानं बहुमानमेव सूचयति, न द्वेषम्, अतोऽनेकेषामेकीभूय भोजनं नावश्यकमिति, स्वजातिं परिहाय जात्यन्तरेषु संकीर्णो विवाहोऽपि नावश्यक इति, अन्तरेणापीमे जनतैकमनस्कैव स्यादिति च मुख्या अर्थशास्त्रव्यवहारिणो वदन्ति। स्पर्शोऽपि नावश्यक इति त्वहं वदामि। सहभुञ्जानासु सहविवहन्तीषु एकीभूय स्पर्शंस्पर्शं घूर्णंघूर्णं चावतिष्ठमानासु च पाश्चात्त्यजातिषु कतिकत्यहमहमिकावादाः कलहाश्च दृश्यन्ते !

कियत्यामपि भेदबुद्धौ यदि वस्तुगत्या प्रेम, शान्तिः समुदियात्, कियत्यप्यैक्ये सति यदि न प्रेम, कलह एवाङ्कुरयेत। सर्वासु जातिष्वेकरूपं प्रेमावतिष्ठेत। अस्माकं मातृष्वपत्येषु च यादृक् प्रेमास्माकं वर्तते, तादृशं प्रेम चण्डालेष्वपि स्यात्। कियत्स्वपि क्लेशेषु न प्रेम परिहातुमर्हामः। तत्तु प्रेम धर्ममार्गाविरुद्धं भवितुमर्हति। दारिद्र्यनिवारणे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा दुःखनिवारणे वा जात्यन्तरेषु प्रेम न्यस्यास्मच्छक्तिमतिक्रम्य कृत्वापि तत् प्रेम वर्धयितुमर्हामः। अस्माकं बुद्धौ प्रतिभासमानं सर्वं सम्यगेवेति न वक्तुं प्रभूयते। यदेकदा प्रतिभाति, न तदन्यदा प्रतिभाति। ततः शान्ता धीराश्च भूत्वा धर्मं रक्षितुमर्हामः। अद्यैकं वदन्त एव पुनः कालान्तरेऽन्यथाऽन्यद्वदेयुः। सहजगिधः संकरविवाहश्च नावश्यक इत्याद्यवदन्नेव। कश्चन स्पर्शोऽपि नावश्यक इति वक्तुं योग्यः समयोऽपि समापतेदपि स्यात्।

नन्दः (चण्डालो जात्या) देवालयं नागमिष्यामीत्यवदत्। ब्राह्मणा अवश्यमागन्तव्यमित्यवदन्। परमेश्वरो नन्दिनमपसार्यात्मानं दर्शयामास। त्रिष्वेतेष्वन्तर्निहितं तत्त्वमेव वर्णाश्रमधर्मो नाम। नन्द एव तं धर्ममभ्यरक्षदिति वक्तुमर्हामः।

यस्यां कस्यामपि जातौ वस्तुसत् प्रेम यदि स्यात्. शान्तिर्भवेत्। एकग्रामस्य ग्रामान्तरस्य चोपनदमधिकृत्य यदा कलहो भवति, एतद्ग्रामीणान् चण्डालानारभ्य ब्राह्मणान् यावत् सर्वेऽपि समवयन्ति, एवमेव तस्मिन्नपि ग्रामे समवयन्ति। एतद्ग्रामीणाश्चण्डालास्तद्ग्रामीणाश्च चण्डाला जात्या समाना एव, इति न समवयन्ति। एको ग्राम इत्यैक्यमेव तत्र कारणम्। एतद्ग्रामस्थश्चण्डालस्तद्ग्रामस्थचण्डालेन युद्धं करोति। सर्वेषां समानं कार्यम्, अतोऽत्र जातिभेदो न समीक्ष्यते। एकैकोऽपि ग्रामाय युध्यते। तथैव मनसोऽप्यैक्यमुदेतुमर्हति।

ब्राह्मणैः क्रियमाणे वैश्वदेवे चण्डालेभ्यो बलिर्देय इति शास्त्रं वदति। तस्मा अयं करोति, अत एकैकस्मिन्नपि प्रेम वर्तत इति प्रतिभाति। प्राचीनकाले ग्रामेषु प्रेमैकमत्यं चावातिष्ठत। काल-देशपरिस्थितिपरिवृत्त्या ग्रामसमुदायोऽपि परावर्तत। धनिका नगरं प्रत्यागच्छन्। तत्रैकैकोऽपि पृथक् पृथग् विना प्रेम वस्तुमारभन्त। ग्रामीणो बन्धः शिथिल्यमवत। तस्मिन समये मतान्तरस्थाः प्रविश्योपादिशन। ततो जातिसमया व्यनश्यन। ते दारिद्र्यस्याधिक्यावसरे स्वीयं मतं प्राचारयन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामीणा दरिद्रा व्यामुह्यन्त। तेषां मते प्राविशन। अस्मन्मते प्रविशतां मतान्तरे प्रविशतांश्चैको महान् विशेषो वर्तते, दरिद्रा भृत्यवर्गाश्चास्मान्मताद् मतान्तरं प्रति गच्छन्ति, मतान्तरस्थास्तु प्रायशस्तत्त्वं विचारितवन्त एवास्माकं मते समागच्छन्ति।

प्रविष्टेष्वेव मतान्तरस्थेषु वयमस्मन्मतस्थानभिरक्षितुं प्रयतितुमर्हामः तदा तदकरणेन सांप्रतमेकमत्यस्य न्यूनता समजनि।

पाश्चात्यान् मतान्तरस्थान् वयं कुतोऽनुकुर्महे ? गति-परिधानभावनासु त एव नूनमस्माननुकुर्वतामिति सुधीरमस्माकं स्थितावेवावस्थातुमर्हामः। अस्माकं मते सर्वसाधारणतयोक्तान् धर्मान् सम्यगाचरितुमर्हामः। वस्तुसत् प्रेम वर्तते चेत्, क्लेशाः स्वयमेव निवर्तेरन्। विशेषधर्मास्सत्र साधारणस्य मतस्य मूलावष्टम्भाः सन्ति। या कापि राजनीतिर्भवतु, या काप्यवस्था भवतु, तथाप्यस्याकं धर्ममनुष्ठातुमर्हामः। जीवयात्रामुपलभ्य धर्मा अहीयन्त। एवं न परित्यक्तुमर्हामः। आपत्तावपि धर्मे परमेका दृष्टिरपेक्ष्यते, न धर्मानुष्ठानं परित्यक्तुमर्हामः। एकैकस्य स्वस्ववर्णोचितमनुष्ठानं सामान्यतो देशस्यैव क्षेममादध्यात्। ब्राह्मणाः स्नानं सन्ध्यां पूजाप्रभृतीनि च चण्डालानामपि कुशलार्थेऽनुष्ठातुमर्हन्ति। अस्मन्मतरक्षणस्य शास्त्रमेव मार्गं दर्शयति। दुःखस्य प्रेमैव शमनम्। वस्तुगत्याऽस्मासु यदि प्रेम स्यात, वयं जयं लभेमहि। परस्परसाहाय्यं प्रेम्णा कर्तुमर्हामः। कुत्रापि काले प्रेम न न्यूनतामर्हति। चिन्तामपसारयितुमर्हामः। कस्मिन्नपि विपरीतसंभवे न प्रेम परित्यक्तुमर्हामः। अस्मदीयान् समीचीनान् प्रयत्नान् कुर्वन्त एव स्थातुमर्हामः। परेषामुपकर्तुमर्हामः।

घूर्णितेऽपि लोकेऽस्मदीयानि कर्तव्यानि कुर्वाणा विनाभीति प्रेम्णा साधारणधर्मान् सुरक्षन्तो यथासंभवं विशेषधर्मान् रक्षितुमर्हामः। तदुचितां शक्तिं भगवान् वितरतात्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरभारतोदशाविमर्शः

(पौषसञ्जिकातोऽनुवृत्तः)

[निबन्धकः—श्रीवटुकनाथभट्टाचार्यः एम्. ए. विएल्.]

उपक्रान्ते गृहदाहे तन्निर्वापनाय सर्वैरपि स्त्री-पुरुष-बालयुववृद्धनिर्विशेषं प्रयतितव्यम्। एवं बुद्ध्या अकिञ्चनत्वमात्मनोऽनुभूयापि प्रयस्यते मया कांश्चनोपायान् निर्दिष्टुम्। धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः सिद्धमेवैतद् वचनम्। जीवनेन साकं न केवलं जीविकायाः, परन्तु सर्वस्यैव वर्तते पदार्थस्याच्छेद्यः संबन्धः। नोद्भवन्ति, न वर्द्धन्ते वा यथोद्भिदः क्षितिसंसर्गविरहिताः न वा जीवन्ति, तथैव परिहाय प्रयोजनानि मनुजानां न प्रभवन्ति चतुर्दश विद्याः, चतुःषष्टिकला वा नाप्नुवन्ति परिपोषम्। आकृष्य भूमितो रसान् युज्यन्ते पादपाः शाखाप्रशाखापल्लवपुष्पफलैः। एवं वाङ्मयमपि प्राणान् आहरति प्राणवद्भ्यः सामाजिकजीवनिवहेभ्यः, ततश्च पुष्णाति समृद्धिं श्रियञ्च। उन्मूलिताः पुनस्तरवः शुष्यन्ति, जीर्यन्ति, विनाशमुपयन्ति। सामाजिकानां प्रयोजनान्येव वाङ्मयस्य मूलानि। तेषामन्तः प्रस्फुरन्तो भावा एव काण्डः। भाषान्तरेण चेत्तानि प्रयोजनानि सिद्धेयुः भावाश्च ते सामग्र्येण प्रकाश्येरन् तदा संस्कृतभाषा निरवकाशेव शीर्यत, जीर्यत च—को वा विस्मयोऽत्र संगच्छते ?

सामाजिकजीवनेन साकं संस्कृतविद्यायाः संयोगं द्रढयितुं सर्वथा कार्यः प्रयत्नः—प्रथमोऽयमुपाय इति कृत्वा। कथं पुनरर्हति प्रयोगं तदुपायम् इत्यत्र विद्वद्वर्याणाम् अवधानं प्रार्थ्यते। नास्माकं पूर्वजैः कृतचर एवंरूपः प्रयत्न इति नैव सम्भावनीयम्। वेदोऽखिलो धर्ममूलमिति सुविदितमेव। गृह्यसूत्रेभ्यो धर्मसूत्रेभ्यश्च सन्ध्याय यथाप्रयोजनं विधिनिषेधान् स्मृत्वा च तान् मन्वत्रि-विष्णु-हारीत-याज्ञवल्क्यादयो महर्षयः प्रणिन्युर्विंशसंहिताः स्मृतिशास्त्रस्य मूलभूताः। अथ पुनः कालवशात् प्रयोजनानुरोधाच्च स्मृति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचनानामपेक्षिते समन्वये—असहाय-विश्वरूपापरार्क-विज्ञानेश्वर-जीमूतवाहनप्रभृतयो निबन्धकाराः स्वस्वग्रन्थान् निर्ममिरे। मन्त्र-ब्राह्मणात्मकनिगमेभ्य एवाहृतानि तावदाख्यानोपाख्यानानि पुराणेषु निबबन्धिरे, अन्यान्यपि संयुयुजिरे जनानामुपदेशार्थं विनोदार्थंश्च। लोकशिक्षासौकर्यार्थमेव प्रचारं बहुलमापुः पुराणानि। समाजपतीनां सम्प्रदायसंरक्षकाणाञ्च चिरप्रसिद्धमेतत् कर्म येन क्रमोपचीयमानजनसङ्घेषु अभ्युदयनिःश्रेयसकराण्याप्नुवन्ति प्रचारं तत्त्वानि। संघटते रीत्याऽनयैव प्राक्तनार्वाचीनानां पारम्पर्यम् अन्योन्यानुस्यूतिश्च। न केवलं पूर्वेषां बिन्दुरुधिरसम्भवदेहाश्रयणेन सन्तानत्वं सन्तानानाम्, परन्तु तेषां मनोमयविग्रहोत्तराधिकारितया च। विच्छिन्ने खल्वेतस्मिन् उत्तराधिकारसूत्रे मनुजेषु जातिव्यवस्थाऽप्युच्छिद्येत न विद्येरन् वर्णानां सम्प्रदायानां समाजानां वा विभागाः। एतदर्थंश्च प्रवर्त्तितानि महाभारतादीनां पठनम्, रामायणसप्तशतीगानम्, पुराणव्याख्यानानि च व्यतीते समये लोकसंग्रहेप्सुभिः समाजमुख्यैः। कथं पुनरधुना सम्पत्स्यते तत् कर्म संस्कृतवाङ्मयमवलम्ब्य बहुशोऽनुष्ठितपूर्वं, तत् सर्वैरपि विभाव्यम्।

देवभाषायां वाङ्मन्थरत्वं वङ्गीयानां विदुषामपि कौलीनास्पदं कथं व्युदास्यम्—कथं वा तत्रालापपाटवम् अधिगन्तव्यं विद्यार्थिभिरध्यापकैश्च—क्वचिदेव तदस्माभिः विमृश्यते। न परिदेवनेन न वा दोषदर्शनेन सम्भवत्यस्याः प्रतीकारोऽवस्थायाः। सरलसंस्कृतभाषया तावदध्यापनं प्रतीकारोपायानां पुरत एव भाति। आङ्लभाषया वैदेशिक्यापि चेद् विश्वविद्यालयाधीनासु सकलपाठशालासु सम्भवत्यध्यापनम्, तदा सकलभारतीयभाषाजननीभूतया परमात्मीयया गीर्वाणवाण्या चतुष्पाठीष्वध्यापनं कथं न सिध्येत्—न तत् सम्यगवबुध्यते। नियतम् अभ्यास एव सौकर्यं जनयति, पाटवञ्च ददाति सर्वजनविदितमविसंवादितञ्चेति तत्त्वम्। संस्कृतभाषया सर्व एव पण्डिता विद्यार्थिनश्च चेदालपेयुस्तदा विनैव अनतिविपुलायासम् अस्याः प्रचलनं प्रसारश्च भवितेत्यत्र नास्ति सन्देहावकाशः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपायान्तरमपि संदृश्यते पुरत एव। शास्त्रार्थविचारेषु च संस्कृत-विद्यार्थिभिस्तदुपाध्यायैश्च देवभाषाऽवलम्बनीया। नहि जलावतरणमात्र-भीतेन शिक्ष्यते कदापि सन्तरणकौशलम्। अज्ञानादेव भयम्, अभयञ्च ज्ञानत एव। निरन्तरं संस्कृतवाङ्मयालोचनया परिमार्जितमतिभि-स्तदन्तर्गततत्त्वनिकरैश्च परिपुष्टान्तःकरणैर्विद्याव्यसनिभिः स्वल्पेनैवायासेन प्रागल्भ्यमधिगन्तुं शक्यत इति सम्भावयामः।

वाङ्मयं सामाजिकानामेव प्रयोजनानि साधयतीति पूर्वमेवोक्तम्। संस्कृतभाषयाधुनिकजनानां कानि तावत् प्रयोजनानि कथं वा सिध्येयु-स्तत् सर्वथाऽनुसन्धेयम्। सन्ति तावद्गणितानि तत्त्वानि महार्ध्याणि च शास्त्रेषु, काव्येषु, दर्शनेषु च—परन्तु यथा तानि साम्प्रतिकानाम् आकर्षेयु-श्चतांसि तथैवोपस्थाप्यानि। न हि मधुररसार्थिनस्तृप्तये पथ्योऽपि कटु-तिक्तोपयोगः कल्प्यते। न कदाप्यनीदृशं जगदित्याहुस्तत्त्वविदः—तथापि विद्यते वैलक्षण्यम् इदानीन्तनानां पूर्वजेभ्यः। अथवा वैलक्षण्यमेव वैयक्तिको धर्मः सार्वपदार्थिकः। भिद्यन्ते युगाः, भिद्यन्ते मात्राः, भिद्यन्ते च मनो-वृत्तयः। एतदेव संस्कृत्य संस्कृतविद्यानिरतैः कार्योऽभियोगः। अन्यथा मेषशृङ्गसंघातेन त्रुट्यति यथा हीरकस्यापि निशिता धारा—तथैव गुण-भूयिष्ठस्यापि भवति लाघवम् अप्रतिविधेयप्रतिकूलावस्थाव्याहतस्य। अत एव निपुणधिषणया संस्कृतवाङ्मयाद् रत्नाकरादिवामेयात् सञ्चेया विषयास्तथ्यानि च—सञ्चित्य च कृतधियां पुरतः सर्वमेव संस्थापनीयम्। अरण्यानीपरिगता विस्मृता नगरीव, भूप्रोथितो निधिरिव असम्यक्-परिचयादेतदन्तर्गतानि तत्त्वानि नापतन्ति नो दृष्टिपथम्। तेषामाविष्करणे कार्यः समधिकः प्रयासः प्राचीनशैल्या शिक्षितैर्यथा किल वैदेशिकरीत्या कृतश्रमैः सन्ततं क्रियते। नहि संरक्षणमात्रेण भवति विद्यायाः प्रकर्षः—अपेक्ष्यते सम्पोषः प्रसारश्च—उद्भावनमाविष्करणमपि। अन्यथा शैवाल-दामप्रतिरुद्धरया, खातोच्छ्रयाच्च शीर्णपरिसरा, श्रोतोऽपगमात् क्लेदबहुला, सरिदिव कालेन साऽदृश्यतां यास्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवर्त्ततेऽधुना वङ्गेषु विकरालः कालः—प्रसरति सर्वतः प्रचेष्टा हिन्दुनामाभिहितानां जनगणानां गौरवास्पदानि सकलान्यपि वस्तूनि वितथीकर्तुं शनैः शनैरुत्सादयितुञ्च। तेषां संरक्षणञ्चेदस्माकं काम्यम्—अथवा न केवलं काम्यं परन्तु स्वतन्त्रसत्तयाऽनुस्यूतम्—तदा सर्वविधप्रयत्नेन संरक्ष्या संस्कृतभाषा सूत्रे मणिगणा इव, तद्ग्रथिता पूर्वेषां मनीषिणां मननप्रसूता भावानाम् अप्रतिमानां सम्पत्। अचिन्त्याः खलु ये भावा न तांस्तर्केण चालयेदिति निर्दिशति भारतीया पुराणी प्रज्ञा। परन्तु प्रवृत्तेऽस्मिन् कलिसमये ब्रह्मचर्य-गार्हस्थ्य-सन्न्यास-संयम-पातिव्रत्य-शरणागतिप्रभृतिभावानाम् ऐहिकामुष्मिककल्याणमूलानां समुन्मूलनमेव तार्किकधुरन्धराणां कथाख्यानादिरचयितृणां काव्यनाटकादिप्रणेतृणाञ्च प्रात्यहिकः सञ्जातो व्यवसायो महद् व्रतं वा। महदिदन्तावत् सौभाग्यमास्तेऽखण्डितमद्यापि यत् संस्कृत-साहित्य-रसिकास्तन्निबन्धारश्च विप्लवकरैरेतैर्भावैर्नाभिभूताः। इदमेव सिध्यत्येतावता यद् निपुणं पर्यालोचनीयो जगद्व्यापारो जनमनसां वृत्तिनिचयश्च।

आसीत् पुरा विजेतृभिरनार्यैरसंस्पृष्टम्, निरन्तरं सामगानमुखरितम् आज्यहोमधूमामोदितं देवमुनिपादरजसा पवित्रीकृतं शान्तमिवाश्रमपदं भारतवर्षम्।

गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे।
मन्ये विधात्रा जगदेककाननं सुनिर्मितं वर्षमिदं सुशोभनम्॥

धर्माख्यपुष्पाणि कियन्ति यत्र वै कैवल्यरूपञ्च फलं प्रसूयते।

अधुना पुनर्दिशि दिशि हा हन्त "यदुपतेः क्व गता मथुरापुरी, रघुपतेः क्व गतोत्तरकोशले"ति खेदध्वनिरेव कम्पयन् वायुमण्डलं विदार्य नभस्तलम् उत्तिष्ठत्यनुदिनम्। जगतीतलगौरवभूतोऽयं विशालो भूभागोऽभजत पुरा मुनिसिद्धाध्युषितं हैमवतं कन्दरमिव वसुधातलभोगभिन्नताम्। अधुना पुनर्वयं तत्रैवावस्थायामपि निवसामो बद्धापणे चतुष्पथे वणिजां गतागतविमर्दिते—प्रतिनियतं नानादेशीयमनुजैः साकं व्यवहारपरम्परया विकृष्ट-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानसाः सन्तः। गृहकोणावद्धस्येव नाचारो भवितुमर्हति सुदूरमध्वानं प्रस्थितस्य प्रवासिनः पथिकस्य। देशं कालञ्चानुसृत्य, जगद्व्यापारञ्च निपुणं पर्यवेक्ष्य निरूपणीयो बुद्धिमता स्वकर्मप्रकारः। नहि काल-प्रभावोऽवगणयितुं शक्यते शक्तिमत्तमेनापि पुरुषेण। अत एवाह पराशरो महामुनिः—

युगे युगे च ये धर्मास्तेषु तेषु च ये द्विजाः।
तेषां निन्दा न कर्तव्या युगरूपा हि ते स्मृताः॥ इति

संस्कृतवाङ्मयसंरक्षणप्रयत्नेऽपि नीतिरियम् अवलम्बनीया प्रतिभाति। यानि खलु तत्त्वानि जानन्ति मुग्धा अपीदानीन्तनाः—येषु चाज्ञातेषु पण्डितप्रकाण्डस्यापि भवति लाघवं जनसंसदि—आधुनिकानि तानि विज्ञानेतिहास-खगोल-भूगोलाधिकृतानि तत्त्वानि यथा चतुष्पाठीषु यथासम्भवं संस्कृतभाषया आलोच्यन्ते तथा तदधिकारिभिर्विधेयम्।

पितराविव सम्पृक्तौ वागर्थौ—तयोः पुनरर्थः पितेव, वाक् च मातेव। पुमांसमवलम्ब्यैव परिदृश्यते स्त्रियाः संस्थितिः। महीरुहमालिङ्ग्यैव जीवति शोभते च व्रतती। उपचीयमानायामर्थसम्पदि भवति वाचोऽपि वैभवम्। यथा खलु मधुकरो रसमाहरति पुष्पादुत्पत्य पुष्पान्तरं भजन एवं ज्ञान-विज्ञानसुमनोभिरुद्भासिते कुल्याभिरिव सरिद्भिः परिषिक्ते, दीर्घिकाभि-रिवार्णवैः परिव्याप्ते, पश्चिमोदीच्यपुरोमलयादिमरुद्भिः परिवीजिते, शरच्छिशिरवसन्तग्रीष्मर्तुचक्रनृत्येन निरन्तरं परिशोभिते, क्रीडाशैलैरिव भूधरैस्तरङ्गायिते वन्धुरे भूमण्डलव्यापिन्यस्मिन् महत्युपवने, विहरन वृन्दावने हरिरिव सर्वतो विसारिधिषणयाऽन्वितः पुरुषोऽपि प्रतिभोल्वणः सञ्चिनोत्यर्थान भावांश्च, वितरति तान् स्वजनेभ्यः, सहृदयेभ्यो, लभते च मानुषजन्मसाफल्यम्। आदानविसर्गाभ्यां भवति विद्यायाः परिपोषः—न केवलं संरक्षणमात्रव्यसनेन।

विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम्।
असूयकाय मां मा दास्तथा स्यां वीर्यवत्तमा॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवम् उपदिशता महर्षिणा मनुनैव विहितम्—

श्रद्दधानः शुभां विद्यामाददीतावरादपि ।

अन्त्यादपि परं धर्मम्..... ।

इति नानामयाकुलैरस्माभिर्न विस्मर्तव्यं परन्तु भक्तिनम्रेण शिरसा ग्राह्यं प्रतिपाल्यं च श्रुत्युक्तम् उदाररमणीयं वचः—यद्वै किञ्चन मनुरवदत्तद्भेषजं तद्भेषजमिति ।

विरम्यतेऽथेदानीं विदुषां नूनं श्रुतिव्यथकादस्माद् प्रयत्नाद्, वधिरस्येव कर्कशस्वरस्यापि गीतव्यसनिनः कण्ठतालवभिघातजव्यापारात् । व्यापारेऽत्र विद्यार्थिनः प्रणोदयितुं प्रोत्साहयितुञ्च प्रभवन्ति विद्वद्वरा एव—न मादृशाः स्वयमसिद्धाः साधयितुमन्यान् कृतवितथप्रयत्नाः ।

यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।

स यत प्रमाणं कुरुते लोकस्तदनुवर्तते ।।

येषां रसनासु नृत्यति सुरभारती—याननुवर्तते वाग् वश्येव—त एव पण्डितमुख्याश्छात्राणां मनःसु संस्कृतवाङ्मयावगाहनप्रयोजनगौरवम् आयसाक्षरैरिव मुद्रापयितुं शक्नुवन्ति । गरिष्ठमुपदेशवचनशतेभ्योऽपि शिष्टानाम् अनुष्ठानम्—सुतरां फलोपधायकञ्चेति विदितमेव लोकज्ञानाम् । त एवात्र विषये अग्रेसरीभवितुमर्हन्ति । विभिन्नप्रत्ययप्रयोगेन वाक्शब्दादेकस्मादपि सिध्यति वाग्मि-वाचाट-वाचालेति पदत्रितयम् । तत्र प्रथममेव सूचयति कृतित्वम्,—शिष्टत्रितयन्तावद् व्यञ्जनया अनुचितं प्रागल्भ्यमात्रम् । परन्तु मनःसंयोगमाकृष्टुम् अनवहितचेतसः, कल्पते यथा तारस्वरः कर्कश एव—न तु मृदुमधुरवीणानिक्वणः श्रुतिसुखकरस्तथैव प्रागल्भ्यमात्रसारोऽपि कर्कशपदगुम्फितोऽपि मे प्रबन्धः प्रभवेच्चेद् देवभाषाया दुःखाकरम् आधुनिकीमवस्थां प्रति विद्वज्जनानां चेतांसि प्रसभं पातयितुं तदा लाघवमलाघवं वा भवत्वात्मनो न मुहूर्त्तमपि तद् गणयामि, परन्तु जानामि सफलमेवेमं प्रयत्नम् ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गर्ते पतेत् क्रोधनः

[निबन्धकः—पि. वि. वरदराजशर्मा]

व्युष्टा रजनी। महति प्रत्यूषे कृतस्नानः फलकमध्यासीन उदासीन इव लोकव्यवहारे दृढगृहीतनासाग्रभागः किमपि मन्दमन्तर्वदनञ्जपन्नवर्तिषि। प्रावुध्यन्त सुखसुप्ताः शिशुकपोताः। कश्चिद्दन्तान्धावयति। अन्यस्तूच्चैस्तरां किमपि पठति। अपरो विहरति। अवरश्च तारं विरौति। महान् कोलाहलः। कर्णभेदी बहलध्वनिः। गृह्यकशालायां युगपद्विरुवतां गोमायुयूनां शतस्य, विंशत्या जरत्कीशकुलस्य, दशावराणां सारमेयाणां यावानारावो भवेत्, (किमसौ भवत्स्वन्यतमेनाप्यनुभूतः ?) ततो मात्रयाप्यन्यून आसीदारावः। ध्येयादुदचलच्चित्तम्।

कुतोऽयं कोलाहल इति सनिर्वेदं शिर आहत्यात्युच्चैरुदाक्रन्दम्। सर्वोऽपि हि बलाधिकाद् बिभेति। ममापि महान्तन्निध्वानमाकर्ण्य भीत्येव मनागशमदर्भकाणामारावः। अवरो वराको ममाधिक्षेपमसहमान इवानारतं रटन्नेवावर्तत।

अहो कोऽयं कष्टकालः, किमर्थमसौ विरौति, इति साधिक्षेपमभर्त्सयम्। को नामोत्तरयतु, "क्रीडनकनिमित्तं कलहः। किं भवतामनेन। प्रकृतमनुसरत, इति सानुनयमवादीद्गृहजनः। परस्तादेव कलहबीजमवागच्छम्। ह्यः किल सायं कनिष्ठोऽसौ यतः कुतश्चिद्रङ्गभूतारकायाः कस्याश्चन प्रतिकृतिमेकामध्यगमत्। आनीय तां कौतुकभरितः प्रादर्शयदग्रजन्मने। शैशवसर्वस्वं क्रीडनकं नाम, सोऽपि तैस्तैरुपच्छन्दनवचनैरुपायैरेनं प्रलोभ्य प्रतिकृतिं स्वहस्तगतामतानीत्।

तावतैव कथा सा विस्मृता। विस्मरणशीलो हि बालभावः। प्रातः प्रबोधानुपदमेवापत्येष्वन्यतमं समधुक्षयदेनं अग्रजेनापहृता ते प्रतिकृतिरिति। स च मे प्रतिकृतिं प्रयच्छेति रोदिति। को नाम समाधत्ताम् ? कथन्नु ? कश्चैनं सान्त्वयतु ? विनष्टैव प्रतिकृतिः कथमपि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नश्यत्वयमल्पायुरिति प्रस्फुरता कोपेन भित्त्यवलम्बितां रमायाः प्रतिमामदाम्। मर्कटमुष्टिरसौ दुष्टः कनिष्ठो न तावतापि तुष्यतिस्म। न वा विरमति कर्णारुन्तुदाद्रोदनात्। न तदाक्ष्यम्, न तदुपच्छन्दनवचनम्, नासावुपायः येनासौ नानुनीतः। नासौ प्रकृतिं प्रापद्यत। विकृतं मे मनः। शेमुषीमदोषयद्रोषः। "शेषं कोपेन पूरयेत्"।

अहह किमिदं प्रारब्धविजृम्भितम्, म्रियस्व पापिन्नित्याकुञ्च्य पूर्वकायं तलेनाभ्यहनम्। सुकुमारोऽसौ कुमारः कथं सहताम्। गहनो ग्रहचारः। वात्योपहत इव कदलीकाण्डो धरणीं शरणीचकार। न खल्वेकाकिनी विपदापतति। कोणविनिहितायां दारुखण्डिकायां ताडितं शिरः। दिष्ट्या न पाटितम्। क्षणेन शोणितोक्षिता क्षोणी शोणा शोणेव सरिद्भीषणाऽदृश्यत। एकश्शोणितमहाह्रदः।

अपरत्र गृहजनस्याऽऽर्तरावः। अहह निहतश्शिशुः। फलितं मन्त्रप्रभावेण। मृतं मे स्नेहसर्वस्वम्। वत्स, वत्से, गृहाणेदम्, संस्तम्भय बालकम्। अय्या...य्यो, अविदमादिके यदि कोपो नाम भवति किमीदृशो भवति। नासिकायां गृहीतायां मनश्चेन्न्यग्रहीष्यत नेदं पापमापतिष्यत्। न वा पञ्चाक्षय्याः स्थाने "माहं कोपवशो भूवमि"ति चेदजपिष्यत क्लेशोऽयमुदपत्स्यत। नाद्यापि शाम्यति रुधिरधारा। शीघ्रमाकार्यतां भिषक्। किं विलम्बध्वे। निरालम्बालम्बेऽहमम्बरतले। किं कर्णे कुरुध्वे इति।

अनुशयविवशोऽहमस्यां दुर्दशायान्दशमीमेव दशामात्मनः प्रेयसीममंसि। 'नहि शक्यं परित्यक्तुमात्मच्छन्देन जीवितम्।' किं क्रियताम्। किङ्कर्तव्यतामूढोऽहं दरेतरया त्वरयाऽऽशुपत्तीं प्रातिष्ठे। बालस्य रोदनं द्विगुणमवर्धत। तदुपरि गृहजनस्य गालीबहलधारालधारा। न गेहेऽप्यवस्थातव्यम्। वरं रोदनमेकम्। वृश्चिकदष्टः पाटचर इवावचनमवलम्बितशिरा उदचलम्। सर्वोऽसौ धीरावधीरिणो महिमा क्रोधस्य। साधूक्तम्, "युक्तायुक्तविवेकरिक्तधिषणो गर्तं पतेत्क्रोधनः" इति। भवतु वैद्यरत्नमामन्त्र्य कथाशेषं कथयिष्यामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीनसाहित्ये विज्ञानपरिचयः

[निबन्धकः—श्रीकालीपद-काव्यव्याकरणतीर्थः]

अहो वैचित्र्यम्, यदा सर्वेऽपि सर्वदेशीया मानवा मोहान्धकार-समाच्छन्नाः केवलं स्वेच्छाहारविहारेषु निरुद्धचेतसः शिष्टविगर्हितं समाचरन्तो निष्फलञ्च जीवितं वहन्तः कालमनयन्, यदा च पाश्चात्त्या नरा आममांसभोजिनः शौचाचारविरहिता परस्परं कलहायमाना हिंस्रस्वभावाश्च आसन्, तस्मात् स्मृतेरतीतकालादारभ्य भारतवर्षमिदं प्रदीपस्येव ज्ञानस्य विज्ञानस्य च प्रभया समुद्भासितं बभूव। तत्रत्यैर्महर्षिभिः प्रणीतानि शास्त्राण्येव तत्प्रामाणि सूचयन्ति वर्तन्ते।

अलोकसामान्यतपःप्रभावेण लब्धज्ञाना ते हि भारतीया महर्षयो योगबलेन साक्षात्कृतपरमेश्वरा बभूवुः। अतस्तेषां परमेश्वरानुग्रहेण दृग्गोचरं किमपि नासीत्। तपोबलेनैव ते परोक्षमपरोक्षञ्च सर्वमेव वस्तु याथार्थ्येनोपलभ्य लोकहिताय शास्त्रेषु निहितवन्तः। न केवलं मोक्षोपयोगिनि ज्ञाने तेषां बुद्धिः प्रससार, परन्तु विज्ञानेऽपि शिल्पशास्त्रात्मके तेषामप्रतिहतप्रसरा धीर्नवीनतमां प्रतिभां विकासयामास।

ज्ञानं हि द्विविधम्। एकं मोक्षोपयोगि ज्ञानम्। अपरञ्च शिल्पे शास्त्रे चान्यफलिका या बुद्धिः सा विज्ञानमिति "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोरि"त्यमरकोषवाक्यात्।

तेषाञ्च मनस्विनां ज्ञाने यथा मतिर्विज्ञानेऽपि तथैव सूक्ष्मतमा बुद्धिरवलोक्यते। स्थूलादारभ्य सूक्ष्माण्यणुपरिमाणान्यपि वस्तूनि तेषां ज्ञाननेत्रगोचरीभूतान्येवाभूवन्। अमुष्मिन् प्रबन्धे तेषां विज्ञानवतां महर्षीणां शिल्पशास्त्रविषयकाणि कानिचिद् विज्ञानान्युदाहरिष्यन्ते।

स्कन्दपुराणान्तर्गतकाशीखण्डस्योत्तरार्द्धे षडशीतितमेऽध्याये विश्वकर्मेश्वरलिङ्गस्य प्रादुर्भाववर्णनावसरे हरपार्वतीकथाच्छलेनैवं वर्णितमस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निखिलकलाविद्यानिपुणस्त्वष्टुः सुतो महनीयकर्मा विश्वकर्मा पूर्वं ब्रह्मणोऽपरा तनुरासीत्। स चाल्पीयसि वयसि कृतोपनयनो गुरुकुले वसन् गुरुसेवनरतो भिक्षान्नेनोदरपूरणं कुर्वन् कालं निनाय। प्रावृट्काले समायाते तस्य गुरुस्तं प्राह। वत्स!

"कुरूटजं मदर्थं त्वं यथा प्रावृड् न बाधते।
यत् कदाचिन्न भज्येत न पुरातनतां व्रजेत्॥"

एतेन प्राचीनकाले सर्वोत्तमगृहनिर्माणरीतिरासीदिति ज्ञायते। तत्रैव-स्कन्दपुराणान्तर्गतोत्तरार्धे गुरुपत्न्या उक्तः स विश्वकर्मा—

गुरुपत्नी च तं प्राह रे त्वाष्ट्र! कुरु कञ्चुकम्।
ममाङ्गयोग्यं नो गाढं न श्लथञ्च प्रयत्नतः।
विनैव वाससा चारु बालकलञ्च सदोज्ज्वलम्॥ इति

एतेन रमणीयबालकलकञ्चुकनिर्माणरीतिरुक्ता। ततश्च गुरुपुत्रे-णोक्तम्—

गुरुपुत्रोऽपि तं प्राह ममार्थं पादुके कुरु।
यदारूढस्य मे पादौ न पङ्कं संस्पृशेत् कचित्॥
चर्मादिबन्धनिर्मुक्ते धावतो मे सुखप्रदे।
याभ्याञ्च सञ्चरे वारिस्थलभूमाविद्रुतम्॥

याभ्यां पादुकाभ्यां वारिभूमौ सजलप्रदेशे स्थलभूमौ च अविद्रुत यथेच्छं सञ्चरे सञ्चरेयम् इत्यर्थः। एतेन चर्मादिबन्धनविहीना जलस्थल-सञ्चरणक्षमा पादुका तदासीदिति ज्ञायते।

ततश्च गुरुकन्ययाऽपि स याचितः। यथा—

गुरुकन्याऽपि तं प्राह त्वाष्ट्र! मे श्रवणोचिते।
भूषणे स्वेन हस्तेन कुरु काञ्चननिर्मिते॥
कुमारीक्रीडनीयानि कौतुकानि च देहि मे।
दन्तिदन्तमयान्येव स्वहस्तरचितानि च॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहोपकरणं द्रव्यं मुषलोलूखलादिकम् ।
तथा घटय मेधाविन् ! यथा त्रुट्यति न क्वचित् ॥
अक्षालितान्यपि यथा नित्यं पीठानि सत्तम ।
उज्ज्वलानि भवन्त्येव स्थालिकाश्च तथा कुरु ॥
सूपकर्मण्यपि च मां प्रशाधि त्वष्टृनन्दन ।
यथाऽङ्गुल्यो न दह्यन्ते पाकः स्याच्च यथा सुखम् ॥
एकस्तम्भमयं गेहमेकदारुविनिर्मितम् ।
तथा कुरु वरं त्वाष्ट्र ! यत्रेच्छा तत्र धारये ॥

कुमारीक्रीडनीयानि कुमारीणां क्रीडायोग्यवस्तूनि । दन्तिदन्तमयानि हस्तिदन्तनिर्मितानि । एवं गुरुणा गुरुपत्न्या गुरुपुत्रेण गुरुकन्यया चाभिहितस्त्वष्टा विषण्णमनाः काननानि परिभ्राम्यन दुःखदुःखेन कालं निनाय । ततश्च दैवयोगेन कञ्चित् तापसमवलोक्य तस्मै निजदुःखकारणं कथयन् तस्योपायं जिज्ञासमानस्तेन तापसेन शिवोपासनार्थमादिष्टः सर्वाभीष्टप्रदातारं महेश्वरमर्चयन तस्य वरेण शिल्पविज्ञानं समग्रं विज्ञाय गुरूणामभिलाषं सम्पादयन महान्तं सन्तोषं लेभे । एवं प्राचीनकालादारभ्यास्माकं देशे रम्यं चिरस्थायि कुटीरम्, अगाढमश्लथं वासोरहितं वाल्कलं कञ्चुकम्, यथाभिलाषं सर्वत्र सञ्चरणक्षमा चर्मरहिता पादुका, हस्तिदन्तनिर्मितानि कुमारीणां क्रीडावस्तूनि, सौवर्णं कुण्डलम्, मुषलोलूखलादीनि गृहोपकरणानि, रमणीयाः स्थालिकाः, निरुपद्रवपाककर्मशिक्षा, एकदारुविनिर्मितमेकस्तम्भमयं चलं गेहमित्थं बहुविधानामेव विज्ञानानां प्रचलनं दरीदृश्यते ।

एवं महाभारतेऽनुशासनपर्वणि पञ्चनवतितमेऽध्याये चर्मपादुकायाश्छत्रस्य चोत्पत्तिविवरणं दृश्यते । एकदा कृतदारपरिग्रहो भगवान् जमदग्निस्तपनकिरणदग्धे मध्यमेऽहनि स्वकान्तया रेणुकया सार्द्धं शरैः क्रीडन् स्वनिक्षिप्तान् शरान् संग्रहीतुं तामादिदेश । रेणुका च भृशं सूर्यकिरणप्रतप्तावयवा शरानयनाक्षमा सती मुहुर्विश्राम्यन्ती पुनरपि तान् भर्तृनिक्षिप्तान् बाणानानिनाय । भगवान् भृगुश्च रेणुकाया विलम्बमसहमानस्तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणं ज्ञातुमैच्छत्। ततश्च नाथ! प्रखरतपनकिरणदह्यमानगात्रा नाहं शक्नोमि शरानानेतुम्। इत्युक्तवत्यां रेणुकायां जमदग्निराह—

अद्यैनं दीप्तकिरणं रेणुके तव दुःखदम्।
शरैर्निपातयिष्यामि सूर्यमस्त्राग्नितेजसा॥ इति

तदा जमदग्निशापभयत्रस्तो विवस्वान् ब्राह्मणरूपेण तत्रागत्य तं तुष्टाव। उपशान्तचेतसि जमदग्नौ भगवान् सविता रेणुकायास्तापोपशमनाय छत्रमुपानहञ्च ददौ। ततः प्रभृति लोकेऽस्मिन् छत्रस्योपानहश्च व्यवहारः प्रदृश्यते। यथोक्तं महाभारतेऽनुशासनपर्वणि—

महर्षे शिरसस्त्राणं छत्रं मदूरश्मिवारणम्।
प्रतिगृह्णीष्व पद्भ्याञ्च त्राणार्थं चर्मपादुके॥
अद्य प्रभृति चैवेह लोके संप्रचरिष्यति।
पुण्यकेषु च सर्वेषु परमक्षय्यमेव च॥
छत्रं हि भरतश्रेष्ठ यः प्रदद्याद् द्विजातये।
शुभ्रं शतशलाकं वै स प्रेत्य सुखमेधते॥

ततश्च रेणुका सूर्यप्रदत्तं छत्रमुपानहञ्च गृहीत्वा सूर्यकिरणेभ्य आत्मरक्षणाय मूर्ध्नि छत्रं पादयोरधस्तादुपानहौ परिदधाना जमदग्निनिक्षिप्तान् शरान् संगृहीतवती। एवं बहोः कालादारभ्यात्र भारते वर्षे प्राचीना ज्ञानविज्ञानानुशीलनरता भारतीया महर्षयो नानाविधेषु शिल्पविज्ञानेतिहासादिषु शास्त्रेषु परं पाण्डित्यं प्रदर्शयन्तः सर्वेषामुपरि वर्त्तमाना अद्यापि सर्वैरेव नमस्क्रियन्ते भक्तिनम्रशिरोभिर्वाचीनैः प्राचीनैश्च विद्वद्वरेण्यैः। एवञ्च शास्त्रे बहून्येव विद्यन्ते शिल्पसम्बन्धीनि वाक्यानि, सत्यवसरे तान्यन्यत्रोदाहरिष्यामः।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रीधर्मः

[निबन्धकः—श्रीगोपालकृष्णवेदान्ताचार्यः, एम. ए]

स्त्रियाः सृष्टिप्रकारमाह मनुर्यथा—

द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत प्रभुः ॥ इति

स प्रभुः ब्रह्मेत्यर्थः । व्यासोऽप्याह संहितायां यथा—

पाटितोऽयं द्विजाः पूर्वम् एकदेहः स्वयम्भुवा ।
पतयोऽर्द्धेन चार्द्धेन पत्न्योऽभवन्निति श्रुतिः ॥ इति ।

श्रुतिश्चात्र यथा—स वै नैव रेमे । तस्मादेकाकी न रमते, स द्वितीयमैच्छत । स हैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधाऽपातयत्, ततः पतिश्च पत्नी चाभवतामित्यादि । स इति प्रजापतिः । अनया च श्रुत्या सृष्टिं प्रति स्त्रीपुंसोभयसापेक्षत्वं विज्ञापितम् । इमामेव श्रुतिमुपजीव्याह व्यासो यथा—

यावन्न विन्दते जायां तावदर्द्धो भवेत् पुमान ।
नार्द्धं प्रजायते सर्वं प्रजायेतेत्यपि श्रुतिः ॥ इति ।

गार्हस्थ्याश्रमरक्षार्थं स्त्रिय एव प्रधानमवलम्बनं पुरुषस्येत्येतदाह स एव यथा—

गुर्व्येता भूस्त्रिवर्गस्य वोढुं नान्येन शक्यते ।
यतस्ततोऽन्वहं भूत्वा स्ववशो बिभृयाच्च ताम् ॥ इति

एताः स्त्रियः त्रिवर्गस्य धर्मार्थकाममरूपस्य गुर्वी भूः प्रधानं कारणमित्यर्थः । सर्वकर्मस्वेवास्वातन्त्र्यमाह विष्णुर्यथा—"सर्वकर्मस्वस्वतन्त्रता । बाल्ययौवन-वार्द्धकेष्वपि पितृ-भर्तृ-पुत्राधीनतेति" । मनुरप्याह—

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥ इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाऽन्यत्रापि—

बालया वा युवत्या वा वृद्धया वापि योषिता ।
न स्वातन्त्र्येण कर्तव्यं किञ्चित् कार्यं गृहेष्वपि ॥
बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।
पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ॥
पित्रा भ्रात्रा सुतैर्वापि नेच्छेद् विरहमात्मनः ।
एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ॥ इति ।

आसामस्वातन्त्र्यादेव पत्यनुष्ठितधर्माचरणसहायकत्वमन्तरेण धर्मान्तरानुष्ठाननिषेधः । तथा चाह विष्णुर्यथा—"अथ स्त्रीणां धर्माः । भर्तुः समानव्रतचारित्वम् । श्वश्रू-श्वशुर-गुरुदेवतातिथिपूजनम् ।

नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषितम् ।
पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते ॥

इति । पत्युर्महागुरुत्वादेव तच्छुश्रूषया स्त्रीणां सर्वधर्मसंप्राप्तिः । महागुरुत्वमाहास्योशना यथा—

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥ इति

पत्यावनुरक्ता तद्धर्मानुष्ठानसहायश्च तदनुष्ठितकर्मफलभाग् भवति । तथाचाह बृहस्पतिः—

आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः ।
शरीरार्द्धं स्मृता जाया पुण्यापुण्ये फले समे ॥ इति ।

पत्यनुष्ठितधर्मानुष्ठानसहायकत्वमन्तरेण धर्मान्तरानुष्ठाने स्त्रीणां नरकमाह विष्णुर्यथा—

पत्यौ जीवति या योषिदुपवासव्रतञ्चरेत् ।
आयुः सा हरते भर्तुर्नरकञ्चैव गच्छतीति ॥

अत्रिरप्याह—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवद्भर्तरि या नारी उपोष्य व्रतचारिणी ।
आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् ॥
तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत् ।
शङ्करस्यापि विष्णोर्वा प्रयाति परमं पदम् ॥ इति

व्यासोऽप्याह—

सम्यग् धर्मार्थकामेषु दम्पतिभ्यामहर्निशम् ।
एकचित्ततया भ्याव्यं समानव्रतवृत्तितः ॥
न पृथग् विद्यते स्त्रीणां त्रिवर्गविधिसाधनम् ।
रागतो ह्यतिदेशाद् वा इति शास्त्रविधिः स्मृतः ॥
पतिं विनाऽन्यत् कुरुते व्रतानि देवसेवनम् ।
न सा तत्फलमाप्नोति स्वपतिस्तु तया हतः ॥ इति ।

स्वपतिर्हत इति पतिहननजन्यदुष्कृतिभाग् भवतीत्यर्थः । मनुश्चाह

विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः ।
उपचर्यः स्त्रिया साध्व्या सततं देववत् पतिः ॥
नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषितम् ।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥

पाणिग्राहस्य साध्वीस्त्री जीवतो वा मृतस्य च ।
पतिलोकमभीपसन्ती नाचरेत् किञ्चिदप्रियमिति ।

गोभिलोऽप्याह यथा—

पतिमुल्लङ्घ्य मोहात् स्त्री कं कं न नरकं व्रजेत् ।
कृच्छ्रान्मानुषतां प्राप्य किं किं दुःखं न पश्यति ॥
पतिशुश्रूषयैव स्त्री सर्वाल्लोकान् समश्नुते ।
दिवः पुनरिहायाता सुखानामम्बुधिर्भवेत् ॥ इति ।

उत्तममध्यमाधमभेदेन स्त्रीणां त्रैविध्यमाहुः पौराणिका यथा—

उत्तमा पतिभक्ता सा पतिधर्मसमन्विता ।
प्राणान्तेऽपि न कुरुते यत् किञ्चिदयशस्करम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूजयेत् सा यथा कान्तं तथा देवद्विजातिथिम् ।
व्रतानि चोपवासांश्च कुरुते भर्तुराज्ञया ॥

मध्यमस्त्रीलक्षणं यथा—

गुरुणा रक्षिता यत्नाज्जारञ्च न भजेद् भयात् ।
सा कृत्रिमा मध्यमा च यथा किञ्चित् पतिं भजेत् ॥ इति ।

अधमाया लक्षणं यथा—

अधमा परमा दुष्टात्यन्तासद्वंशजा तथा ।
अधर्मशीला दुःशीला दुर्मुखा कलहप्रिया ॥
पतिञ्च भर्तृसयेन्नित्यं जारचिन्तापरायणा ।
दुःखं ददाति कान्ताय विषतुल्यञ्च पश्यति ॥ इति

प्रागुक्तलक्षणामुत्तमां स्त्रियमभिप्रेत्याह दक्षो यथा—

पत्नी मूलं गृहं पुंसां यदि न्छन्दानुवर्तिनी ॥
गृहाश्रमसमं नास्ति यदि भार्या वशानुगा ।
तया धर्मार्थकामानां त्रिवर्गं फलमश्नुते ॥ इति ।

छन्दानुवर्त्तिनी पत्युरभिप्रायानुवर्तिनी । त्रिवर्गमिति ज्ञानान्मुक्तिरित्यवधारणात् ज्ञानं प्रति च धारणाध्यानसमाधिरूपं यदन्तरङ्गसाधनत्रयं तत्र स्त्रीसहायकत्वमपेक्षत इत्यर्थोऽनेनाभिहितः । एतादृशस्त्रिया देवीसाम्यमाह स एव यथा—

अनुकूला न वाग्दुष्टा दक्षा साध्वी प्रियंवदा ।
आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी ॥
अनुकूला न वाग् दुष्टा दक्षा साध्वी पतिव्रता ।
एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः ॥ इति ।

वाग्दुष्टा कलहरता । आत्मगुप्ता स्वधर्मरक्षापरा । मनुरप्याह—

प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥ इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहस्थस्य जायैव स्वचरित्रेण स्वर्गसुखं नरकयन्त्रणां वोत्पादयति इत्याह दक्षो यथा—

अनुकूलकलत्रो यस्तस्य स्वर्ग इहैव हि ।
प्रतिकूलकलत्रस्य नरको नात्र संशयः ॥ इति ।

स्त्रीणामनुकूलत्वेन प्रतिकूलत्वेन चोत्तमाधमत्वं विज्ञेयम् । तस्मात् स तत्रैवाह यथा—

स्वर्गेऽपि दुर्लभं ह्येतदनुरागः परस्परम् ।
रक्त एको विरक्तोऽन्यस्तस्मात् कष्टतरं नु किम् ॥
गृहवासः सुखार्थाय पत्नी मूलं गृहे सुखम् ।
सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी ॥
दुःखा ह्यन्या सदा खिन्ना चित्तभेदः परस्परम् ।
प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः ॥

अन्या इत्यधमा । दुःखा दुःखदायिनी । अधमां स्त्रीमधिकृत्य तस्या निन्द्यत्वमाह यथा—

योषित् सर्वा जलौकेव भूषणाच्छादनाशनैः ।
संभृतापिकृता(?) नित्यं पुरुषं ह्यपकर्षति ।
जलौका रक्तमादत्ते केवलं सा तपस्विनी ।
इतरा तु धनं वित्तं मांसं वीर्यं वलं सुखम् ॥
सशङ्का बालभावे तु यौवने विमुखी भवेत् ।
भृत्यवद् मन्यते पश्चाद् वृद्धभावे स्वकं पतिम् ॥ इति ।

अपकर्षति कापथे परिचालयति पातयतीत्यर्थः । इतरेति स्त्री आदत्ते इत्यर्थः । धर्मपत्नीस्वरूपमाह स एव यथा—

धर्मपत्नी समाख्याता निर्दोषा यदि सा भवेत् ।
दोषे सति न दोषः स्यादन्या कार्या गुणान्विता ॥ इति ।

निर्दोषेति प्रतिकूलत्व-वागादुष्टत्वादिदोषरहितेत्यर्थः । अन्या कार्येत्यादि तादृशदोषदुष्टस्त्रीसत्त्वे पुनर्गुणवतीं स्त्रियमुद्वहेदन्यथा धर्महानिसम्भवः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यादित्यर्थः। तादृशविवाहद्वये न दोषो विद्यते। यादृशदोषसत्त्वे दारान्तरग्रहणविधिस्तत्स्वरूपमाह याज्ञवल्क्यो यथा—

सुरापी व्याधिता धूर्त्ता वन्ध्यार्थघ्न्यप्रियंवदा।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुद्वेषिणी तथा॥ इति

अधिवेत्तव्या सपत्नीयोजिता कार्या, स्वामी पुनर्दारान्तरं गृह्णीयादित्यर्थः। मनुरप्याह यथा—

मद्यपाऽसाधुवृत्ता च प्रतिकूला च या भवेत्।
व्याधिता वाधिवेत्तव्या हिंस्रार्थघ्नी च सर्वदा।
वन्ध्याऽष्टमेऽधिवेत्तव्या दशमे तु मृतप्रजा।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी॥ इति।

व्यासोऽप्याह संहितायां यथा—

धूर्त्ताञ्च धर्मकामघ्नीमपुत्रां दीर्घरोगिणीम्।
सुदुष्टां व्यसनासक्ताम् अहितामधिवेदयेत्॥ इति।

अधिविन्नामपि भोजनाच्छादनैः पालयेदित्याह याज्ञवल्क्यो यथा—

अधिविन्ना तु भर्त्तव्या महदेनोऽन्यथा भवेत्॥ इति

व्यासोऽप्याह यथा—

अधिविन्नास्वपि विभुः स्त्रीणान्तु समतामियात्। इति

समतामियादिति अन्याः स्त्रियो यथा पालयेत् तथाधिविन्नामपीत्यर्थः। मनुरप्याह विशेषेण यथा—

या रोगिणी स्यात् तु हिता सम्पन्ना चैव शीलतः।
साऽनुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित्॥ इति।

रोगिण्यान्तु अनुज्ञापनानवमानत्वेन वैशिष्ट्यमन्यासान्तु न तथा इति। धर्मपत्नीसत्त्वे पुनर्दारग्रहणं निन्दति दक्षो यथा—

प्रथमा धर्मपत्नी च द्वितीया रतिवर्द्धिनी।
दृष्टमेव फलं तत्र नादृष्टमुपजायते॥ इति।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সুলভে পুস্তক বিক্রয়

[মাত্র কয়েকখানা অবশিষ্ট আছে।]

সাংখ্যদর্শনের আদ্য পরীক্ষায় পাঠ্য—

১। পতঞ্জলির যোগসূত্রবৃত্তি—(মণিপ্রভা টীকা, হিন্দী ও বঙ্গভাষানুবাদ, সূত্রপাঠ ও সূত্রানুক্রমণিকাসহিত)

মূল্য—১৷৷০ স্থলে ১৵০

কাব্যের মধ্য পরীক্ষায় পাঠ্য—

২। কিরাতার্জ্জুনীয়ম্—(মূল, অন্বয়, বাচ্যান্তর, অনুক্তালঙ্কারনির্দ্দেশ, মল্লিনাথটীকা, হিন্দী ও বঙ্গভাষানুবাদ, বিস্তৃত সমালোচনা ও গ্রন্থকার-জীবনকথা সহ)

মূল্য—৩।০ স্থলে ২।৶০

পুস্তক-প্রাপ্তির ঠিকানা :—

সংস্কৃত-সাহিত্য-পরিষৎ

১৭, আর. জি. কর রোড, শ্যামবাজার, কলিকাতা।

সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকায় বিজ্ঞাপনের হার

কভার ২য় বা ৩য় পৃষ্ঠা	(সম্পূর্ণ)	মাসিক	... ...	৮৲
„	(অর্দ্ধেক)	„	... ...	৪৷৷০
„	(এক-চতুর্থাংশ)	„	... ...	২৷৷০
কভার ৪র্থ পৃষ্ঠা	(সম্পূর্ণ)	„	... ...	১০৲

একসঙ্গে তিন মাসের বা তদধিক সময়ের জন্য বিজ্ঞাপন দিলে হার কমান হইয়া থাকে।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

স্বল্পমূল্যে পুরাতন সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকা

বর্ত্তমানে বিংশ বর্ষ চলিতেছে। পূর্ব্বের কয়েক বর্ষের অল্পসংখ্যক পত্রিকা এখনও সম্পূর্ণভাবে পাওয়া যাইবে। সভ্যগণের সুবিধার জন্য নিম্নলিখিত মূল্যে পুরাতন পত্রিকাগুলি এখনও দেওয়া হইতেছে, এ বিষয়ে সভ্যগণের দৃষ্টি আকর্ষণ করা যাইতেছে। যিনি যে বৎসরের পত্রিকা ক্রয় করিতে ইচ্ছুক সেই বৎসরের পত্রিকা বর্ত্তমানে সম্পূর্ণ পাওয়া যাইবে কিনা পূর্ব্বে পত্রদ্বারা জানিয়া নিলে ভাল হইবে।—

এক বৎসরের পুরাতন পত্রিকা···		৩৲	(ডাক মাশুল ৶০)
২ বৎসরের	,, ,, (এক সঙ্গে)	৫৷৷০	(,, ৷৵০)
৩ বৎসরের	,, ,, ,,	৮৲	(,, ৷৷/০)
৪ বৎসরের	,, ,, ,,	১০৲	(,, ৸০)

তাং ২০।১।৪৫

Opinions on the Kalitantram

(Sanskrit Sahitya Parishad Series No. 2)

Amrita Bazar Patrika (31. 10. 22)—We hail the appearance of a new book-let called Kali-Tantram published by the Sanskrit Sahitya Parishat, Shyambazar, Calcutta. It is annotated and translated by Pandit Satish Chandra Siddhantabhushan. We dare say that the work will prove to be a great help to those who care to make an attempt towards the realisation of the monistic philosophy contained in the Tantras. There is no doubt that it will at least serve the public in giving some inkling about the mode of worship enjoined by the Tantras and so help them from being duped by professional impostors. We hope that the presentment of such works will throw much light into the hitherto neglected Tantra literature. The get up of the book is good. It is priced at *8 as. for members* of the Sanskrit Sahitya Parishad and *10 as.* for the public.

Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XX, No. 12] [April, 1938.

१८५९ शकीये चैत्रे २०श-वर्षस्य १२श-संख्या

संस्कृतसाहित्यपरिषत

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

विशेष-प्रबन्धः—
उपदेश-परम्परा

Main article—
Upadésa-parampará

सम्पादकः—

महामहोपाध्याय-श्रीअनन्तकृष्ण-शास्त्री

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সুলভে পুস্তক বিক্রয়

[মাত্র কয়েকখানা অবশিষ্ট আছে।]

সাংখ্যদর্শনের আদ্য পরীক্ষায় পাঠ্য—

১। পতঞ্জলির যোগসূত্রবৃত্তি—(মণিপ্রভা টীকা, হিন্দী ও বঙ্গভাষানুবাদ, সূত্রপাঠ ও সূত্রানুক্রমণিকাসহিত)

মূল্য—১৷৷০ স্থলে ১৵০

কাব্যের মধ্য পরীক্ষায় পাঠ্য—

২। কিরাতার্জ্জুনীয়ম্—(মূল, অন্বয়, বাচ্যান্তর, অনুক্তালঙ্কারনির্দ্দেশ, মল্লিনাথটীকা, হিন্দী ও বঙ্গভাষানুবাদ, বিস্তৃত সমালোচনা ও গ্রন্থকার-জীবনকথা সহ)

তাং ২২।২।৪৫

মূল্য—৩।০ স্থলে ২।৶০

পুস্তক-প্রাপ্তির ঠিকানা:—

সংস্কৃত-সাহিত্য-পরিষৎ

১৭, আর. জি. কর রোড, শ্যামবাজার, কলিকাতা।

সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকায় বিজ্ঞাপনের হার

কভার ২য় বা ৩য় পৃষ্ঠা	(সম্পূর্ণ) মাসিক	... ...	৮৲
”	(অর্দ্ধেক) ”	... ...	৪৷৷০
”	(এক-চতুর্থাংশ) ”	... ...	২৷৷০
কভার ৪র্থ পৃষ্ঠা	(সম্পূর্ণ) ”	... ...	১০৲

একসঙ্গে তিন মাসের বা তদধিক সময়ের জন্য বিজ্ঞাপন দিলে হার কমান হইয়া থাকে।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

April, 1938. | १८५९-शकीये चैत्रे २०श-वर्षस्य १२श-संख्या | Vol XX, No. 12

उपदेशपरम्परा

अम्बिकामहिमा

[स्वनामधन्य-जगद्गुरुश्रीशङ्कराचार्य-श्रीकाञ्चीकामकोटिपीठाधीशानाम्]

कीर्तयेन्नामसाहस्रं पौर्णमास्यां विशेषतः ।
पौर्णमास्यां चन्द्रबिम्बे ध्यात्वा श्रीललिताम्बिकाम् ॥

ललितासहस्रनामफलश्रुतिः ।

अद्य शुक्रवासरः, पूर्णिमा च । अस्योभयस्य संयोगोऽम्बिकाया विशेषः । एकैकमपि प्रत्येकं विशिष्टमेव । अद्य श्रीकल्पकाम्त्रामन्दिरे पूर्णपूजा । पूर्णिमेत्युक्तपूर्णतेत्यर्थः ।

सर्वेषां जनानामानन्दं ददाति पूर्णिमाचन्द्रः । शरत्कालचन्द्रोऽतीव गुणवानिति शास्त्राणि वदन्ति । इदानीं प्रचलत्यपि शरदृतुरेव । शरत्काल-चन्द्र आनन्दं ददाति । तत्रापि पूर्णचन्द्रोऽधिकमानन्दं ददाति । प्रत्यृतूपक्रमं नवरात्रं वर्तते । तदानीमम्बिकां पूजयितुमर्हामः । तादृशेषु षट्सु नवरात्रेषु वसन्त-नवरात्रं शरन्नवरात्रं च विशिष्येते । शारद-नवरात्रं नाम शरत्काले समापतत नवरात्रमेव । अस्माभिरनुष्ठीयमानं नवरात्रमेतदेव । पञ्चदशसु तिथिष्वस्याराधनमेकः संप्रदायः । ललितासहस्रनामसु—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता"

इत्युक्तमस्ति। तानि पञ्चदशदिनान्यद्य पूर्यन्ते, अत एवाद्य पूर्णपूजेति नाम समपद्यत। तदेवमद्य शारद-नवरात्रपूर्तिः शुक्रवासरः पूर्णिमा च मिलिताः समापतन्ति स्म।

चन्द्रमण्डलेऽम्बिका निवसति। ललितासहस्रनामफलश्रुतावम्बिकां चन्द्रमण्डले ध्येयां वदति। तद् मनसः शीतलतां ददाति। सूर्योदयेनास्माकं न तादृश आनन्दो भवति। चन्द्रोदयेन बालाः स्त्रियो वृद्धा इत्यादीनां सर्वेषां प्रमोदो भवति। चन्द्रिकासज्जग्धिः, सङ्गीतगोष्ठीप्रभृतीनि बहूनि सन्तोषकराणि कर्माणि तदानीं सर्वे समाचरन्ति। पूर्णचन्द्रोदयेनेतोऽप्यधिक आनन्द उदेति। प्रत्यहं पूर्णचन्द्रस्योदयेनैतावानानन्दो भवेत्। पञ्चदशदिनानि क्षयेण पञ्चदशदिनानि वृद्धया च पूर्णचन्द्रस्य दौर्लभ्यमनुभूयते। अन्धकारं सूर्यश्चन्द्रश्चोभौ निरस्यतः। सूर्य औष्ण्येन संहितोऽन्धकारं पराकरोति। प्रकाशः शैत्यं च चन्द्र एव वर्तते। तद्वदम्बिकायाः कृपा मनः शीतयित्वाऽज्ञानं पराकरोति।

चन्द्रमा मनसो जातः (पुरुषसूक्तम्)। विष्णोर्मनसि शीतले सति तत उद्भूतश्चन्द्रमा नाम। तत एव स शीतलस्सन् तमः परास्यति। अज्ञानाख्यं तमो निरस्य शान्तिं ददाति, इत्यम्बिका चन्द्रमण्डले ध्यानयोग्या वर्ण्यते। व्याघ्रासने मध्यभागे (हृदयस्थाने) आसनं बद्ध्वा जपध्यानादिकं कर्तव्यमिति वर्ण्यते। व्याघ्रः स्वाभिलषितमेकेनैवाक्रमणेन हन्तुं समर्थः, तद्वद् ध्यानं कर्तुं योग्यं व्याघ्रचर्मासनं व्यवस्थितमस्ति। तद्वत अज्ञानाख्यं तमो निरस्य शीतलतामम्बिकायाः कृपा जनयति, इति तां चन्द्रमण्डले ध्यातुमर्हामः। अद्य पूर्णिमया सह शुक्रवासरोऽपि संयुज्यते। चन्द्रस्यानन्तरमानन्दं ददानः शुक्र एव।

अम्बिका का? औवै (कविः) "मातरं पितरं च प्रथमं जानीहि दैवम्" इति वदति स्म। "मातृदेवो भव पितृदेवो भवे"ति तैत्तरीयोपनिषदपि वदति। मातरं दैवभावेन नमस्कुरु, पितरं दैवभावेन नमस्कुरु इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तयोरर्थः। अस्यैकस्य जन्मनः सिद्धां मातरं दैवभावेनाराधयितुमर्हामः। अम्बिका यस्य कस्यापि जन्मनो माता। अस्मिन् लोके चतुःपञ्चानामपत्यानामेका माता भवति। सर्वेषामपत्यानां सर्वेषु कालेषु माता ह्यम्बिका नाम। लोके सर्वत्र विद्यमानास्सर्वेऽपि सहोदरा एव। पक्षिणः, क्रिमय इत्यादयोऽप्यस्माकं सहोदरा एव। एतावतामप्येका माता भवत्यम्बिकैव। तस्या एकस्या मातुरुदरात् सर्वेऽजायन्त। 'मातरं दैवं भावय' इत्युपदेशे तथा भावयितुं प्रभूयत इति प्रतिभाति। तद् विपर्यस्य दैवस्य मातृभावेन चिन्तनमेवाम्बिकाया ध्यानम्। कृष्णमर्जुनः सखायमभावयत्, अपत्यमिति यशोदाऽभावयत्; रुक्मणी सत्यभामा च भर्तारमभावयेताम्। वयं सर्वेऽप्यपत्यानि भवामः, इति परमात्मानमम्बिकाम्, मातरमिति यावत्, भावयामश्चेत्, तथैवाविर्भूयानुग्रहीष्यति। येन केनचन रूपेण भावयामश्चेत्, तेन रूपेणाविर्भूयानुग्रहणस्वभावः परमात्मनो वर्तते। साक्षात् परमेव ब्रह्माम्बिकारूपेणावस्थाय मातेव समस्तानां प्राणिनामनुगृह्णन् वर्तते। अम्बिकामाराध्य यावन्तः कियन्तोऽपि महापुरुषा अनुग्रहं प्राप्नुवन्। महाकविः कालिदासोऽम्बिकाया दासः। अम्बिकायाः कृपया तस्य परिपूर्णा वागुदेति स्म। अम्बिकायाः कृपोदयानन्तरमेव 'श्यामला दण्डकम्' इति स्तोत्ररत्नमकवयत्। श्रीकाञ्च्यां श्रीकामाक्षीसन्निधौ मूकः कश्चनोपास्य महाकविरभवत्। अम्बिकाया उच्छिष्टे भक्षिते तदेवोच्छिष्टममृतरूपं सत् उत्तमां वाचमजनयत्। स मूककविरित्यभिधानमलभत। सोऽम्बिकामधिकृत्य पञ्चशतं श्लोकानकवयत्। शतं शतं विभक्ताः पञ्चशतकरूपास्ते वर्तन्ते। मूकपञ्चशतीति तेषां नाम। तेऽतीव रसवन्तः स्युः। विना संस्कृतभाषाविज्ञानं तेषां रसमनुभवितुं न शक्यते। संस्कृतभाषायां विज्ञातायां मूककविः, कालिदास इत्यादीनां वाङ्माधुर्यमनुभवितुं शक्यते। भगवत्पादानां वाङ्महिमानमनुभवितुमपि संस्कृतभाषाविज्ञानमपेक्ष्यते। एतेषां त्रयाणां कृते सर्वेऽपि संस्कृतभाषामध्येतुमर्हन्ति।

अम्बिका वर्तते वाक्स्वरूपा। अम्बिकायाः सर्वं शरीरमक्षराण्येव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं शरीरे सर्वत्र दुर्गन्धान्येव वस्तूनि पूर्णानि वर्तन्ते। एतेष्वाभासेष्वन्तर्ज्ञानं नामको मणिरस्ति। अम्बिकायाः शरीरं त्वकारादिक्षकारान्तान्यक्षराण्येव। तर्कशास्त्रे मुक्तावल्यां शब्दं प्रकृत्य द्वौ न्यायावुल्लिख्येते वीचीतरङ्गन्यायः, कदम्बमुकुलन्यायश्च। तौ यथा—वीचीतस्तरङ्गाणां विभागः, महतस्तरङ्गात् क्षुद्राणां क्षुद्राणां तरङ्गाणां पृथक् पृथक् गत्वाऽन्ततः क्षुद्रतरीभूय तिरोभाव इति वीचीतरङ्गन्यायः। शब्दस्योद्गम्य पृथक् पृथक्शब्दरूपेण पतनं कदम्बमुकुलन्यायो भवति। एते शब्दा एवैकपञ्चाशत् अक्षराणि। तेषां मातृकेति नाम। कंचनाकारं प्राप्तानीमान्यक्षराण्येवाम्बिकायाः शरीरम्। अक्षरमालिकां मातृकास्वरूपमिति वदन्ति। सर्ववर्णात्मिकेति कालिदासोऽवदत्। सर्वेषां वर्णानां स्वरूपेण विद्यमानेति तस्य तात्पर्यम्। वयं जपावसरेऽङ्गन्यास-करन्यासौ कुर्महे। तत्तन्मन्त्रदेवतायास्तत्तदक्षराणि तत्तदङ्गानि वर्तन्ते इति निष्कर्षः।

सर्वलोकमेकमातृरूपेणावस्थायानुगृह्णाना अम्बिकायाः परशक्तिरित्येकं नाम। अम्बिकायाः कटाक्षं यं कमप्युन्नयेत्। इदं शास्त्राणां तात्पर्यम्। तां परदेवतेति वेदो वदति। तामम्बिकां वयं प्रेम्णा निदिध्यासितुमर्हामः। अभेदेन—वयमन्ये साऽन्येति भावमन्तरेणैकभावेन ध्यातुमर्हामः।

अम्बिकायाः स्तोत्रनिबन्धकेष्वस्माकमाचार्यपादा अप्येके। त ईश्वरावताराः। इह लोके संचरन्तो मनुष्यांशमनुसृत्यैवाचरन्ति स्म। रामो महाविष्णोरवतारः। तथा स सीतां व्ययुज्यतेत्यदुःख्यत, वानराणां साहाय्यमाप। नाटके यत् नेपथ्यं गृह्णन्ति, तदनुगुणमेवाभिनेतुमर्हन्ति, नतु स्वस्वरूपं नाटकरङ्गे प्रदर्शयितुमर्हन्ति। तद्वत रामः स्वगृहीतनेपथ्यस्यानुगुणं चतुर्दश वत्सरान् अरण्यमगच्छत, सीतां वियुज्यादुःख्यत, पर्णशालायां स्वपन्नासीत, फलान्यभक्षयत, लक्ष्मणे मूर्च्छितेऽरोदीत; स धीरोदात्तवदभ्यनयत्। तद्वत् अस्माकमाचार्यपादा अपि मनुष्यावतारस्यानुगुणं चरित्वाऽनन्तरं श्रीकैलासं प्रापन्। रामे सति वयं नाजायामहीति सर्वे दुःख्येयुः। अहं तथा न जात इति संतुष्यामि। कदाचन जातश्चेदपि न ब्राह्मणो जनितु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महीमि। यदि जातः स्याम्, तर्हि रामोऽस्मान् प्राणमदिति स्यात्। ऋषीन् सर्वानपि स प्रणनाम। साऽतीव दुःसहाऽवस्था। संप्रति तस्य देवालयं निर्माय वयं तं नमस्कुर्महे। नीचजातौ भवामश्चेत्, सौकर्यं स्यात्। सर्वान् नमस्कर्तुमर्हामः। उच्चजातयश्चेत्, महती विपत्तिः। तथैवोत्तम आश्रमोऽधिकं वयः, उत्तमा गुणाश्च येषाम्, ते बहूनामनुग्रहपात्राणि न भवितुं प्रभवन्ति। आचार्यपादानां गुरवो गोविन्दभगवत्पादाः। यावत्सु कियत्स्वपि सुकृतं कृतवत्सु, अहमेक एव वा दौर्भाग्यं प्राप्तवान्। मम पादयोरिमे पतन्ति खल्वित्यदुःख्यन्निति वदन्ति।

श्रीमदाचार्यपादाः स्वगृहीतस्य नेपथ्यस्यानुगुणं कैलासं प्रापन्। गत्वा पञ्चस्फटिकलिङ्गान्यादाय प्रत्यागमन्। तेष्वेकमेव चन्द्रमौलीश्वरः। कैलास ईश्वरावसथेऽम्बिकाया मन्त्रशास्त्रमासीत्। तद्गृहीत्वा प्रत्यागच्छत्सु नन्दिकेश्वरस्तत् प्रत्यपाहरत्। तस्माद् विस्रंस्य कंचन भागमाचार्यपादाः प्रत्यानयन्। तेष्वेकचत्वारिंशत् श्लोका आसन्। अत्र प्रत्यागम्योपर्यकोनषष्टि श्लोकान् कवयित्वा तदपूरयन्। सैव सौन्दर्यलहरी। त्रिशिरःपुरे (Trichinopally) मातृभूतेश्वरालये श्रीसुकुन्तलाम्बासन्निधावेकस्यां श्लक्ष्णशिलायां प्रथमे एकचत्वारिंशत् श्लोका लिखिता वर्तन्ते, स सन्निधिश्चक्राकारः साधित इति वदन्ति। सौन्दर्यलहर्यां पाश्चात्त्या एकोनषष्टिः श्लोका आचार्यैः कृताः। शतमपि श्लोकाः कैलासाद् यद्यागताः स्युः, अस्माकं हानिरेव। तदानीमाचार्यपादानां वाङ्महिमानं वयं नानुभवितुं पारयेम। आचार्याणां कृतीरपेक्ष्य कैलासत आगता नोत्कृष्टाः प्रतिभान्ति। ते सर्वे मन्त्रा एव। पाश्चात्त्या एकोनषष्टिः श्लोका अप्यानन्ददायकानि स्तोत्राणि।

तेषु स्तोत्रेष्वेकमम्बिकायास्सन्निधौ सरस्वती वीणां वादयति स्मेत्यधिकृत्य वदति। तद्यथा—

विपञ्च्या गायन्ती विविधमपदानं पशुपते-
स्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वदीयैर्माधुर्यैरपलपिततन्त्रीकलरवां
निजां वीणां वाणी निचुलयति चेलेन निभृतम् ॥

सरस्वत्यम्बायास्सन्निधाने वीणया गायति। किमधिकृत्य गायति? अस्माकमस्मानधिकृत्य कश्चन गायति चेत्, आनन्दः स्यात्। अम्बायाः प्रियमधिकृत्य गायति। किं तत्? अम्बायास्सतीति नाम। पतिव्रतेति तदर्थः। अम्बिकेवापरा कापि पतिव्रता नास्ति। सा स्वभर्तृनिन्दनात्मिकाया वाच उदयमात्रेण स्वशरीरमपि पर्यजहात्। दाक्षायणीमधिकृत्य कथयेदं ज्ञातुं शक्यते। तादृश्याः पतिव्रतायाः पशुपतेः स्तोत्रस्य श्रवणे परमानन्दो भवति। सरस्वती तस्या हृदयं ज्ञातवती। सर्वज्ञत्वं सरस्वत्या वर्तते। साऽम्बिकायाः प्रियां पशुपतेः प्रशंसां गायति। तथा गायन्तीं श्रुत्वाऽम्बिकाऽऽनन्दति। कस्मिँश्चन सम्यगगायत्यपि श्रोतार आनन्देयुः, उपन्यस्यत्यपि तथैव कुर्युः। आनन्दन्ति चेदेव तेषामुपर्युपरि वक्तुं स्फुरेत्। तत्र का वा न्यूनता वर्तत इति विमृशन्त एव मुखं घोरं निचुलयन्तस्तिष्ठन्तीति नोचितमिदम्। औचित्यस्य विज्ञाऽम्बिका शिरः कम्पयन्ती 'साधु वर्तते' इति वक्तुं प्रारभते। प्रारभमाणायां च तस्यां तस्या वाचो माधुर्यं सरस्वत्या वीणायास्सर्वे नादा अन्तरदधुः, तन्माधुर्य एवामज्जन। सहसैव सरस्वती तां वीणां संपूर्णमावृत्याप्यदधात्। इदमेवायं श्लोको वदति। मूककवेः कृतिभ्योऽप्येकं श्लोकं वदामि

कलमञ्जुलवागनुमितपञ्जरगतशुकग्रहौत्कण्ठ्यात्।
अम्ब रदनाम्बरं ते बिम्बफलं शम्बरारिणा न्यस्तम् ॥

(आर्याशतके ९९ तमः श्लोकः)

अम्बिकाया अधरं बिम्बफलमिव वर्तते। तद् बिम्बफलं मन्मथस्तत्र न्यक्षिपत्। स कश्चन व्याधः। तस्य कंचन शुकं ग्रहीतुमिच्छा। शुकस्य बिम्बफले प्रेम। ततस्तद् न्यक्षिपत्। शुकः कुत्र वर्तते? वस्तुतः शुको नास्ति। शुकः स्यादिति प्रत्यभात्। अम्बिकाया मधुरां वाचं श्रुत्वा तस्याः कण्ठ एव पञ्जरे कश्चन शुकोऽवस्थाय व्याहरतीति विज्ञाय तेन तं ग्रहीतुमभ्यलषत्। एवमभिलाषेण न्यस्तं बिम्बफलमिव वर्ततेऽम्बिकाया अधरमित्यस्य श्लोकस्य तात्पर्यम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौभ्रात्रम्

सांप्रतं हि सहोदरभावः सर्वैरपि कांक्ष्यते, विशिष्य च सुधारकैर्भारतीयैः। अयं च वर्णाश्रमादिविभागे सति नात्मानं लभते, अतस्तेन निमित्तेन जातिभेदास्तन्निबन्धना अवस्थाभेदा धर्मभेदाश्च दूरीकरणीया इति बहवो मन्यन्ते। वयं तु मन्यामहे—सौभ्रात्रमेव वरणीयम्, न केवलं सहोदरभावः। वालि-सुग्रीवयोः सहोदरभावः किं नासीत! रावणविभीषणयोः सहोदरभावः किं नासीत? सत्यपि सहोदरभावे वालिवधोपायो रावणवधोपायश्च सुग्रीवेण विभीषणेनैव च खलु प्रादर्शि? दौरात्म्यं वानुवर्तताम्, माहात्म्यं वा, सहोदरयोर्द्वयोर्भावैक्यं तु नितरामेव वाञ्छनीयम्। अत एव तदा तदा मतभेदमाविस्कुर्वन् लक्ष्मणोऽपि श्रीरामचन्द्रेण न तथा बह्वमन्यत, यथा भरतः। वयं तु मन्यामहे—कैकेयी-कौसल्ययोः, श्रीसीता-लक्ष्मणयोः, वालि-सुग्रीवयोः, रावण-विभीषणयोश्च दौर्भ्रात्रं क्षणमप्यनुवर्तमानं यदि न वर्णनास्पदं स्यात, तर्हि रामायणकथैव नैवात्मानं लभेत।

श्रीरामायणकथायाः प्रधानाङ्गानि हि कौसल्यादिष्वसूयया कैकेयी-वरप्रार्थना, मारीचेन दूरतो नीते श्रीरामचन्द्रे लक्ष्मणेति रामस्येव ध्वनिश्रवणानन्तरं बहुधा प्रबोध्यमानाया अपि सीतादेव्या लक्ष्मणस्य सोदरकल्पस्योपरि विपरीतभावः; येन सीतापहरणादीनि बहूनि मुख्यान्यङ्गान्यवसरन्तिस्म, वालि-सुग्रीवयोः परस्परवैमत्यं प्रत्यहमायोधन-संकल्पः, वालिवधार्थं सुग्रीवस्य रंध्रान्वेषणम्; येन सुग्रीवसख्य-वालिवध-हनूमदादिकर्तृकसीतान्वेषणादीनि बहून्यङ्गान्यवकाशन्ते स्म, रावणस्य विभीषणे शत्रुभावश्च, येन गदापाणेर्विभीषणस्य रामचन्द्रशरणागत्यादीनि रावणवधपर्यन्तान्याविरभवन्निति, सर्वविदितमिदम्।

न केवलं दौर्भ्रात्रमेव रामायणकथाया मुख्यं मूलम्, किन्तु सौभ्रात्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मपीत्यपि दुरपन्हवमिदं तत्त्वम्। वसिष्ठ-विश्वामित्रयोर्हि स्वभाववैरिणो-रपि—श्रीरामचन्द्रस्य विश्वामित्रेण साकं ताडकादिवधार्थं विशिष्टं सौभ्रात्रमेवासीत्, यदेव गृहीत्वा—

"अहं वेद्मि महात्मानं रामं सत्यपराक्रमम्।
वसिष्ठोऽपि महातेजा ये चान्ये तपसि स्थिताः।"

इति विश्वामित्रोऽपि वसिष्ठमेव पुरस्करोति, वसिष्ठोऽपि विश्वामित्र-मतमेवात्रानुवर्तते, येनोनषोडशवर्षोऽपि रामचन्द्रो लक्ष्मणेन साकं प्रेषितो विश्वामित्रेण साकं दशरथचक्रवर्तिना। अत्र च कारणम्—सुबाहु-मारीचयोः सौभ्रात्रमेव।

सीताविवाहावसरे—उर्मिलादीनामपि लक्ष्मणादिभिः साकं विवाह-व्यवस्थायामपि मुख्यं निदानम्—जनकस्य तत्सहोदरविषये सौभ्रात्रम्, राम-लक्ष्मण-भरत-शत्रुघ्नानां च सौभ्रात्रमेव चेति सर्वविदितमिदम्।

वनवासार्थं श्रीरामचन्द्रस्यैव वरदानेन नियन्त्रणायामपि लक्ष्मणोऽपि यत् तमनुगच्छति स्म, तत्रापि कारणं सौभ्रात्रमेव।

दशरथमरणानन्तरं मातुलगृहात् प्रत्यागतेन भरतेन कैकेय्येव सर्वस्या अपि विपत्तेः कारणमिति विज्ञाय मातुरपि कैकेय्याः सहस्रशो धिक्करणं यत् कृतम्, यच्च कौसल्यादीनां संतोषणं कृतम्, यच्च पुनरपि राज्यमिदं सर्वं श्रीरामचन्द्रस्यैव सविधे समर्षणीयमिति विश्वासेन जटाजूटादिधारणेन श्रीरामचन्द्रस्य दण्डकारण्यगतस्यैवोपसर्पणं सर्वैरपि स्वपरिवारैः, प्रजाभिः सेनाभिश्च कृतम्, तत्रापि कारणं भरतस्य शत्रुघ्नस्य च श्रीरामलक्ष्मणयो-र्विषये सौभ्रात्रमेव।

जनस्थाने श्रीरामलक्ष्मणाभ्यां विरूपीकृतायाः शूर्पणखाया वैरूप्य-मसहमानैः खरदूषणत्रिशिरोभिः श्रीरामचन्द्रेण साकमायोधनेन स्वप्राण-परित्यागेऽपि यः सन्नाहः कृतः, तत्रापि तेषां वाङ्मनसागोचरं सौभ्रात्रमेव।

खरदूषणादिवधानन्तरं सीतापहरणेनात्मानं स्ववंशं सर्वं चापसादयितुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वं राक्षसकुलं नाशयितुं च शिवभक्तेषु प्रधानतमोऽपि तपस्विप्रवरोऽपि स्वाधीनब्रह्मादिदेवगणोऽपि रावणः सीताहरणादौ महापापेऽपि कर्मणि यत् प्रवर्तते स्म, तत्रापि कारणं शूर्पणखा-रावणयोः परस्परं सौभ्रात्रमेव।

परिव्राजकवेषधारणेन सीतामुपसर्प्य ततो हठात् स्वयं रावणेनापहियमाणायाः सीताया रक्षणार्थं रावणेन साकं चिरमायोधनेन प्राणत्यागायापि सन्नद्धोऽभूत् यद् जटायुर्नाम पक्षी, तत्रापि निदानम्—दशरथ-जटायोः सौभ्रात्रमेव।

श्रीरामचन्द्रस्य चतुर्दशवत्सरवनवासनियमसमाप्त्यनन्तरं पञ्चदशवत्सरारम्भदिने श्रीरामचन्द्रसाक्षात्काराभावेऽग्निसात्करिष्यते स्वीयं शरीरमिति स्वप्रतिज्ञानुसारेणाग्निप्रवेशार्थं भरतेन सर्वविधा व्यवस्था यदक्रियत, यच्च त्वरितेन श्रीरामचन्द्रेण तस्मिन्नेव समये नन्दिग्रामं प्रति समायातम्, तत्रोभयत्र निदानं तयोः सौभ्रात्रमेव।

तदेवं सहोदरभावे समानेऽपि स्वधर्मानुरागनिबन्धन एव स सौभ्रात्रनामा, अन्यथा दौर्भ्रात्रनामेति तत्तत्कथासन्दर्भसमालोचनेन स्पष्टं प्रतिभाति। कैकेयी, श्रीसीतादेवी, वाली, रावणश्च कौसल्यायां लक्ष्मणे सुग्रीवे-विभीषणे च तेषां सर्वेषां धर्मपारवश्येऽपि सत्यन्यथा व्यवहरन्ति स्मेति सर्वविदितमिदम्। अधर्मेण व्यवहारफलं तु सर्वैरेवैतैरत्यन्तमापत्तिप्राप्त्या विपरीतमेव संवृत्तम्। तथा च—सहोदरभावो यदि सर्वेषामधुनातनैः काम्यते, तर्हि तत्तद्धर्माक्रमणं विना स आकांक्ष्यमाण एव गुणाय स्यात्, अन्यथा तु दोषायैव।

इदमत्र भारतीयानां हिन्दुपदवाच्यानामसूयास्पदमेव—यत् माहम्मदादयो यां कामपि समुन्नतिं राजनीतिक्षेत्रे स्वेषां सौभ्रात्रसंरक्षणेन प्राप्तुमभिलषन्ति, तां स्वधर्माविरोधनीमेव समुन्नतिपदवाच्यामपि मन्यन्ते, अन्यथा त्वधोगतिमेव स्वयं प्राप्ताम्। तेषां हि सर्वेषां सौभ्रात्रमन्यादृशं स्वीयं धर्मतत्त्वमपरिवर्तनीयमवलंब्यैव प्रत्यहमभिवर्धते। हिन्दवस्तु स्वधर्मं परिवर्तनीयमनेकरूपं यथेच्छाचाररूपं वा मन्वानास्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केचन राजानीतिक्षेत्रे कथंचन प्राप्तोन्नतयः हिन्दुधर्माणामाक्रमणमेव स्वायत्तराजनीतिक्षेत्रस्यापि कृत्यमिति मन्यन्ते, इत्यहो दौर्भाग्यं भारतीयानां हिन्दुपदवाच्यानाम्। वयं तु प्रतीमः—अनेन हि प्रयतनेन सौभ्रात्रं नाम किञ्चित् कथंचन कुत्रापि विद्यमानमेव केवलं विघटयितुमेव शक्यते, न संघटयितुं द्रढयितुं वा।

भारतवर्षं हि चिरं यद् ग्रामपञ्चायतनादिना शास्यमानमासीत् सौभ्रात्रमनुसृत्य, तदपि धर्मपरतन्त्रतामेव केवलमात्मनः परमं धनं मत्वैव। अहिंसावादेन राज्यसंचालनं राजनीतिक्षेत्रे व्यवहरणं च येषां परमं लक्ष्यम्, ते हि भारतीयानां स्वधर्मेषु आक्रमणेनातिलक्ष्या एव भवन्ति। कायेन वाचा मनसा चाहिंसैव हि—अहिंसा नाम। सांप्रतं तु—कायेनैवाहिंसावादं राजनीतिक्षेत्रे नेतारः परिपालयन्ति—यतः स्वयमन्यैस्ताडिता अपि सहन्त एव केवलम्, न प्रतिताडयन्तीति, अत्र किमशक्तिः कारणम्, उत स्वनीतिपरिपालनैकदृष्टिर्वेति तु विचारणीयमेवैतत्, वाचा मनसा च तु न लेशतोऽप्यहिंसावादमवलम्बन्ते। बहु परानधिकृत्य विपरीतं वदन्ति, बहु मनसा च चिन्तयन्ति। सनातनधर्मावलम्बिनस्तु—केनापि निमित्तेन— न मनसा वाचापि च विपरीतं स्वशत्रूणां विषयेऽपि व्यवहरन्ति। कायेन हिंसा तु न मुख्या हिंसा, मनसा वाचा च हिंसैव तु मुख्या हिंसा। अभिचारो हि नाम तत्र तत्र शास्त्रेषु विधीयमानो मनसा वाचा च हिंसैव, न तु कायेन हिंसा। सनातनधर्मावलम्बिनस्तु यदि मनसा वाचा च हिंसार्थं सन्नद्धा भविष्यन्ति, तर्हि स्वयमितरानपेक्षं कारागृहेष्ववस्थायापि तदीयनियमानामप्यनुल्लङ्घनेनाभिचारादि समाचरितुं शक्नुयुरेव। अभिचारोऽपि नाम महापापमिति खलु सनातनधर्मिणां सिद्धान्तः। सोऽपि नाम धर्मरक्षणार्थं कैश्चन महत्यां विपदि समाचर्यमाणोऽन्ततो गत्वात्मरक्षणपर्यवसायी न पापलेशायापि स्यात्। सांप्रतं तु राजकीया नियमाः स्वधर्मसंरक्षणेऽपि कारागृहवासादिकं प्रापयन्ति, इति विशेषतश्चिन्ताक्रान्ता एव वयम्—किं किं केन केन कदा कदा कथं कथं करिष्यते ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येन सोदरभावोऽपि तृणाय मन्येत। धर्माविरोधिन एव सहोदराः सहोदरा नाम, अन्ये तु महोदरा एव सन्त आत्मन एव विपत्तये स्वयमेव निदानं भविष्यन्ति। कैकेयी-वालि-शूर्पणखा-खरदूषणत्रिशिरोविराधमारीच-रावण-कुम्भकर्णादयो धर्मविरोधेन यथेच्छपरस्व-परस्त्री-परपुरुषाद्याक्रमणेन पराक्रमिणोऽपि कां वा दशां प्राप्नुवन् स्वकर्मभिरेवेति सर्व एव विजानन्तु। स्वीयं हि कर्म यथेच्छं शास्त्रमप्यविगणय्य क्रियमाणं भगवानपि तत्परतन्त्रत्वान सृष्टिस्थितिसंहारनिग्रहानुग्रहादिषु नान्यथयितुमर्हति। प्रधानः शिवभक्तोऽपि रावणः, कथमन्यथा श्रीरामचन्द्रेण नामशेषं प्राप्यत। अतः सादरमिदं सूच्यते—यत् सहोदरभावोऽपि धर्माविरोधी समवलम्ब्यताम्, न तु तद्विरोधी, यः खलु महोदरतामेव प्रणयेत्, न तु सौभ्रात्रम्, तदेव नाम सौभ्रात्रम्—यत धर्माविरोधी सहोदरभाव इति।

कालिदास-वेदान्तदेशिकयोः सन्देशकाव्यविरचने तारतम्यम्

[निबन्धकः—मद्रपुरीविश्वविद्यालये विमर्शनविभागे छात्रस्थानमधिरूढः टि. के. रामचन्द्रशर्मा]

इह खल्विदानीमुपलभ्यमानेषु विविधेषु[1] सन्देशकाव्येषु कविसार्वभौम-कालिदासविरचितं मेघसन्देशाख्यं काव्यरत्नमेव प्राथमिकं प्रशस्यतमं चेति विदितचरमनुमतं च सर्वेषां विमर्शकानां सहृदयानामपि। तत्र प्राचीनेषु रामायणादिमहाकाव्येषु भारतादीतिहासेषु चेतिवृत्तांशप्राधान्येन हनूमत्प्रेषण-

1 विविधानां सन्देशकाव्यानां नामानि, तत्प्रतिपादिता विषयाश्च चिन्ताहरण-चक्रवर्तिना, ई. पि. राधाकृष्णेन चान्यत्र प्रकाशितानीति नात्र प्रतन्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णदौत्यगमनादिकथाभागेषु विद्यमानेष्वपि एकरसोन्मुखतया सन्देश-प्राधान्येन पृथक्काव्यं कालिदासेनैव प्रथमं विरचितम्। ततश्च बहुभिरसंख्यानि सन्देशकाव्यानि विरचितानि। एषु बहुष्वपि विरहावस्थापन्नो नायकस्तादृशी नायिका वा सन्देशकर्ता, सन्देशप्रापणोपयुक्तपटुकरणादिरहितश्चेतनोऽचेतनो वा सन्देशहारकः, (अत्र च संभाव्यमानस्यानौचित्यस्य क्वचित्परिहारः) विप्रलम्भशृङ्गारस्य, मतविषये भक्तिरसस्य वा प्राधान्यम्, द्विधा विभक्ते काव्ये पूर्वस्मिन् भागे मार्गवर्णनमुत्तरस्मिन् सन्देश-विषय-नायिका-नायकस्थानप्रवृत्त्यादिवर्णनम्, सन्देष्टव्यवस्तुकथनं चेत्येवं बहुधा समानच्छायत्वं परिदृश्यते। विरलतया पुनर्मनोदूत-शीलदूतादीनि शान्तादिरसान्तरप्रधानानि सन्देशकाव्यानि कैश्चिद्विरचितानि। क्वचिदुद्धवदूत-विप्रदूतादौ सन्देशहारकत्वेन तत्करणपटुरेव नियोजितः। अथापि बाहुल्येन तावत्सन्देशकाव्यविरचने कवयः कालिदासमनुकुर्वन्तीत्यविप्रतिपन्नम्।

तत्र मेघसन्देशे कविसार्वभौमः "शृङ्गार एव मधुरः परः प्रह्लादनो रसः" इत्युक्तप्रकारेण सर्वजनीनत्वादत्यन्तसुन्दरो यः परस्परप्रार्थनात्मरतिस्थायिभावः शृङ्गारः, तत्राप्युभयप्रार्थनात्मकाशाबन्धस्य परा काष्ठा यत्र विप्रलम्भे, तादृशरससार्वभौमविप्रलम्भशृङ्गारानुगुणोत्तमप्रकृतिकविरहिनायकचित्तवृत्तिवर्णनेन, तदुचितगुणालङ्कारादियोजनेन, देशकालप्रवृत्त्यादीनां यथोचितं वर्णनेन च सहृदयान् श्रवणसमकाल एव तन्मयीभवनमहिम्ना विगलितवेद्यान्तरान् रसामृतसागरे निमज्जयति। कालिदासमनुकुर्वतामन्येषां नैतादृशी सन्देशकाव्यरचनाचातुरी परिदृश्यते। तत्र सर्वाकारमपि मेघसन्देशमनुकुर्वाणं मेघसन्देशादन्यूनप्राशस्त्येन अथवाऽधिकप्रशस्तत्वेन कैश्चित्परिगण्यमानं *वेदान्तदेशिकविरचितं हंससन्देशमवलम्ब्य कालिदास-देशिकयोः सन्देशकाव्यविरचने तरतमभावो विचार्यते।

---

* वेङ्कटेशवेदान्तदेशिक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामायणान्तर्गतं सीतां प्रति हनूमत्सन्देशरूपं कथावस्तु मनसि निधाय[1] मेघसन्देशं विरचयन्नपि कालिदासो बुद्धिपूर्वकमेवाचेतनं सन्देशार्थप्रापणपटुकरणरहितं मेघं सन्देशवहनकृत्ये नियोजयति। अत्र सम्भाव्यमानमनौचित्यमप्युत्थाप्य परिहरति—

"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥" इति॥

अत्रेदमाकूतम्। कान्तायाः सविधे ये उद्यानलताकुसुममन्दमारुतहंसभ्रमरनीलकण्ठकोकिलकूजितमेघचन्द्रोदयादयो ललितसुभगाः पदार्थाः कामिनामत्यन्तमादरणीया भवन्ति सुखप्रदाश्च, त एव विरहे दृश्यमानाः श्रूयमाणाः स्मर्यमाणा वा उद्दीपकत्वात्कान्तास्मरणकारिणः, अत एव नितान्तं चित्तविक्षेपका भवन्ति। एभिर्विशेषतो विक्षिप्तचित्ताश्च कामिनश्चेतनाचेतनादिविवेचनासमर्था यथाकथञ्चिन्मनः समाधातुम् अचेतनानपि संबोध्यातिदुःसहं स्ववृत्तान्तं ख्यापयन्तः प्रलपन्ति, परितो भ्रमन्ति, कदाचित्सन्दिशन्त्यपीति सकलकविसहृदयलोकप्रसिद्धमेतत्। अतो लोकस्वभावानुरोधेनैव मेघः सन्देशवहनकृत्ये नियोजित इति। अपि च "मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।" इत्यनेन महाकविः महतश्चित्तविक्षेपस्य संभाव्यताम्, अत एवाचेतनस्य सन्देशवहनकृत्ये नियोगौचित्यं च स्फुटं प्रकाशयति[2]।

---

1 "जनकतनयास्नानपुण्योदकेषु", "रामगिर्याश्रमेषु", "रघुपतिपदैरङ्कितं", "इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा", इत्यादिभिर्वाक्यैरयमर्थः प्रकाश्यते। तथा चाह मल्लिनाथः—"सीतां प्रति रामस्य हनूमत्सन्देशं मनसि निधाय मेघसन्देशं कविः कृतवानित्याहुः" इति।

2 इदमन्यदचेतनस्यैवंविधे कृत्ये नियोगस्योचितं निदानमुत्पश्यामो यदेवंविधायामवस्थायां विशेषतः स्मृतिपथमारूढानां निगूढत्वादन्यमनुष्येषु प्रकटयितु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रेदमवधेयम्। मेघचन्द्रादिदर्शनसमुद्दीपितविरहवेदनानां यथाकथञ्चित्कान्ताप्रतिसमागममभिलषतां परस्परवृत्तान्तपरिज्ञानमपि महद्भागधेयमभिमन्यमानानां कामिनां प्राधान्येन त्रिविधा प्रवृत्तिरवस्थाभेदाद्विभिन्ना कविसहृदयलोकेषु दरीदृश्यते।

तत्र केचिदतिविक्षिप्तचित्ता अपि बहु विलप्यान्ते धीरत्वादात्मानं समाश्वास्य यदि तदानीं निपुणं विश्वस्तं च दूतं लभेरन् तदा तन्मुखेन स्ववृत्तं जायायै सन्दिश्य तस्या अपि तद्द्वारा प्रतिसन्देशमभिकाङ्क्षन्ति। तद्वार्तापरिज्ञाने पुनः सोत्साहं तदधिगमाय प्रयतन्ते च।

अपरे तु विविधैः प्रलापवचनैरसमाश्वस्तचित्ता उत्सुकिन आपद्भीरवः अतिमृदुललितायाः कान्तायाः पूर्वमननुभूतातिदुःसहविरहवेदनावशाद्विपत्तिमपि शङ्कमानाः, समर्थदूतलाभमेव न प्रतीक्षन्ते; अपि तु पुरोदृष्टे कान्तास्मरणकारिणि कस्मिंश्चिदचेतने चेतने वा स्वोद्दिष्टकार्यनिर्वहणोपयुक्तान्सर्वानपि धर्मानारोप्य यथावच्छ्रावयन्ति तं स्वहृद्गतं सर्वमपि सन्देशजातम्। एवमारोपितसुहृदि संविभक्तनिजदुःखाश्च कथञ्चित्समाश्वसन्ति "स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति" इति न्यायेन। न पुनरेते कदाचिदपि तस्मात्प्रतिवचनं स्वकार्यसंपादनं वा प्रतीक्षन्ते। स्ववाक्यश्रवण-धारणादिसम्भाव्यत्वप्रदर्शनेन स्वसम्भाषणौचित्यप्रदर्शनमेवात्र विविधधर्मसमारोपस्य प्रयोजनम्, न पुनस्तत्कार्यस्य यथार्थतो निर्वहणसामर्थ्यम् असम्भवात्। असम्भवत्खलु वस्तु वर्ण्यमानं सम्भावनाबुद्धिविरहादनौचित्यमावहन्न सहृदयमनसि प्रतिफलितुमीष्टे येन तन्मयीभावः स्यात्।

एके पुनः कामातिरेकान्नितान्तं विमूढचित्ता मुक्तकण्ठं प्रलपन्तो गुहादिगतं प्रतिध्वनिमपि प्रतिवचनमिति, वातान्दोलितलताकम्पं प्रकृतानुगुण्येनाङ्गीकारानङ्गीकारान्यतरसूचकशिरःकम्प इत्येवमादि विभावयन्तो भ्रान्ता इव विविधं चेष्टमानाः, क्वचिदप्यनवस्थिताः पर्यन्ते यादृच्छिकलब्ध-

---

मनुचितानाम् असहनतया हृदयं भित्वा वाग्रूपेण बहिर्निष्क्रम्यमाणानां विविधानामर्थानां विसम्भेण कथनसौकर्यमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समागमा विरमन्ति। अथैवमन्यास्वपि विरहिप्रवृत्तिषु विद्यमानासु अवस्थाभेदप्रयुक्तप्रवृत्तित्रयकथनमत्र प्राधान्यात्समूहत्रयावलम्बनेन। आसु प्रथमावस्था रामायणे वाल्मीकिमहर्षिणा, द्वितीया मेघसन्देशे, तृतीया विक्रमोर्वशीये च कालिदासेन सप्रपञ्चमौचित्यानुरोधेन वर्णिता दृश्यन्ते।

अत्र मेघसन्देशे मेघं चेतनीकृत्य, विशेषतः कान्ताजीवितधारणार्थं[1] प्रेष्यमाणस्यावश्यं भाविनो धर्मविशेषांस्तस्मिन्नारोप्य समीक्ष्य विनिवेशितैः पदपदार्थतद्धर्मैः, तथा निखिलसन्देशवाक्यश्रावणानन्तरं प्रतिसन्देशस्य,[2] प्रतिवचनस्य, मेघस्य यक्षकन्यासविधगमनस्य वा असम्भवतोऽवर्णनेन[3] च परामौचितीं निर्वहन् महाकविः सर्वानपि सन्देशप्रबन्धप्रणेतॄनतिशेत इति नो न विदितं सन्देशप्रबन्धपरिशीलिनाम्। सर्वसाधारण्येन सुलभावबोधाय कांश्चिदर्थान् कालिदासस्यौचित्यैकपरायणत्वसाक्षिभूतानत्रोदाहरिष्यामि।

जीवनस्य धारक एव दयिताजीवितधारणार्थं प्रेषणीयः, तस्यैव तत्करणसमर्थत्वादित्याशयेनाह महाकविः—"दयिताजीवितालम्बनार्थी जीमूतेन" इति। अत्र जीमूतपदप्रयोगेण योऽर्थविशेषो लभ्यते न स वारिवाहादिपर्यायान्तरप्रयोगेणेति पश्यत कविसार्वभौमस्य समीक्ष्य पदानां विनिवेशे जागरूकत्वम्। एवमर्थानुरोधात्प्रयुक्तोऽयं जीमूतशब्दः शब्दचित्रमनुप्रासमपि पुष्णातीति नितरामुत्कर्षः।

---

1 "दयिताजीवितालम्बनार्थी" इत्यनेनायमर्थः प्रकाशितः।

2 रामशास्त्रिविरचिते मेघप्रतिसन्देशाख्ये काव्ये बहुप्रकारेणातिरमणीयेऽप्यस्मिन्विषये किञ्चिदनौचित्यमापतितम्। अत्र हि मेघः सर्वमपि यत्तोपदिष्टं तद्दयितां बोधितवानिति वर्णितमसम्भावनाबुद्ध्युपहर्तृ न सहृदयहृदयकमलं विकासयति। नैषधीयचरिते हंसप्रतिसन्देशस्तु प्रख्यातत्वादितिवृत्तस्य नासम्भावनाबुद्धिमुपजनयति। एतच्च विवृतमस्माभिर्नाट्यशास्त्रसमीक्षायाम्। पृ. ६५।

3 केचित्प्रतिसन्देशसूचकत्वेन कुत्रचिदुपलभ्यमानाः श्लोकाः प्रक्षिप्ता इत्येव सर्वैरङ्गीक्रियते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ पूर्वमपरिचितस्य दूतकर्मणि नियोगोऽसम्भवत्कल्पः, सम्भवन्नपि वा अनौचित्यमावहेत्, सोऽपि तत्प्रार्थनां कदाचिन्नाङ्गीकुर्यादित्येवंविधामाशङ्कां परिहर्तुमाह—"सन्तप्तानां त्वमसि शरणं तत्पयोद" इति। सोऽयमसावमुत्रदेशीय इत्येवमादिप्रविभागं विनैव सन्तप्तसामान्यस्य पयोदानेन शरणभूतत्वात्सुगृहीतनामधेयो भवान् यतस्ततो ममापि सन्तप्तस्य त्वमेव शरणमिति भावः। अत्र सन्तप्त-पयोद-शरणादिपदप्रयोगौचित्यं सहृदया एव विदांकुर्वन्तु।

अथास्ति मयि तव भर्तुः सन्देशपरा सरस्वतीति बोध्यमानं मेघं कदाचिदसम्भावनाबुद्धिवशाद् यक्षकन्या न विश्वस्यादपीति परिशङ्कमान इव यक्षः प्रथमवक्तव्यं वाक्यम् असम्भावनाबुद्धिदूरीकरणयोग्यं मेघायोपदिशति—"भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहम्" इति। अत्राम्बुवाहशब्देनेदं प्रकाशितं यत्प्रकृत्यैव वोढा खल्वहं सन्तापशान्तिकरस्य पदार्थस्य, तन्न भवत्या मयि सन्देहः कार्य इति। किञ्चात्रैवाविधवे इति सम्बोधनम्, "अन्तः सारं घन तुलयितुं नानिलः शक्ष्यति त्वाम्" इत्यत्र घनशब्दप्रयोगः, "वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः" इत्यत्र धीर इति विशेषणम्, "एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथाः" इत्यत्र साधो इति सम्बोधनं च तत्तत्सन्दर्भानुगुणं परिवृत्यसहिष्णु कस्य वा सचेतसो हृदयकमलं न विकासयेत।

---

१ इदमत्रावधेयम्। कामातिरेकान्नितान्तं विक्षिप्तचित्ता अपि विरहिणो यं कञ्चिदचेतनं तत्त्वेन पश्यन्तो न सन्देशप्रापणकृत्ये नियोजयन्ति, किन्तु खेदिष्टकार्यनिर्वहणोचितचेतनधर्मारोपात्तादृशचेतनबुद्ध्यैव। "कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" इति त्वारोपितोचितचेतनधर्मस्यैव दूतकर्मणि नियोगे औचित्यं दर्शयति, न पुनरनारोपितचेतनधर्मस्यापि। अतश्चैतादृशेषु प्रबन्धेषु यथासन्दर्भं सन्देशवहनोपयुक्तधर्माणां तद्रहितेष्वध्यारोपणे कविना अवधानवता भाव्यम्। समारोपितेषु चैतेषु धर्मेषु यद्यत्पटुकरणादियुक्तचेतनपुरुषादिप्रेषणे उचितमनुचितं वा भवति तत्सर्वमत्रापि समानम्—इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ कामित्वात्सन्देशप्रेषकस्य तच्चित्तवृत्त्यनुरोधेन मेघगिरिनद्यादिषु तत्र तत्रोचितचेतनधर्माध्यारोपपूर्वकं विविधान्कामिव्यापारान्वर्णयन्महाकविः "भावानचेतनानपि चेतनवच्चेतनानचेतनवत् व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया" इत्ययं न्यायो न खल्वेकत्र चेतनत्वकथनमात्रेण तद्धर्मारोपेण वा सम्पादितो भवति, किन्तु यथासन्दर्भं तत्र तत्र तन्निर्वाहे सत्येवेति बोधयति। अपि च सन्देशप्रापकस्य विशेषतो दयितां प्रति, ये ये धर्मा गुणाश्चावश्यं भाविनः तेषां सम्पादने कविसार्वभौमस्यान्यादृशं जागरूकत्वं मेघसन्देशे परिदृश्यते। तथा हि—

(क्रमशः)

श्रीरामायणतत्त्वम्

[निबन्धकः—श्रीसोमसुन्दरशर्मा]

श्रीमद्रामायण-भारत-भागवत-पाद्म-कौर्म-विष्णुपुराणागस्त्यसंहितादि-निखिलास्मदीयविशिष्टसद्ग्रन्थेषु श्रीरामपरब्रह्ममूर्तेः हरिहरब्रह्मता च मूर्तित्रयातीतपरवस्तुस्वरूपता च प्रतिपादिता। तत्सर्वमपि विषयजातं सम्यक् संशोध्य निखिलश्रीरामभक्तानामत्यन्तोल्लासोत्पादनाय विषयविवेचन-पुरस्सरतया प्रमाणवचनान्यत्र प्रकाश्यन्ते। श्रीराममूर्तेर्विष्णुस्वरूपता-प्रतिपादकप्रमाणवचनानि श्रीमद्रामायणे बालकाण्डे—

"त्वां नियोक्ष्यामहे विष्णो लोकानां हितकाम्यया
राज्ञो दशरथस्य त्वमयोध्याधिपतेः प्रभो।
धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः।
तस्य भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च।
विष्णो पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधम्।" इति॥

त्वामिति अस्मद्दुःखहरणस्य त्वदेकसाध्यत्वादवतर्तुं नियोक्ष्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महे, तदेवाह—त्वामिति। तस्य सर्वातिशायित्वं दर्शयति—अयोध्याधिपतेरिति। धर्मज्ञस्येत्यादि राजविशेषणानि। ह्रीश्रीत्यादि राजपत्नीविशेषणानि अवतारयोग्यताध्वननाय। आत्मानं सोपकरणमात्मानम्।

"अन्येद्युः पाञ्चजन्यात्मा कैकेय्यां भरतोऽभवत्।
तदन्येद्युः सुमित्रायां मनन्नात्मा च लक्ष्मणः।
सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत्प्रिये।"

इति पाद्मोक्तेः। अत्र आत्मानमित्युक्त्या शङ्खचक्रानन्तात्मनामपि भगवद्रूपता सूचिता, 'हुङ्कारेण भवानिवे'ति वचनात्। पाञ्चजन्यः शब्दमात्रेण सकलभुवनक्षोभकत्वाद् विष्णुतुल्य एवेति बोध्यम्। चतुर्विधमिति चातुर्विध्यविधानं रावणेन्द्रजिल्लवणगन्धर्ववधादीनां प्रत्येकं देवकार्याणां सद्भावात्। अयोध्याकाण्डे—

"स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः।
अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः।

युद्धकाण्डे—

"सीता लक्ष्मीर्भवान्विष्णुर्देवः कृष्णः प्रजापतिः।
वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम्।

उत्तरकाण्डे—

पितामहवचः श्रुत्वा विनिश्चित्य मुहुर्मुहुः।
विवेश वैष्णवं तेजस्सशरीरः सहानुजः॥

पद्मपुराणे देवान् प्रति विष्णुवचनम्—

"मा भैष्टेति (?) दत्त्वा चाभयदक्षिणाम्।
पुत्रो दशरथस्याहं भविष्यामि भवत्कृते।

तत्रैव स्तोत्रसमये श्रीरामं प्रति श्रीशिवोक्तिः—

त्वं हि नारायणः श्रीमान् सीता लक्ष्मीः सनातनी
माता सर्वस्य वैदेही पिता त्वं रघुनन्दन॥

श्रीमद्भागवते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यापि भगवानेष साक्षाद् ब्रह्ममयो हरिः ।
अंशांशेन चतुर्भागात् पुत्रत्वं प्रार्थितः सुरैः ।
राम-लक्ष्मण-शत्रूघ्न-भरता इति संज्ञया ॥"

कूर्मपुराणे—

रामो दाशरथिर्वीरो धर्मज्ञो लोकविश्रुतः ।
भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महाबलः ।
सर्वे शक्रसमा युद्धे विष्णुभक्तिसमन्विताः ।
जज्ञे रावणनाशार्थं विष्णोरंशेन विश्वकृत् ।

अध्यात्मरामायणे ब्रह्माणं प्रति विष्णूक्तिः—

ब्रह्मल्लोकोपकाराय जनिष्यामि रघोः कुले ।
इत्युक्त्वाऽन्तर्दधे विष्णुस्तस्माद्रामो हरिः स्फुटम् ॥

विष्णुपुराणे गद्यम्—दशरथस्यापि भगवानञ्जनाभो जगत्स्थित्यर्थमात्मांशेन राम-लक्ष्मण-भरत-शत्रुघ्न-स्वरूपेण चतुर्धा पुत्रत्वमयासीत् ।

धर्मखण्डपूर्वभागे श्रीशिववचनम्—

ततो यक्षाः सगन्धर्वा मुनयश्च तपोधनाः ।
प्रपन्नाः शरणं देवं शङ्खचक्रधरं प्रभुम् ।
हरिं नारायणं विष्णुं वयं देवगणैः सह ।
स्तुतिभिः संस्तुतस्तत्र प्रसन्नो नो भवत्विति ।
रामो दाशरथिर्भूत्वा साकेतनगरे शुभे ।
लक्ष्मणेन सहायेन भरतेन यवीयसा ॥

अगस्त्यसंहितायामगस्त्यवचनम्—

क्षीराब्धेर्देवदेवोऽसौ लक्ष्म्या नारायणो भुवि ।
सशेषशङ्खचक्राभ्यां देवैर्ब्रह्मादिभिः सह ।
त्रेतायुगे दाशरथिर्भूत्वा नारायणोऽव्ययः ।
शेषोऽभूल्लक्ष्मणो लक्ष्मीर्जानकी शङ्ख-चक्रके ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातौ भरतशत्रुघ्नौ देवास्सर्वेऽपि वानराः ।
बभूवुरेवं सर्वेऽपि देवर्षिभयशान्तये ॥

उमासंहितायां श्रीशिवः—

चक्रपाणिरभूद्रामः इन्द्रिरा धरणीसुता ।
अनन्तो लक्ष्मणो जातो भरतश्चक्रमेव हि ।
शत्रुघ्नोऽभूत्पाञ्चजन्यमित्युमासंहितोक्तितः ।
रामो विष्णुरिवाभाति ह्येवमन्यत्र भूरिशः ।

हिरण्यगर्भसंहितायाम्—

नारायणं जगन्नाथमभिरामं जगत्पतिम् ।
काव्य पुराणं वागीशं रामं दशरथात्मजम् ।
श्रीशार्ङ्गधारिणं रामं चिन्मयानन्दविग्रहम् ।
एवं हिरण्यगर्भाख्यसंहितोक्तया च राघवम् ।
श्रीविष्णुमाह देवर्षिर्धर्मराजाय धीमते ।

श्रीरामतापन्याम्—

चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हरौ ।
रघोः कुलेऽखिलारातिराजतेयो महीस्थितः ।
स राम इति लोकेषु विद्वद्भिः परिकीर्तितः ।

श्रीमहाभारते—

"विष्णुर्नृणां स्वभक्तानामपवर्गप्रदो हरिः ।
संप्रार्थितो देवगणैर्भूत्वा रघुकुलोत्तमः ।
विनिहत्य दशग्रीवमयोध्यां प्राप धर्मवित् ।
एवमाश्चर्यपर्वोक्त्या रामो नारायणः स्वयम् ।
सभाद्रोणारण्यसंज्ञपर्वस्वप्युक्तमञ्जसा ।
राघवो विष्णुरित्येव प्रोक्तं तत्र महात्मभिः ॥
इत्याद्यनेकशास्त्रेषु विष्णुरित्येव राघवः ।
वर्णितो मुनिभिस्तद्वच्छिव इत्यभिवर्ण्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा हि श्रीराममूर्त्तेः परमेश्वरस्वरूपत्वप्रतिपादकप्रमाणवचनानि—
उत्तरधर्मखण्डे श्रीशिवः—

अहं मानुषरूपेण रामो भूत्वा हराम्यघम् ।
रामो दाशरथिश्चाहं कौसल्यानन्दवर्धनः ।
शत्रुघ्नभरताभ्यां च लक्ष्मणेन महात्मना ।
देवताभ्यर्थितः सत्यमयोध्यायां भवाम्यहम् ।
लक्ष्मणोऽपि हरिः साक्षात् सेवां मम करिष्यति ।
रामो ममांशसंभूतः सीताऽपि गिरिजांशजा ।
इत्यादिधर्मखण्डोक्तरीत्या रामः शिवः स्मृतः ।
एवं कवेरजाखण्डेऽप्युक्ता रामस्य शंभुता ।

तत्रर्षीन प्रति श्रीशिववचनम्—

अहं दाशरथी रामो भूत्वा वै दण्डकावने ।
राक्षसान्निखिलान्दुष्टान् हत्वा मोक्षं ददामि वः ।
एवं तपस्विनो विप्रान् प्रोवाच स महेश्वरः ।

आश्वर्यपर्वणि पुरा देवान् प्रति श्रीशिवेनैवमुक्तमिति श्रीरामं प्रति मतङ्गेनोच्यते—

श्रीशिवः—

रामोऽहन्तु भविष्यामि विष्वक्सेनसमन्वितः ।
दशाननपुरोगांश्च हनिष्ये राक्षसान् बहून् ।
ऋक्षवानररूपेण यूयं तु जनयिष्यथ ।
विहरिष्यामि (?) वने पुण्ये गोलाङ्गूलनिषेविते ।
नदीजलेन शुद्धेन तृप्तो मूलफलेन च ।
इत्युक्ता देवदेवेन भूतनाथेन राघव ।
संप्रहृष्टाः सुरगणा एवं जग्मुर्यथागतम् ।
स त्वं राम महाबाहो शङ्करो लोकशङ्करः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वधार्थं रावणादीनां जातो रघुकुले शुभे ।
एवन्तु शेषधर्मोक्तरीत्या रामः शिव इतीर्यते (?) ।
ब्रह्माण्डस्कान्दमत्स्यादिष्वेवं प्रायो रघूत्तमः ।
शिव इत्युदितोऽन्यत्र तथा ब्रह्मेति कथ्यते ।

श्रीराममूर्तेर्ब्रह्मस्वरूपताप्रतिपादकप्रमाणवचनानि—

श्रीमद्रामायणे रामो ब्रह्मेत्याहाग्निजः पुमान् ।
प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप । इति बालकाण्डे ।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ।
गवां कोट्ययुतं दत्त्वा ब्रह्मलोकं प्रयास्यति ।
दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति । इति संक्षेपरामायणे ।

ब्रह्माण्डपुराणे—

लोकस्रष्टा पुरा देवैरवतीर्णो महीतले ।
राम इत्युच्यते लोके रावणादिवधान्मुने
एवं ब्रह्मपुराणेऽपि रामस्योक्ता विरिञ्चिता ।

इत्याद्यनेकपुराणवचनैः श्रीराममूर्तेः ब्रह्मस्वरूपत्वमप्रतिहतमेवेति श्रूयते ।
श्रीराममूर्तेः हरिहरस्वरूपताप्रमाणवचनानि स्कान्दे रावणवधाय सर्वदेवता-लोचना-वसरे अशरीरिवाक्यम्—

उभाभ्यां विनिहन्तव्यो रावणो लोकरावणः ।
अशरीरिवचः श्रुत्वा प्रहस्य हरिशङ्करौ ।
तथैव चक्रतू राजन् रामो हरिहरात्मकः ।
परब्रह्मस्वरूपोऽयं प्राकृतो न हि मानुषः ।
शिवरूपेण संहारं विष्णुरूपेण पालनम् ।
शिवविष्णुस्वरूपेण परब्रह्मैव केवलम् ।

दुर्वासोरामायणे ऋषीन् प्रति श्रीरामोक्तिः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवं मां प्रतिजानीत नावयोरन्तरं द्विजाः ।
आवयोरन्तरज्ञानं तदेवाज्ञानमिष्यते ।

गारुडे—

तस्माद्दशरथाद्राज्ञो दशग्रीववधार्थिभिः ।
ब्रह्माद्यैरर्थितो विष्णुरीशांशेनावतीर्णवान् ।
तस्य रामाभिधानस्य जगन्नाथस्य शार्ङ्गिणः ।
स्कान्दगारुडवाक्यैरप्येवं तस्योभयात्मता ।

श्रीराममूर्तेर्मूर्तित्रयातीतस्वरूपप्रतिपादकप्रमाणवचनानि, निर्वाणखण्डे श्रीराम प्रति श्रीशिवः—

भ्रातरस्ते त्रयो राम ब्रह्मा विष्णुरहन्तथा ।
त्वत्तो विनिर्गता एते त्वय्येव विलयं गताः ।
त्वमेव परमं गुह्यं त्वमेव शरणं परम् ।
त्वमेव शरणं ब्रह्म त्वमेव शरणं हि नः ।
एवं निर्वाणखण्डोक्त्या रामो मूर्तित्रयात्परः ।
एवं च दर्शयिष्यामि श्रीमद्रामायणेऽपि च ।

ब्रह्मा—

पद्मे दिव्येऽर्कसंकाशे नाभ्यामुत्पाद्य मामिति ।
प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितम् ।
सोऽहं सन्न्यस्तभारो हि त्वामुपासे जगत्पतिम् ।
रक्षां विधास्यन् भूतेषु मम तेजस्करो भवान् ।
ततस्त्वमसि दुर्धर्षस्तस्माद्भावात्सनातनात् ।
रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान् ।
अग्निः क्रोधः प्रसादस्ते इति ब्रह्मस्तुतौ स्फुटम् ।
रुद्रः प्रोक्तोऽग्निशब्देन रुद्रो वेतिश्रुतेस्तथा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुयामले नारदः—

ब्रह्मविष्णुशिवाद्या यज्जगज्जन्मादिकारणम् ।
सदसद्रूपमव्यक्तं तद्रामोऽभूद्रघोः कुले ।

स्कान्दे—

रामो विष्णुश्च शंभुश्च त्रयो देवाश्च देवताः ।
सीता च पार्वती लक्ष्मीर्वाणी देवस्त्रियोऽपि च ।
त्वं शंभुरेव भूतेशो विष्णुरूपेण चाव्ययः ।
चतुर्मुखस्वरूपोऽसि त्रिमूर्तिस्त्वं परात्परः ।

हिरण्यगर्भसंहितायाम्—

ब्रह्मा विष्णुश्च रुद्रश्च देवेन्द्रो देवतास्तथा ।
आदित्यादिग्रहाश्चैव त्वमेव रघुनन्दन ।

पाद्मे—ब्रह्मा विष्णुश्च रुद्रश्च त्वमेव रघुनन्दन ।
सहस्रशीर्षा पुरुषस्सहस्राक्षः सहस्रपात् ।

ब्रह्माण्डे वसिष्ठः—

ब्रह्मविष्णुशिवरूपतोऽखिलम् पाति हन्ति सृजति स्वयं प्रभुः ।
राम एव मुनिवर्य ततोन्यद् नास्ति नास्ति परमं खलु दैवम् ॥

इत्यादिस्कान्दपाद्मैश्च स्तवराजोक्तमार्गतः ।
अगस्त्यसंहिताश्लोकैः परो रामस्त्रिमूर्तितः ।
ब्रह्मस्तोत्रे च तापिन्यां रामस्योक्ताऽखिलात्मता ।
तथा त्रिमूर्त्यतीतत्वे सर्वकारणरूपता ।
तस्मात्तु तत्त्वजिज्ञासोः परमार्थप्रकाशनम् ।
विश्वामित्रेण रचितमध्यात्मपदपूर्वकम् ।
रामायणं रामभक्तुष्टयेऽत्र प्रकाश्यते ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशान्तरत्नाकरम्

(पूर्वानुवृत्तम्)

[निबन्धकः—श्रीकालीपदतर्काचार्यः]

र-माता—अहह ! आर्यपुत्र, विचेतनापि अन्तरान्तरा आत्रेयस्य वत्सायाः स्नुषायाश्च परिक्लेशं स्वप्नं गतेव स्मरन्ती विषीदामि, नास्ति मे मोहेऽपि प्रशान्तिः ! अहह ! सुदुःसहापि क्षुधातृष्णाप्रभवा वेदना तथा न व्यथयति यथा किल वत्सस्य आत्रेयस्य वत्साया वध्वाश्च सुदुःसहं कातर्यम् ! तत् कमद्य शरणमुपेत्य व्यसनप्रतीकारं करोमि। किञ्च गण्डस्योपरि विस्फोटकेनेव प्रदोषेऽपि वत्सस्य रत्नाकरस्यादर्शनेन सुतरां शङ्कितास्मि। तदस्या विपत्तेः प्रतीकाराय कमिदानीं शरणं गच्छामः ?

च्यवनः—ब्राह्मणि, देवतां ! देवतामेव शरणं गच्छ। विपत्तौ देवतामन्तरेण कोऽन्यः शरणं दुर्गतानाम् ?

र-माता—आर्यपुत्र, अपि नाम देवताः सन्ति ?

च्यवनः—प्रिये, किमिदं ब्रवीषि ?

र-माता—यदि सन्ति, किमिति तथा कातरं विलपतां पदे पदे कृपां भिक्षमाणानामपि नास्माकं दयन्ते, तन्नूनमसन्तो देवाः।

च्यवनः—ब्राह्मणि, मा मैवम्, नैवं देवतामधिक्षेप्तुमर्हसि। लोकानां स्वेनैव कर्मणा जनितमदृष्टमनुपतन्तो देवा नार्हन्ति स्वातन्त्र्येण किञ्चित् कर्तुम्, तदलं देवताधिक्षेपमहापातकेन। अधिक्षिप्यतां स्वमेवादृष्टं येन वयं तथा दुःखमये विपाके निक्षिप्ताः स्मः।

र-माता—आर्यपुत्र, नावगच्छामि, यद्याराधिता अपि देवाः प्रीणिताः स्वच्छन्दतो नार्हन्ति किञ्चित् सम्पादयितुं, कथन्तर्हि देवा आराध्यन्ते ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्यवनः—ब्राह्मणि, न जानासि तत्त्वं, यदेवं वदसि !

र-माता—किमिव ?

च्यवनः—देवाराधनेति नित्योऽयं विधिर्गृहस्थानाम्। अकृता सा प्रत्यवायमुत्पादयेत् तेन च कष्टात् किमपि कष्टतरमापतितं स्यात्।

र-माता—किमितोऽपि नः कष्टतरम् ?

च्यवनः—ब्राह्मणि, निर्विचारमभिहितम्। तथाहि पश्य,

अद्याप्यावासहेतोः परिजनसहिता वृक्षमूलं न याता
सोच्छ्वासैः पुत्रपौत्रादिभिरपि कलिता यापयस्येव कालम्।
अद्याप्यानन्दधारां वहसि निजदृशा लोकयन्ती स्ववर्गं
श्रोत्रेणाकर्णयन्ती स्वपरिजनकथां विन्दसेऽद्यापि मोदम्॥

तद् देवाराधनामकुर्वाणा प्रत्यवायपराक्रमेण किमेतावदपि क्षपयितुमिच्छसि ?

र-पत्नी—(संज्ञां लब्ध्वा) अहो ! अवसन्नास्मि ! मातः ! अथ अद्यापि नागतस्ते पुत्रः ?

र-माता—वत्से, स्थिरा भव, एष आगतप्राय एव।

र-पत्नी—अप्रकाशेन जानामि प्रदोषो वर्तत इति। तदद्यापि नागतः ? हा हतास्मि मन्दभागिनी। न जाने किमतः परमपि कष्टतरं स्यात् ! अहह ! एष प्राणाधिको वत्सो मे मूर्च्छितः क्षितौ शेते ! दुवहञ्चेदं शरीरम् ! आर्यपुत्र ! क्वासि ? कियद्दूरे वर्तसे ? दृढं शङ्कितास्मि, तदेहि, सत्वरमेहि।

आत्रेयः—पितामह, कथमद्यापि तातो नागतः ?

च्यवनः—वत्स, स्थिरो भव, एष आगतप्राय एव।

आत्रेयः—सुचिरं कथयसि आगतप्राय इति, तन्नातः परं विश्वसिमि ! अहो ! शुष्कः कण्ठो मे, नार्हामि वाचमपि वक्तुम् ! घूर्णते शिरः ! क्षीणा दृष्टिः ! अवशं शरीरम् ! मातः ! कण्ठः शुष्यति ! दीयतां पानीयम्, (मूर्च्छति)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वे—वत्स आत्रेय, किमेवं करोषि ?

च्यवनः—वत्से, शीघ्रं पानीयमाहर ।

र-पत्नी—हा देव, हा आर्यपुत्र, (सत्वरं निष्क्रम्य पानीयमादाय प्रविश्य) वत्स, इदं पानीयम् ! हा हा वत्स, किमेवं मूर्च्छां गतोऽसि ?

च्यवनः—(चक्षुषोः पानीयं निक्षिप्य ससंज्ञं दृष्ट्वा) एष संज्ञां लभते !

आत्रेयः—पितामह, देहि पानीयम् !

र-माता—वत्स, इदं तत् पानीयं, पीयताम् । (पानीयं समुपनयति)

आत्रेयः—(पानीयं पीत्वा) आः ! समुज्जीवितोऽस्मि । मातः ! पितामह, पितामहि, यूयमपि पानीयं पिबत । येन पितुरागमनकालं यावत् स्वस्था भविष्यथ ।

च्यवनः—अहो वात्सल्यमात्रेयस्य ! भवतु, ब्राह्मणि, तदेव क्रियताम् ।

(सर्वे पानीयं पिबन्ति)

र-माता—आर्यपुत्र, किञ्चिद् वक्तुमिच्छामि ।

च्यवनः—कथय ।

र-माता—आत्रेयस्य स्नुषायाश्च वैकृव्यं समीक्ष्य दृढं शङ्कितास्मि, रत्नाकरोऽपि सुतरां विलम्बते, तद् यदि नात्यायासकरं तदा प्रतिवेशिगृहे तावन्तं वृत्तान्तमावेद्य कथमपि शरावार्द्धमितं तण्डुलं समासादय, एवमपि वत्सयोरनयोः प्राणान् धारयितुं शक्नुयाम ।

च्यवनः—ब्राह्मणि, न जानासि प्रतिवेशिनामत्रत्यानां हृदयं, येनैवं ब्रवीषि, तथाहि

बहुकृत्वः कृता भिक्षा मया तेषां समीपतः ।
श्रुता च परुषा वाणी या स्मृता दहतीव माम् ॥

र-माता—यद्येवं धनदत्तस्य वणिजः समीपं गत्वा नातिचिरं निर्यातनीयेन मूल्येन तण्डुलानेतावन्मितान समानय ।

च्यवनः—ब्राह्मणि, प्रभूतमृणं तस्मात् पुरैव गृहीतवानस्मि, येन धनदत्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्प्रतं मां समीक्ष्य दूरे तिष्ठति, नालापमपि कुरुते। किं बहुना कथञ्चिद्दर्शनपथं गतः परुषामपि वाणीं प्रयुङ्क्ते। ब्राह्मणि, अपराधो मे तस्माद् गृहीतपूर्वमृणं न निर्यातितमिति। तत्रैव पुनरपि ऋणार्थं गमनमुपदिशसि? अथवा निष्फलमेव तत्र गमनमिति।

आत्रेयः—नहि नहि तत्र ऋणार्थं न गन्तव्यम्, हीनः खल्वसौ; कदाचित्तस्य पुत्रो मां दरिद्रपुत्र इत्युपहसितवान्, तत्र नानेन प्रतिषेधः कृतः, परं स्मितेन पुत्राचरणस्य आनुकूल्यमेव प्रदर्शितम्। तत् तत्र न गन्तव्यम्।

च्यवनः—अहो तादृशीमवस्थां गतस्य बालस्यापि सत आत्रेयस्य अभिमानः! (प्रकाशम्) वत्स, स्थिरो भव, नाहं तत्र गमिष्यामि।

आत्रेयः—पितामह, कथमद्यापि तातो नागच्छति?

च्यवनः—अलमाशङ्कया, अचिरमागमिष्यति (स्वगतम्) रत्नाकरं प्रति भृशमभिशङ्कते मे हृदयम्। अपि नाम दारिद्र्यनिर्विण्णेन तेन न किञ्चिदत्याहितमाचरितं भवेत्? हा हतविधे, कियदपरं घटयिष्यसि? अथवा शान्तं पापं प्रतिहतममङ्गलं मे वत्सस्य!

र-माता—आर्यपुत्र, एवं गते न स्थैर्यं गन्तुमर्हामि, वत्से रत्नाकरे बहुलमाशङ्कते मे हृदयम्। तद् यदि नातिदुष्करं तदा कियदूरमनुसृत्य तत्त्वमवगन्तुमर्हसि।

च्यवनः—आं ममापि रत्नाकरे विविधमनिष्टमाशङ्कते चेतः! क्रमेण प्रदोषतमसा समं प्रवर्धते शङ्का। तत् किन्नु खलु करिष्ये। अनशनेन मानसवैक्लव्येन च सुदुर्वहान्यङ्गानि! तथापि नैवं शक्यमुपेक्षितुम्। हा विधे,

मा नाम ह्रियतामेष दरिद्राणां समाश्रयः।
हृतेऽस्मिन्नेष दीनानां वर्गः सर्वो विनङ्क्ष्यति॥

ब्राह्मणि, दीयतां मे यष्टिका, यावत पश्यामि।

र-माता—(यष्टिमुपनीय) एषा यष्टिका!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवनः—(यष्टिमवलम्ब्य स्थितः) अहो स्थितस्यापि मे कम्पितौ चरणौ, कम्पते चायं हस्तः ! तथापि प्रयत्नेन बहिः कियदूरं गत्वा वत्सं रत्नाकरमाकारयामि ! (पदान्तरं गत्वा) ब्राह्मणि, ब्राह्मणि, एहि अवलम्बस्व मां ! अवशानि मे अङ्गानि, घूर्णते शिरः ! एषोऽहं नालमस्मि शरीरं धारयितुम् । (मूर्च्छितः पतति)

र-माता—हा आर्यपुत्र, समाश्वसिहि, हा आर्यपुत्र, ममैव मन्दभाग्यायाः प्रेरणया विपद्यसे ! हा हतास्मि मन्दभागिनी ।

र-पत्नी—हा तात, कथमेवं पतसि ?

आत्रेयः—हा पितामह, कथमेवमसि ? (उत्थातुमिच्छन् मूर्च्छति)

र-पत्नी—हा हा ! वत्सो मे आत्रेयोऽपि मूर्च्छितः ! हा आर्यपुत्र, क्वासि, सत्वरमेहि, पश्य ते तातस्य आत्रेयस्य च विषमां दशाम् । हा ! हा !!

र-माता—अहह ! किं करोमि, विमूढास्मि, आर्यपुत्र, समाश्वसिहि, वत्से, स्नुषे शीघ्रं सलिलमुपानय, यावद् एतौ उपचरामि ।

र-पत्नी—(सलिलमुपनीय) इदं सलिलम् ।

र-माता—(उभौ यथाक्रमं सलिलेन उपचरति)

(ततः प्रविशति तण्डुलाद्युपकरणभारनम्रकायो रत्नाकरः)

रत्ना—अहो ! प्रथमेनानेन कठोरसाहसेन लज्जित इव संवृत्तोऽस्मि । अपि कृतो मया कुशल एष समारम्भः ? अथवा सुदूरमतिक्रान्तोऽस्मि, नायं समयः शुभाशुभे विचारयितुम् ! यत् कृतं, सुष्ठु कृतम्, अयमेक-एव मे पन्थाः स्वजनसञ्जीवनाय । तदिदानीम्—

साहसैरेव लब्धेन द्रव्येण मुदितो भृशम् ।
पितरौ वनितां पुत्रं जीवयाम्यविलम्बितम् ।
वृत्तं भग्नं भज्यतां किन्ततो मे ?
प्राणा नष्टा दीनयोः किन्ततो मे ?
पित्रोः पत्न्याः पुत्रकस्यात्मनश्च
प्राणा लब्धा लाभ एष प्रकामम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वयोर्जीवननाशेन बहूनां यदि जीवनम् ।
लोकतो धर्मतो वापि किमनिष्टं ततो मम ?
अथवा धर्म इति कल्पनामात्रसारं स्वार्थपु प्रबुद्धानाम् ।
कुतः ?

तावत्कालं रक्षितो धर्ममार्गः
किं तस्मान्मे क्लेशहानिः प्रजाता ?
अस्मादृद्धं धर्मसिद्धान्तवैरं
कृत्वा कृत्वा स्वामवस्थां परीक्षे ।

अये कथमेतावद्गभीरः प्रदोषान्धकारः ! (दृष्ट्वा) आं ! मेघैः संवृत-मन्तरीक्षम् ! अहो सुमहदुपकृतं खलु गभीरान्धकारेण रत्नाकरस्य । कुतः ?

हत्वा शाकटिकं तथा धनपतिं द्रव्याणि हृत्वा तत-
श्चौराणां वसतिं समीक्ष्य निभृतामद्रौ च तैः पूजितः ।
स्कन्धेनापि वहन् बहूपकरणं मार्गं सशङ्कं श्रितः
प्राप्तोऽहं तमसैव संवृतवपुः पौरैरदृष्टः पुरम् ।

(वीरबलमुद्दिश्य) सखे वीरबल, न जाने कीदृशस्त्वया सह मे जन्मान्तरीणः सम्बन्धः, येन स्वजनरक्षाया निरुपमं मार्गं प्रदर्शितवानसि । भवतु साम्प्रतं स्वजनानविलम्बितं पश्यामि, अपि नाम सर्वानेव कुशलिनः पश्येयम् ? (परिक्रम्य दृष्ट्वा) अये सर्व एवैते एकस्था दृश्यन्ते, अये किमिदम् ? जननी भूतले शयानं तातमुपचरति, प्रिया माधवी च तत्रैव शयानमात्रेयम् । मूढ रत्नाकर, अपि नाम विफलस्ते सर्वो महानारम्भः ? (उपसृत्य) हा तात, हा आत्रेय, क्वासि, देहि मे प्रतिवचनम् । (भारं त्यक्त्वा उपसर्पति)

र-माता—वत्स, रत्नाकर, आगतोऽसि ? हा ! हा ! पश्य ते पितुः पुत्रस्य च समवस्थाम् ! आर्यपुत्र, उत्तिष्ठ, देहि मे प्रतिवचनम् । एष ते रत्नाकरः प्राप्तस्तं कथं न सम्भाषसे ? वत्स, आत्रेय, उत्तिष्ठ, तातं परिष्वजस्व ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्यवनः—ब्राह्मणि, रोदिषि ? मा भैषीः, न च्यवनो म्रियते ! क नु खलु रत्नाकरः ?

रत्ना—तात, एष ते सन्तापमात्रहेतुः पुत्रः पादयोः पतितोऽस्मि ।

आत्रेयः—तात, अपि आगतोऽसि ? तात, अपि प्राप्तानि भोज्यद्रव्याणि ? (परिष्वजते)

रत्ना—वत्स, अथकिम् । (अङ्के स्थापयति)

र-माता पत्नी च—अहो समुज्जीवितास्मि द्वयोरेव संज्ञालाभेन ।

च्यवनः—वत्स, रत्नाकर, अलमिदानीं वाचां प्रपञ्चेन । (उपकरणभारं दृष्ट्वा) संक्षेपतः कथय, कुत एतानि प्रभूतभोज्यद्रव्याणि समासादितानि ?

रत्ना—(स्वगतम्) किं सत्यं कथयामि ? अथवा एवं तावत् कथयामि ; तात,

अद्य केनापि मित्रेण सन्दृष्टेन कृपावता ।
अस्माकं रक्षिताः प्राणाः प्रभूतद्रव्यदायिना ।

सर्वे—अहो दैवानुबन्धः ! अहो तस्य महानुभावता !

च्यवनः—वत्स, क एष महानुभावो नाम, यं द्वारीकृत्य विधात्रा दरिद्रकुलमिदमनुगृहीतम् । अप्यसाविहैव प्रतिवसति ?

रत्ना—नहि नहि, स खलु दूरे प्रतिवसति । महानुभावश्चासौ नास्माभिः स्वनाम कीर्त्यमानमिच्छति । तदलं तदीयनामश्रवणनिर्बन्धेन । परमद्य प्रभृति तमेतं महान्तमेव बान्धवं ज्ञातुमर्हसि ।

च्यवनः—अहो ! देवतास्तस्य सर्वतः स्वस्ति करिष्यन्ति । वत्से स्नुषे, अलमद्यापि कालहरणेन, सत्वरमेव महानसं गत्वा भोज्यं निष्पाद्य आदौ वत्सस्य आत्रेयस्य समुज्जीवनं कुर्वीथाः, रत्नाकरस्य विलम्बकारणादिकमतः परं यथावसरं श्रोतव्यम् ।

र-पत्नी—यथाज्ञापयति तातः । (निष्क्रान्ता)

प्रथमाङ्कः समाप्तः

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



द्वितीयाङ्कः

(ततः प्रविशति दण्डहस्तो रत्नाकरः)

रत्ना—अहो प्रसादः ! निःशेषमद्य निर्वासितं चिरसञ्चितं मनसो मालिन्यम् ! कुतः ?

द्वारे द्वारे प्रातरारभ्य पूर्वं
सायं यावत् पर्यटन व्यर्थकामः ।
भाग्यात् स्वेषां मृत्युवक्त्रे स्थितानां
रक्षाकृत्ये शक्तिमाप्तः कथञ्चित् ॥

अपि च

दूरे कोमलवृत्तयः परिचिता निर्वासिता मानसाद्
धर्म्यं शास्त्रवचः प्रवञ्चनपरं निर्धारितं सर्वतः ।
वृत्तिः क्रूरतमा तमालमलिना सम्पूजिताऽर्घ्यादिभि-
र्हस्ते न्यस्तकुशे विशेषविधये दण्डः समारोपितः ॥

अहो, एतावतो दिवसान् प्राक्तनसंस्कारखलीकृतेन चेतसा विनयं सेवमानेन मया महदन्याय्यमनुष्ठितम्, येन किल तावान् दुःखभोगः समजनि ।

मिथ्यैव मुग्धजनता जननाय भूते-
धर्म्यान् विधीन् परिचरन्ति परानुगत्या ।
दृष्टं विहाय फलमत्र परत्र लोके
किं नाम संस्मरति हा मतिमानदृष्टम् ॥
व्यर्थं दैवतपूजनं हतफलं धर्माद् भयं देहिनां
सत्यं निष्फलतामुपैति परितः सत्रञ्च सापत्रपम् ।
यद् यत् पौरुषसञ्चितं निजहितं सत्यं तदेवोचितं
लुप्तं सन्तमसं क्षणेन हृदि मे विज्ञानदीपोदयात् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

মাসিক-সভা

संस्कृत-साहित्य-परिषद आगामिनी मासिक-सभा १३४५ वङ्गाब्दीय-सौरज्यैष्ठस्य ३०श (त्रिंश)-दिवसे सोमवासरे सायं सप्तवादनतो भविष्यतीति सर्वेषां संस्कृत-भाषाध्यायिना-मध्यापकानाञ्च तत्र समुपस्थितिः प्रार्थनीया।

মাসিক সভা

সংস্কৃত-সাহিত্য-পরিষদের আগামী মাসিক সভা—৩০শে জ্যৈষ্ঠ, ১৩৪৫, সোমবার, সন্ধ্যা ৭টার সময়ে হইবে। সর্ব্বসাধারণের উপস্থিতি একান্ত প্রার্থনীয়।

পণ্ডিতগণের জীবনী-সংগ্রহ

সংস্কৃত ভাষাভিজ্ঞ ব্যক্তিমাত্রই অবশ্য স্বীকার করিবেন যে ভারতবর্ষের গৌরব ভূতপূর্ব্ব এবং বর্ত্তমান অধ্যাপকগণের জীবনী একত্র সংগ্রহ করিয়া প্রকাশ করার যথেষ্ট উপযোগিতা আছে। এ বিষয়ে পরিষদের পক্ষ হইতে তথ্যানুসন্ধান করা হইতেছে। বঙ্গদেশে এখনও প্রায় ১০০০ সুপ্রতিষ্ঠিত অধ্যাপক আছেন, তাঁহাদের এবং তাঁহাদের অধ্যাপক পণ্ডিতগণের জীবনী সংগ্রহ করিতে পারিলেও একটা উল্লেখযোগ্য কার্য্য সম্পন্ন করা যাইতে পারে। তদুদ্দেশ্যে প্রত্যেক অধ্যাপকের নিকট বিনীত অনুরোধ এই যে, তাঁহারা অনুগ্রহপূর্ব্বক নিজের এবং স্বপরিচিত পরলোকগত বা বর্ত্তমান অধ্যাপকগণের মধ্যে অন্ততঃ দুই জনের সম্বন্ধে নিম্নলিখিত সংবাদগুলি **সংস্কৃত-সাহিত্য-পরিষৎ-সম্পাদকের** নামে লিখিতভাবে জানাইলে দেশের ও দশের মহৎ উপকার সাধিত হইবে :—

নাম, পিতার নাম, উপাধি, কর্ম্মস্থল, জন্মস্থান (গ্রাম, পোঃ, জেলা), জন্মদিবস (বাংলা তারিখ, অন্ততঃ আনুমানিক সাল), বর্ত্তমান বয়স (পরলোকগত-স্থলে মৃত্যুদিবস—বাংলা তারিখ), তাঁহার অধ্যাপকের নাম, স্বরচিত কোন গ্রন্থাদি থাকিলে তাহার নাম (মুদ্রিত বা অমুদ্রিত জানা দরকার), নিজে টোলে মোট যত ছাত্র পড়াইয়াছেন তাহার আনুমানিক সংখ্যা, টোলের নাম ও ঠিকানা। সংবাদদাতার নাম ও ঠিকানা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

স্বল্পমূল্যে পুরাতন সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকা

বর্ত্তমানে বিংশ বর্ষ চলিতেছে। পূর্ব্বের কয়েক বর্ষের অল্পসংখ্যক পত্রিকা এখনও সম্পূর্ণভাবে পাওয়া যাইবে। সভ্যগণের সুবিধার জন্য নিম্নলিখিত মূল্যে পুরাতন পত্রিকাগুলি এখনও দেওয়া হইতেছে, এ বিষয়ে সভ্যগণের দৃষ্টি আকর্ষণ করা যাইতেছে। যিনি যে বৎসরের পত্রিকা ক্রয় করিতে ইচ্ছুক সেই বৎসরের পত্রিকা বর্ত্তমানে সম্পূর্ণ পাওয়া যাইবে কিনা পূর্ব্বে পত্রদ্বারা জানিয়া নিলে ভাল হইবে।—

এক বৎসরের পুরাতন পত্রিকা···		৩৲	(ডাক মাশুল ৶০)
২ বৎসরের ,, ,,	(এক সঙ্গে)	৫৷৷০	(,, ৷৵০)
৩ বৎসরের ,, ,, ,,		৮৲	(,, ৷৷/০)
৪বৎসরের ,, ,, ,,		১০৲	(,, ৸০)

তাং ২২।২।৪৫

Opinions on the 'Kalitantram'

(Sanskrit Sahitya Parishad Series No. 2)

Amrita Bazar Patrika (31. 10. 22)—We hail the appearance of a new book-let called Kali-Tantram published by the Sanskrit Sahitya Parishat, Shyambazar, Calcutta. It is annotated and translated by Pandit Satish Chandra Siddhantabhushan. We dare say that the work will prove to be a great help to those who care to make an attempt towards the realisation of the monistic philosophy contained in the Tantras. There is no doubt that it will at least serve the public in giving some inkling about the mode of worship enjoined by the Tantras and so help them from being duped by professional impostors. We hope that the presentment of such works will throw much light into the hitherto neglected Tantra literature. The get up of the book is good. It is priced at *8 as. for members* of the Sanskrit Sahitya Parishad and *10 as.* for the public.

Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar